व्याकरणन्यायाचार्य्यः भूतपूर्वप्राचीनव्याकरणविभागाध्यक्षः
वा० सं० वि० विद्यालयः, वाराणसी ३-६

२. वैदिकवाङ्मये बैठसम्प्रदायः प० जनार्दनशास्त्रिपाण्डेयः
साहित्याचार्य्यः एम० ए०
पञ्चगङ्गाघट्टः, वाराणसी। ७-१०

३. सावर्ण्यविमर्शः प० गोपालदत्तपाण्डेयः
व्याकरणाचार्य्यः एम० ए० भू० पू० स० शिक्षानिर्देशकः
उत्तरप्रदेशसर्वकारस्य भारतस्य ११-१४

४. कर्तुरीप्सिततमं कर्म प० रामप्रीतिर्द्विवेदः व्याकरणाचार्य्यः
भू० पू० गोयनकादि कालेजस्य प्राचार्य्यचरः
वाराणसी १५-१५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

...शुक्लः — १६–२३
...ाचार्य्यः
प्रब... ...बन्धक ...वि... ...निलय, वाराणसी

...शास्त्रिद्राविडः — २४–३३
अथ जनन-मरण-जर... ...न्यायाचार्य्यः विद्वन्मूर्धन्यः
जनकनन्दि... जानकी ... ...वेदविद्यालयस्याध्यक्षचरः रामघट्टो वाराणसी,
...करुणम् ... हि... स्वामिप्रपन्नाचार्य्यः, वाराणसी — ३४–३९

११. गुरुव... ...शालि... वासुदेवशास्त्रिद्विवेदः — ४०–४४
...ातुचिंस ...भटर साहित्यवेदाचार्य्यः सार्वभौमसंस्कृतकार्य्यालयस्य
संस्थापकाध्यक्षश्च बांसफा...क, वाराणसी

१२. अहो ...ातु भारती — प० राजेन्द्रचौधरी — ४४–४८
अवक्र... ...व्याकरणसाहित्याचार्य्यः सासंस्कृतकालेजः, (जबलपुर) मध्यप्रदेशः

...काले धार्मिक — ...दिनेशराजपन्तः — ४९–५२
...ाया उदाहरणं — पुरातत्त्वलिपिविज्ञानवेत्ता

१३. श्र... ...ारायणमूर्तिः — वाल्मीकिविद्यापीठम्, काठमाण्डौं
श्रद्ध...
...सन्धिलक्षणम् — डा० रेवाप्रसादद्विवेदः — ५३–५४
साहित्याचार्य्यः साहित्यविभागाध्यक्षः

१४. ... — काशीहिन्दूविश्वविद्यालयः, वाराणसी

...जीवनयोर्महिमगानं हि — उपकुलपतिर्माधवप्रसादघिमिरे — ५५–५८
...ाम — नेपालराजकीयप्रज्ञाप्रतिष्ठानस्य
कमलादी, काठमाण्डौं

१३. गणितस्य नवीनाविष्कारः — प० नयराजपन्तः, गणितफलिताचार्य्यः — ५९–६१
नेपालराजकीयप्रज्ञाप्रतिष्ठानस्य सम्माननीयसदस्यः

१४. अ...स्तनं मत्प्रतिभानम् — प० पूर्णप्रसादब्राह्मणो मीमांसाचार्य्यः — ६२–६३
सत्यहरिश्चन्द्राद्यनेककाव्यनिर्माता 'जयतु संस्कृतम्' आन्दोलनस्य
सूत्रधारश्च छावनी, काठमाण्डौं

१५. मुद्रिते हरिभद्ररचितेऽभिसमया-लङ्कारालोके अपपाठविचारः — डा० विश्वनाथभट्टाचार्य्यः एम० ए० पीएच० डी० शान्तिनिकेतन बङ्गाल — ६४–६५

१६ केव... ...घो भवति — डा० रूपनारायणपाण्डेयः एम० ए० — ६६–६९
...हादय... — सितारगञ्ज, नैनीताल, अलमोडा (उ० प्र०)

१७. प्रा...यतो ले... ...तिकलाया — कुलपतिलैनसिंहवाङ्गदेलः — ७०–७१
इतिहा... — नेपालराजकीयप्रज्ञाप्रतिष्ठानस्य
कामलादी, काठमाण्डौ
अन्ताराष्ट्रियख्यातिप्राप्तचित्रकारः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

१८. शिक्षा	प्राचार्य्यपूर्णचन्द्रढुङ्गेलः न्यायव्याकरणसाहित्यवेदान्तज्यो... सांख्ययोगपुराणेतिहासाचार्य्यः ... गोरक्षनाथसंस्कृतविद्यापीठस्य प्राचार्य्यः, गोर...	
१९. वेदे देवनागरिकी लिपिः	स्वामिकृष्णाश्रमः श्रीकृष्णमहाराजसाखरे यशोधनप्रकाशन अलन्द... महाराष्ट्रम् (वर्तमान रामघाट) वाराणसी	१–२
२०. भारतीयराजनीतौ शास्त्रज्ञानमपि आवश्यकता	प० न्यायरत्नरामचन्द्रशास्त्रिहोसमने अध्यक्षस्साङ्गवेदविद्यालयः रामघाट, वाराणसी	३–४
२१. ख्रीस्त्तीयशताब्दीतः प्राक् भाषाया भाषातत्त्वशास्त्रस्य (भाषाविज्ञानस्य) च स्वरूपम्	डा० भगीरथप्रसादत्रिपाठी (वागीशशास्त्री) अनुसन्धानविभागाध्यक्षः सम्पूर्णानन्दसंस्कृतविश्वविद्याय, वाराणसी	५–६
२२. श्रीरामस्य खलदवदहनत्वम्	प० विश्वनाथशास्त्रिदातारः शास्त्ररत्नाकरः, विद्याभूषणः, न्यायप्रभाकरः न्यायकेसरी, नीतिशास्त्रप्रवीणः ब्रह्माघाट, वाराणसी	७–८
२३. नेपालमिथिलयोस्तन्त्रसम्प्रदायः	डा० किशोरनाथ झा न्यायाचार्य्यः रीडर गङ्गानाथझा केन्द्रीयसंस्कृतविद्यापीठम् कम्पनीबाग, इलाहाबाद	९–१०
२४. आयुर्वेदे स्वास्थ्यसंरक्षणोपायः	कविराजनरपतिपोखरेलः, आयुर्वेदशास्त्राचार्य्यः लक्ष्मीसड़क, धरान (नेपाल)	[illegible]–५४
२५. नेपालस्थकतिपयविदुषां तथा पद्मप्रसादभटराईपादानां शिष्यवर्गस्य नामसूची	डा० स्वामिप्रपन्नाचार्य्यः वाराणसी	[illegible]८–११२
२६. सांख्ययोगदर्शनविमर्शः	डा० काशीराजशर्मसुवेदः दर्शनाचार्य, आयुर्वेदाचार्य, विद्यावारिधिश्च (वा० सं० वि० वि०) वी० ए० (का० हि० वि० वि०) भारतीयव्यायामकप्तान (सं० वि० वि०)	१[illegible]२०
२७. पाणिनेस्तपोभूमिः	प्रा० विष्णुराजात्रेयः, व्याकरणाचार्यः एम० ए० द्वय रीडर त्रि० वि० वि० (नेपाल) अतिथि प्राध्यापक, का० हि० वि० (वाराणसी)	१२१–१२५
२८. आयव्ययविवरणम्		–१२८
२९. आर्थिक सहायकमहानुभावाः		–१२६

CC-0. In Public Domain. Digitization by eGangotri

[illegible]रिचयः

[illegible]रत्नप्रसिद्धप्रबलगोरखादक्षिणबाहु-

[illegible]प्रसादभट्टराईमहोदयानां

संक्षिप्तं जीवनेतिवृत्तम्

प० गङ्गाधरशास्त्रिपराजुलिः

उपक्रमः

[illegible]भो मान्याः सुरभारतीप्रणयिनः पाठकमहाभागाः ! धन्येयं रत्नगर्भा, याऽस्मिन्नापातरमणीयाधिभौतिक-पदार्थ[illegible] प्रत्यहमपचीयमानश्रौतस्मार्तकर्मविधाने परकीयविद्यावेषभाषाभूषाचारविचारानुकारैकनिरत-भारतभूजननिवहेऽपि[illegible] समये सविशेषमाध्यात्मिकोन्नतिशीलान्निखिलश्रौतस्मार्तधर्मधुरन्धरान्सदाचारविचार-तत्परा[illegible]न्विपश्चिदपश्चिमान्प्रसूते। येभ्यः किलादर्शभूतेभ्य आकारे सौम्यता, जीवनसम्भारे सरलता, धर्मे दृ[illegible]भावे ऋजुता, विषये निरीहता, शास्त्रे जिज्ञासुता, आस्तिक्यं, दया, विनयः, तपः, चेतःशुद्धिश्चेत्या-[illegible]गुणा ग्राह्या भवन्ति। तेष्वन्यतमा हीमेऽस्मच्चरित्रनायकाः पूज्यपादाः श्रीपद्मप्रसादन्यायाचार्यमहाभागाः। वि[illegible]सार्वपथीनवैदुष्याणामेतेषां महोदयानां परिचयाङ्कनमत्र लोकोत्तरचरित्रस्मृतेः सकलकल्याण-सम्पादक[illegible]धयैव सफलमिति समासतः किञ्चिद्यथाभूतं निवेद्यते।

जन्मसंस्कारौ

[illegible]लानां साहवंशालङ्कारभूतानां श्री ५ पृथिवीवीरविक्रमदेवानामनुज्ञया श्री३वीरसम्शेरवर्मणि प्रशासनक[illegible] जागरूके सति पूर्वनेपालान्तर्गतरामेछापमण्डलमध्यवर्तिनि सालुनाम्नि ग्रामे निवसतः कठिनतपः-समासादितानेकविधविद्याविशारदस्य वासिष्ठगोत्रावतंसस्य भगवद्भजनैकरतेर्दीनानाथमहोदयस्य पतिव्रतायां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्मपत्न्यां कृष्णमायाभिधायां शिखिशरनिधीन्दुमिते १९५३ वैक्रमाब्दे ... पुरुषधौरेयस्यास्य जनिः समजनि। अथ पित्रा विहितजातकर्मादि... भवन् शशीव शुक्ले दले पुष्यत्कलोज्वलः साकं स्वजनान... वर्णमातृकादिशिक्षां गृह्णन्नयमकाण्डेऽस्मरीरोगाक्रान्ततया चिकित्सार्थमो... काष्ठमण्डपप्रदेशमानीयत। तत्रैव कृतवसतेरपरपितृव्यस्य जीवनाथशर्मणः स... निर्वृत्तिपूर्वकब्रह्मवर्चसकामनयाऽष्टमेऽब्दे तत्रैव महता महेन कृतोपनयनसंस्का... समेध... तेजा अजायत।

विद्यालयीया शिक्षा

अथ नेपालराजकीयप्रधानपाठशालाध्यापकस्य वेदविद्यानिष्णातस्य पद्मचन्द्रोपाध्यायस्य गङ्गानाथ-महाभागस्य च सविधे सविधि यजुःसंहितां शुक्लां यथाशाखमधीयानोऽयं भाविविपश्चिदपश्चिमो बालः ...प्रसादः समाचकर्ष सर्वेषां दृष्टिम्। समाप्तसंहिताध्ययनश्चायं तत्रैवाध्यापयतो मोदनाथपण्डितवर्यस्य सकाशे लघुकौ-मुदीमध्येतुं समारभत। स्वल्पेनैव समयेनाऽऽसमाप्ति लघुकौमुदीमधीत्य तत्रैव विद्यालये प्रधानाध्यापक...ऽ परपतञ्जलेरिव विष्णुहरिपण्डितस्य चरणयोः कृताञ्जलिः सिद्धान्तकौमुदीं पठितुमारेभे।

अस्मिन्नेवावसरे तत्रैव विद्यालयेऽध्यापयतः काव्यतीर्थन्यायोपाध्यायसोमनाथशर्मणो माघकाव्य...धी-यानोऽस्मच्चरित्रनायकस्तत्रैव विद्यालये विविधशास्त्राणि पठद्भिर्नेपालराजगुरुभिः ...राज... काव्यस्य पाठावसरे माघस्याधीतभागे कृतानां प्रश्नानां समुचितोत्तरदातृभ्यश्छात्रेभ्यो म... ...दीयत इत्युद्घोषिते सर्वप्रथममग्रेसरो भूत्वा सकलप्रश्नानां समुचितान्युत्तराणि प्रददौ। ततश्चा... धारणया धारणया विस्मिता राजगुरुमहोदयास्तद्दिनत एव पाठशालीयसमयान्तरं स्वभवनमागत्यानेन स... पाठादि... यितुमारब्धवन्तः, निखिलप्रभुगुणसम्पन्नैरेतै राजगुरुभिः सहास्यायं सम्बन्धो भी... सलिलयोग इवाभवत् यतस्तदा प्रभृत्येवैभ्यो विविधसाहाय्यमवाप्य पल्लवितोऽस्य मनोरथाङ्कुरः। अ...

सिद्धान्तकौमुद्याः पूर्वार्धपाटनेनैव गतार्थतां मन्यमान इव विष्णुहरिमहाशये दुर्दैववि... वर्तिनीं गतिं प्राप्तवति विधिहतकविघ्नितव्याकरणाध्ययनोऽयं पर्यध्ययनः शोकोपहतमनोविनोदा... त्साहित्योपाध्यायदेवोदत्तपराजुलितश्च सविशेषं काव्यमधीयानोऽचिरेणैव प्राप्तप्रतिभाप्रकर्षः क... यीयां काव्यमध्यमामुत्तीर्य परिपच्यमानसुकृतमहिमवशाद्युगाश्वाङ्कभूपरिमिते १९७४ वैक्रमेऽब्दे स्व... ...त-प्रदीपैस्त्रिलोकीभासिकां सकलाज्ञाननाशिकां काशिकां सहैव राजगुरुभिः समासाद्य तस्मिन्नेव व... ...ाकरण-संपूर्णमध्यमायामपि समुत्तीर्णो बभूव।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

...विद्यालयीया शिक्षा

...निखिलागमनिष्णातं पारेसहस्रशिष्यप्रसारितयशोनिकरसुधाकर-
अथ जनन-मरण... भारतीयविबुधवृन्दाखण्डलं सदास्मिताञ्चितवदनकमलं राजकीयमहाविद्यालयी-
...यवामाचरणभट्टाचार्यमहाशयं गुरुभावेनोपगम्य सदाचरणतत्परां गुर्वाज्ञा-
...चरेणैव शरषिनवभूमिते १९७५ वैक्रमेऽब्दे दर्शनसम्पूर्णमध्यमायामपि
...त्तीर्णो बभूव... मीमांसा... यस्याध्ययनगुणगरिम्णा श्रद्धया विनयेन च नितान्तमावर्जितान्तःकरणो
जातः। ...भट्टाचार्यमहाशयैर्निर्विशेषस्नेहभाजनतया नव्यन्याययौवनगृहायमाणनवद्वीपग-
...प्रदेशान्स... रणसेवासु रतोऽयं विभिन्नचतुष्पाठीषु तत्रत्यविद्वन्मण्डलीभिःसह शास्त्रार्थं
चिन्तयन्स्व... भावि... वदमश्चिमतां प्रकटयामास। इत्थं गुरुसेवातत्परोऽयमन्तरान्तरान्यशास्त्राण्यपि
समालोचयन् ...न्यायवैशेषिकपदार्थसार्थयाथार्थ्यमधिगत्य विधुनागनिधिभूमिते १९८१ वैक्रमाब्दे नव्यन्यायाचार्य-
परीक्षायां प्रथमश्रेण्यामुत्तीर्य न्यायाचार्यपदव्या समलमक्रियत।

ततो गुरुवरानुज्ञया पोष्टाचार्य (विशिष्टाचार्य) कक्षायां प्रविष्टो निर्दिष्टग्रन्थाननितरसाधारणया धारणया विवेचयंस्तात्कालिककाशिकराजकीयमहाविद्यालयाध्यक्षाणां म०म० गोपीनाथकविराजमहानुभावानां मान... माचकर्ष। तैश्च प्राचीनन्यायवैशेषिकयोर्योगागमविद्यासु च नव्यभव्यया सुविशदया विचारपद्धत्या सर्वत्र बोधितः, सर्वोपसंहारेण कणभक्षाक्षपादगवीदक्षतां योगागमविद्याविशारदताञ्चागच्छत्। अस्यामेव वेलायाम... स्तोषाय वेदान्तविद्यां तत्त्वतोऽधिगन्तुं निखिलविचक्षणाग्रगण्यं लोकोपकारधन्यं म०म० लक्ष्मणशास्त्रिद्रविड... समवाप चापरशङ्करादिव सदा मुदितान्तरादद्वैतसिद्धान्तनिर्भराच्छास्त्रिवरात्सकलं शाङ्कर... स्मृत्यर्थ... न्यायावशिष्टविद्याधिजिगमिषया तात्कालिककाशिकसुधीमूर्धन्यस्य स्वनामधन्यस्यानन्तान्ते-वासिविकासि... विहितानेकनिबन्धपूर्तेर्निखिलदर्शनविमर्शनविशुद्धस्फूर्तेस्त्यागमूर्ते म० म० नित्यानन्दपन्त-पर्वतीय... समाजगाम। सोऽपि सुयोग्यमेनं सकलविद्यापात्रं मत्वोपनिषद्विद्यां पूर्वमीमांसां धर्मशास्त्रं ... कर्मकाण्डादिकञ्च सर्वं सङ्ग्राहयामास। अनेन च प्रकारेण त्रिभिर्वत्सरैर्निर्मत्सरमतिरसौ ...विद्यावैशारद्यञ्च च संपादितवान्।

प्राध्यापनम्

...समुपार्जितविद्यो विद्योतमानसुयशोराशिरसावधिकाशिविकाशिनि मारवाड़ीसंस्कृतमहाविद्यालये ...अध्यक्षेण सबहुमानमाहूतो युगनागनिधीन्दुमिते १९८४ वैक्रमेऽब्दे दर्शनशास्त्राध्यापकपदमलम-... पाठशालासम्बन्धेनाऽवाप्तसुस्थितिर्महतोत्साहेनासङ्ख्यान् विद्यार्थिनो नानादर्शनानि विशेषतया न्याय... सुविशदया सरलया पद्धत्या विद्यालये गृहे च पाठयन्नितरामध्यापनकर्ममर्मज्ञो बभूव। इत्थं पाठनचणोऽयं वह्निव्योमाम्बरलोचनमिते २००३ वैक्रमाब्दादसीयाध्यापनप्रणालया प्रभावितैरध्यक्षैः ससम्मानमाहूतो गोयनकामहाविद्यालये प्रातरपराह्णे च संन्यासिसंस्कृतमहाविद्यालये प्राध्यापनमकरोत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेपालगमनम्

ग्रहाभ्रनभोनयनमिते २००९ वैक्रमेऽब्दे च नेपालनरेशानुज्ञया शि[illegible] वाराणसीतः काष्ठमण्डपमनयत् । भट्टराईमहोदये काष्ठमण्डपं गते पण्डि[illegible] सविशेषं राजशास्त्रानुशीलनैकरते सति तदानीं वाराणसेयैर्विद्वद्भिर्विशेष[illegible] ति[illegible] दुरूहग्रन्थानां साधिकारस्याऽध्यापकस्याभावोऽन्वभावि । काष्ठमण्डपं [illegible] राजामिश्रो [illegible] ९दुपप्रा[illegible] मधिष्ठाय तदनु च प्राचार्ये पण्डितराजसोमनाथशर्मणि प्रज्ञाप्रतिष्ठाने [illegible] दमलङ्कृत्य मह[illegible] विद्यालयसञ्चालनं प्राध्यापनञ्चाकरोत् । त्रिभुवनविश्वविद्यालय आचा[illegible] नान्तरञ्च तत्रापि विभागीयप्रमुखो भूत्वा कदाचन च कलासङ्कायप्रमुखोऽपि भूत्वाऽहर्निशं व्यापृत्य [illegible] हेन सर्वे[illegible]पि कार्या[illegible]ति युगपत्समचालयन् ।

गार्हस्थ्यम्

सुरभारतीसमुपासकोऽयं श्रिया समुपेक्षितस्त्वासीदेव, तदुपरि जीवने विभिन्ना दुर्घटना [illegible]पतिताः, अतोऽस्य गार्हस्थ्यजीवनं नितान्तं सङ्कटग्रस्तमासीत् । यतोऽस्य प्रथममुद्व्ढा बालकुमारीनाम्नी पत्नी [illegible]मनुत्पाद्यैव किशोरे वयसि दिवङ्गता । द्वितीया चन्द्रप्रभापि तथैवोपरता । तदनु तृतीयोद्वाहदोषशान्तयेऽर्कवि[illegible]हपूर्वकं तृतीयां पूर्णकुमारीमुदवहत । साप्येकं पुत्ररत्नं रामचन्द्राभिधानमुत्पाद्य पञ्चत्वमापन्ना । तदनन्तरञ्चतुर्थीमु[illegible]नाम्नीं परिणीय तस्यामेकां कन्यकां भवानीनाम्नीमुदपादयत् । तस्यामपि दुर्दैवकवलितायां पञ्च[illegible] पाणिं गृहीत्वा चतुरः पुत्रांश्चतस्त्रः कन्यकाश्चासृजत् । एषा वराकी ललिता वर्षाष्टक[illegible] भर्तुर्मलमूत्रसंमार्जनस्नानभोजनादिसेवाकार्यमतिकठिनमपि यथावत्संपादयन्ती पतिसेव[illegible] प्रदर्शितवती । सांप्रतञ्च चतुरः पुत्रान् द्वे चाविवाहिते सुते संरक्षन्ती दिनानि यापयति [illegible] धारणया धारणया

इत्थं पञ्चमोमायंस्यास्य गार्हस्थ्यजीवनं कियत्सङ्कटाकुलमवर्ततेति सहृदयैर्ज्ञा[illegible] महात्मा सर्वमप्येतद्दुर्दैवविलसितं किञ्चिदप्यविगणय्य सुरभारतीसेवाव्रतमक्षुण्णं पर्यपालय[illegible]

ग्रन्थलेखनसंपादनञ्च

आधुनिकजनानां विद्यमानग्रन्थपर्यालोचनेऽप्यसामर्थ्यं वीक्ष्य नूतननिबन्धनिर्माणस्य[illegible] विचारयन्नप्येष मनीषी पोष्टाचार्यानुसन्धानसमये म० म० गोपीनाथकविराजमहाभाग[illegible] सरन्न्यायनिबन्धेषु सम्बन्धतत्त्वाधायकं स्वतन्त्रं निबन्धं वस्तुतोऽपश्यंस्तदभावपूर्त्यै 'सम्ब[illegible]धानं' नातिविस्तृतमन्वर्थनामानं निबन्धं निबबन्ध । काशिकचौखम्भासंस्कृतपुस्तकालयाध्यक्षानुरोधेन [illegible] वीरमित्रोदयाख्यधर्मशास्त्रीयमहानिबन्धस्य समय-श्राद्ध-भक्ति-शुद्धिप्रकाशन्यायभाष्य-न्यायकुसुमाञ्जलिप्रभृतयोऽनेके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

...सम्पादिताः। अमरभारती-वल्लरी-कल्याणादिपत्रिकासु चास्य सामयिकाः प्र... ...म्बन्धचन्द्रिकाभिधो निबन्धो बहुधान्विष्यापि नेपाले न प्राप्तः। वाराणसेय-...वतोभवनेऽस्य प्रतिलिप्याऽवश्यं भाव्यमिति मे वितर्कः। अप्रकाशितोऽयं

संमानपदव्यः

न्यायमीमांस... ...द्यावारिधि) श्चासौ नागाभ्रनभोलोचनमिते २००८ वैक्रमाब्दे भाद्रशुक्ल-पञ्चम्यां सोम...सरे क... ...सभया न्यायरत्नपदव्या समलमक्रियत। नेपालनरेशेन च श्री ५ महेन्द्रेण प्रसिद्ध-प्रबल-गोरखा-दक्षिणबाहु... ...व्यभष्यत। धर्मरक्षामहामण्डलस्य, वृहदाध्यात्मिकपरिषदो विद्याधर्मप्रचारिणो-नेपालीसमितेः पञ्चाङ्गविवेचक-समितेश्चेत्यादीनां नानासंस्थानां कासाञ्चिदध्यक्ष उपाध्यक्षो वा भूत्वा सम्यक्तया समचालयत्। तासां सम्मानितः सदस्यश्चासीत्। दर्शनालङ्कारपदव्यापि सोऽलङ्कृत आसीदिति च श्रूयते।

रुद्रमहायागोपक्रमः

...द्वाविंशत्युत्तरद्विसहस्रपरिमिते वैक्रमेऽब्दे भाद्रे काष्ठमण्डपनगरस्य नवीनपक्षमध्यवर्तिनि राजकीय-कर्मचा... ...ञ्जीकरणकार्यालये (कम्प्याण्डर किताबखाना) प्रातः सार्धनवादनसमये कार्यालयमुद्घाटयितुं गतेन यामिके... ...कार्यालये प्रसुप्तं सिंहं दृष्ट्वा पार्श्वस्थाः सर्वे सूचिताः। उदन्तमेनमुपश्रुत्य तात्कालिको मण्डलपती... ...तत्राऽऽगतः। तेन दूरसंभाषयन्त्रद्वारा राजप्रासादे सूचनाऽकारि। ततः श्री ५ युवराजो ... ...स्य गोलिकाप्रहारेण सिंहं जघान। सायमेको ज्यौतिषिको वृद्धो महाकार्यिणं पुष्पराज-...न्यथा स्पृरना... ...माकथयत्

> **ग्रामोद्वासनहेतोर्ग्रामे नगरे तु तत्पतिवधाय।**
> **प्रविशन्ति सिंहभल्लुकगोमायुतरक्षुमुख्यास्तु॥**

...शास्त्रे शकुनप्रकरणे समुल्लेखो लभ्यते, अतो घटनयाऽनया राष्ट्रियसङ्कटस्याशङ्का ...कार्यी पुष्पराजोऽपि आशङ्कामेनां श्री५ महाराजाधिराजाय महेन्द्राय न्यवेदयत्। परमास्तिकः ...टनयानया चिन्तितः पण्डितसभां सङ्घटय्यानिष्टनिवृत्यर्थं शास्त्रोपदिष्टं शान्तिकर्मान्वेष्टुं ...राजगुरोः खगेन्द्रराजपाण्डेयस्याध्यक्षतायां पण्डितसभाऽऽकारिता, यत्र शान्तिकर्मोपयुक्त- ... तात्कालिकोऽर्थमन्त्री श्रीहृषीकेशशाहोऽपि प्रगृहीत आसीत्। सभायामस्यां राष्ट्रिय-सङ्कट... ...शास्त्रोपदिष्टेषूपायेषु ब्रह्मयागदेवीयागादिप्रस्तावा अपि पण्डितैः समुपस्थापिताः। पर श्रीपञ्च... ...भट्टराईमहोदयप्रस्तावितो रुद्रमहायागप्रस्तावः पाशुपतक्षेत्रे समुचित इति सर्वैरैकमत्येन पारितः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदनन्तरं तस्मिन्नेव वर्षे मार्गस्य तृतीये सप्ताहे सामग्रीसंघटनपूर्वकं ... श्रीपशुपतिमन्दिरसमीपे रुद्रागारक्षेत्रे श्रीरुद्रमहायागः श्री ५ युवराजहस्ता...

दुर्दैवविलसितम्

प्रायो माससाध्यस्य यागस्याष्टसु दिनेष्ववशिष्टेषु मध्याह्ने पू... ज्योति... भिहतः साकं संस्कृतवाङ्मयस्य समुच्छ्रितध्वजेन मूर्च्छितो निपपात। य... तः। सम... ममुं प्राप्य श्री ५ महाराजाधिराजो युवराजश्च सत्वरं प्राप्तौ, विशिष्टा... ...मिराजमिश्रो ...काश्च नियुक्ताः पशुपतिक्षेत्र एवैकस्यां धर्मशालायामेनं संस्थाप्य चिकित्सासञ्चालिता। दशमे ... ...कलश्चेतनामवाप। प्रायः सार्धमासपर्यन्तं तत्रैवोपचारश्चालितः। पश्चाद्गृहमानीयत। वैद्यानां सम्मेलन... तेषां ...तम्। सार्धशता... वैद्याः समुपस्थिताः। उपचारविषये महान् विचारविमर्शश्चाजनि। परं शतद्वयान्यूना वाताहतमस्य वामाङ्गं चालयितुं कोऽप्युपायो न साफल्यमवाप। इत्थं वर्षमेकं व्यतीतम्। द्वितीये वर्षे पौषे चिकित्सार्थं काश्यां नीतः। काशिकै भारतीयैर्विशिष्टैश्च वैद्यैः संपर्कः स्थापितः। परं रोगो यथापूर्वमेवावस्थितः। मासचतुष्टयं यावत्काश्यां विविधरसायनानि प्रयुज्यापि निराशाः परिजनाः पुनरेनं काष्ठमण्डपमानीतवन्तः। तत्रापि यथा...भवमुप-चारश्चालित एव। परं सर्वोऽपि प्रयत्नो निष्फलो जातः।

दारुणो वज्रपातः

इत्थं प्रायोऽष्टौ वर्षाणि सप्तदशदिनानि च यावदेकाङ्गविकलतया शय्यैकशरणोऽसौ ... मिते २०३० वैक्रमेऽब्दे माघकृष्णप्रतिपदि बुधमासरेऽपराह्णे द्विवादनवेलायां प्रायो मासा... ...द्रराज... कृश आर्याघट्टे पाशुपतक्षेत्रे वारत्रयं श्रीरामनामोच्चार्य सचेतनः सुखेनैव पाञ्चभौति... वपुस्त्वस्य महात्मनोऽनन्तान्तेवासिस्वान्तेषु विराजमानं सुरभारतीसेवायै प्रेरयत्येव। ... सहस्रापरिमितधनेनास्यौर्ध्वदैहिकं कर्म समपद्यत।

अनितरसाधारणं व्यक्तित्वम्

पाठकमहाभागाः यथानुभूतं निवेद्यते, ममाप्यस्ति गुरुवरेभ्य एतेभ्यो वर्षपञ्चदशक... नुभवः। एतेषु हि ह्याऽध्यापनमर्मज्ञता सा नान्यत्र कुत्रापि प्राप्ता। अध्यापनीयं विषयं परिमितैस्त... सार्थैः शब्दैस्तथैते प्रतिपादयन्ति स्म, यथान्तेवसद्भिः प्रतिपादितो विषयस्तत्त्वतः सत्वरमवु... प्रतिपादनसमये छात्रा यदा विषयग्रहणाक्षमास्तन्द्राद्यभिभूता वा प्रतीयन्ते, तदा सत्वरमे... प्रयुक्ताः प्रासङ्गिकाः परिहासकथा अपि ता एवैतेषां श्रीमुखाच्छ्रुता याभिः शिष्यमतिमालिन्य... वादाहवेषु तत्त्वपक्षपातिन्या सुनिश्चितविचारसारया युक्तिधारया विपक्षिपक्षपरितक्षणवैचक्षण्यादतिरिक्तं ग्रन्थग्रन्थिसमुन्मोचनचातुर्यं ग्रन्थाक्षरसंलापनपटुताप्यनितरसाधारणो सविशेषमेतेष्वेव दृष्टा। धिषां तत्त्वपक्ष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

...मेतेषां धिषणायामेव सुसङ्गच्छते। एतर्हि पाठनसमये कोटिप्रकोटिपरम्परया ...समाहितैः क्षणं विचार्य यन्निश्चीयते तत्त्वानुसारी स निर्णयो भवति स्म। ...नुदिनं प्रभाविशेषपूर्णतामासेदुषो वपुषो लघुता कर्मण्यता चाऽवर्णनीयैवासीत्, ...निबन्धन; पाठावरोधोऽन्तेवसद्भिः पूर्वमनुभूतः। न वैते जातुचिदपि कार्यं- ...एतेभ्योऽन्तेवसद्भिर्न केवलं शास्त्रमेवाधीयते स्म, किन्तु सदाचारो विनय, ...तव्यं, क्ष... ...दिरपि। छात्रेषु चापत्यनिर्विशेषस्नेहो नैसर्गिक एवैतेषाम्। त्यागो, गाम्भीर्यं, ...मत्सरता, ...नुसन्धातृता, गुणैकपक्षपातिता, परपरिवादपराङ्मुखताप्रभृतयोऽपि गुणा महाभागानामेतेषाम् ... ...ः। धर्मशास्त्रीयगूढतत्त्वान्वेषणे व्यवस्थाकर्मणि च प्रथमत एव धिषणधिषणायिता ...णतेषाम्, तथा... च म० म० लक्ष्मणशास्त्रिद्रविडमहाभागो विशेषतो धर्मशास्त्रीयविषयव्यवस्थापक- तयाध्ययनावस्थात एव सुस्थैरेतैर्थवर्णाश्रमधर्मस्वराज्यसंस्थायाः संबन्धं स्थापयामास। काशिकसाङ्गवेदविद्या- लयीया गीर्वाणवाग्वर्धिनीसभा च नैकविधनिर्णयनिर्माणधुरन्धराणामेतेषां संबन्धाद्दिष्टचा संवर्धते स्म।

चतुरस्रं वैदुष्यम्

...प्रवराणामेतेषां न्यायवैशेषिकयोः प्रगाढं पाण्डित्यं वेदान्तदर्शनस्य त्रिष्वपि प्रस्थानेषु निर्बाधा ...परं साङ्ख्ययोगयोः पूर्वमीमांसायां बौद्धदर्शने जैनदर्शने धर्मशास्त्रे कर्मकाण्डे तन्त्रशास्त्रे ...त्ये व्याकरणे चैतेषां तलस्पर्शिपाण्डित्यमासीत्। नेपाले महाविद्यालयसञ्चालनावसरे काव्य- ...ान्स्वयमेवैते पाठयन्ति स्म। सिद्धान्तकौमुदी तु व्याकरणस्याजीवनं कण्ठस्था प्रतीयते ...शास्त्रिद्रविडमहाशयो दिनकरीटीकां रामरुद्रीं प्रपूर्य यदा प्रकाशितवान्, तदा तत्र पूरणे ...ादिप्रयोगप्रतारितेनापठितसिद्धान्तकौमुदीकेन श्रीराजेश्वरशास्त्रिणैकस्मिन्प्रसङ्गे स्वजन्य- ...न्धेन दण्डस्य घटकारणतां सङ्घटितां दृष्ट्वा परचक्रीया विद्वांसोऽशुद्धं लिखितमिति राजे- ...शयमुपाहसन्। बाल्ये मातामहेन सुब्रह्मण्यशास्त्रिणा शब्दरूपावलीधातुरूपावल्यादिपाठन- ...ः संस्कृतभाषायां प्रवेशितो राजेश्वरशास्त्री 'मादुपधायाश्च मतोर्वोऽयवादिभ्यः' इति पाणिनिसूत्रा- ...मता' लेखनमात्मीयमनुस्मृत्य पश्चादुपतप्यमानः पित्राज्ञया श्रीपद्मप्रसादभट्टराईमहोदयसकाश- ...चतुष्टयं यावत्समग्रां सिद्धान्तकौमुदीमपठत्। तदनु च प्रतिभाप्रकर्षशाली द्रविडमहोदयो ...ग्रन्थान्स्वयमनुशील्य व्याकरणशास्त्रार्थसभास्वपि सौवं प्रौढं पाण्डित्यं प्रकटयितुमारभत। अस्तु इत्थं स... ...मतिमतां भट्टराईमहोदयानां पाण्डित्यं ग्रहगणितवर्जं निखिलेऽपि संस्कृतवाङ्मये व्याप्तमासीदिति निश्चयेन वक्तुं शक्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिष्यसम्पत्

रात्रिन्दिवमध्यापनव्यसनिभिः पूज्यपादैः पाठितेषु प्रायः समस्तभार... मारूढाः केचन निर्दिश्यन्ते; तत्रोत्कलाभिजनोऽवाप्तसकलन्याय रहस्योऽस्मत्प्रिय... लयस्याध्यापकचरो न्यायाचार्यो मिश्रोपनामा काशीनाथपण्डितो विशिष्टः शि... ज्योति... विद्योतितनेपालराजकीयप्रधानपाठशालो लोकनाथढकालः सम्प्रतं वाल्मीकि... १वेन प्रगृ... मुख्य एव शिष्यो गुरुचरणानाम् । उत्कलराजकीयविद्यालयाध्यक्षो नैकविध... मरराजमिश्रो ... तन्द्रिको व्याख्या-तसिद्धान्तचन्द्रिको न्यायवैशेषिकदर्शनाचार्यंकाव्यव्याकरणतीर्थकवितार्किकचक्रवर्ती... किशोरकरमहोदयः पूज्यपादशिष्यगणनाचक्रवर्त्येव । नेपालमहीमहेन्द्रगुरोर्भोगेन्द्रराजपाण्डेयस्य सभापण्डितः प्राचीनन्यायाचार्यः स्व० दुर्गानाथपाठकश्चिरशिष्य एव । काशिकनेपालीयसंस्कृतमहाविद्यालयाध्यापकचरो वेदान्ताचार्यः प्राचीनन्यायवैशे-षिकाभ्यसनव्यसनी ब्रह्माद्वैतरसास्वादसमुत्सारितावसादः केशवप्रसादः (छविलालवांस्तोला) प्रधानशिष्यो गुरुवराणाम् । लक्ष्मणपुरविश्वविद्यालयीयधर्मेन्द्रनाथशास्त्री, येन प्राचीनन्याये बौद्धानां स्थानमित्येतं विषयम-धिकृत्य गुरुवर्यसमक्षेऽनुसंधितं, गुरुचरणानां प्रतिभया ग्रन्थाक्षरसंलापनचातुर्येण ग्रन्थग्रन्थिविभेदनपद्धत्या ग्रन्थ-गूढार्थाकलनशक्त्या ग्रन्थाभ्यासेन च प्रभावितेन 'आज' नाम्नि वृत्तपत्रे बृहल्लेखोऽपि प्रकाशितः, सोऽप्यत्र शिष्य-गणनाप्रसङ्गे नोपेक्षणीयः । एवं न्यायाचार्येषु वङ्गाभिजनो गोपालभट्टाचार्यः, उत्कलाभिजनो... मैसूराभिजनो वेदबन्धुशास्त्री, मिथिलाभिजनो रुद्रधरझाः शोभाकान्तझाश्च, गुर्जराभि... विश्वविद्यालयप्राध्यापकचरः सुरेन्द्रनाथद्विवेदी, गढवालाभिजनो मनसारामश्चैते सर्वे... तथा नेपालाभिजनेषु वेदान्ताचार्यो बालमुकुन्द रेग्मी, साम्प्रतं वाल्मीकिविद्यापीठ उपप्र... धारण... न्यायाचार्यो मुकुन्दनाथभट्टराई, वाल्मीकिविद्यापीठप्रमुखो न्यायाचार्यः शिवहरिमरहट्टा, वा... पाठा... प्राध्यापकौ न्यायाचार्यौ दीर्घराजघिमिरेचेतोनाथाचार्यौ, प्रशासनकार्यरता न्यायाचार्या निर... दवाड़ी यज्ञप्रसादथपलियालादयो वाल्मीकिविद्यापीठस्यैव प्राध्यापको न्यायाचार्यो विद्यानाथ... विश्वविद्यालये संस्कृतविभागाध्यक्षो हरिदेवमिश्रः, वाल्मीकिविद्यापीठस्यैवाध्यापकचरः सांप्रतं क... रतो न्यायवेदान्ताचार्यो गिरिधारिभट्टराईः येन रुग्णशय्यास्थितेभ्यो गुरुचरणेभ्योऽधीतम्, ... शास्त्रिणो विश्वनाथर्षभदेवकृष्णप्रसादप्रभृतयोऽनेके नेपालीया विद्वांसः श्रीगुरुचरणानां यशो वि...

प्रसङ्गेऽस्मिन्पूज्यपादवियोगानलसंतप्तहृदयस्यानवधानतया विस्मृत्या वा येषां नामोल्लेखो विधातुं न पारितं तेषां सर्वेषामपि सतीर्थ्यानां समक्षे कृताञ्जलिः क्षमां याचे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

...एतेषां मनीषिणां गुणगणगणना कथं वाल्पगिरा कर्तुं शक्या ? दिङ्मात्रं
...अवसरे दिष्टे चानुकूले व्यासतोऽभ्यसिष्यामश्चरितमेतेषां महात्मनामि-

अथ जनन-मरण...
जनकनन्दि... जानकी ... ःस्पृहताया निकषः प्रज्ञाप्रकर्षस्य ॥
...कृपाब्धेः पद्मप्रसादो गुरुर्जयति ॥
...मण्डले...
मीमांस...

...वस्तु गोविन्दः ! तुभ्यमेव समर्पये

सङ्कलयिता
प० गङ्गाधरशास्त्रिपराजुलिः
प्राध्यापकः
दाङस्थस्नाकोत्तरकेन्द्रीयविद्यापीठस्य
(नेपालः)



CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रथमः पञ्चव्यक्तितत्वप्रकाशः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ओ३म्

[illegible]प्रसादभट्टराईमहोदया गुरवो विजयन्तेतमाम्

—डा० श्रीराम-पाण्डेयः

मीमांसे [illegible] महिमवती मोहमायान्विता न
[illegible]लोकालोकैककर्त्री निगमवनभुवस्तत्त्वसौन्दर्यसिक्ता ।
मूर्त्ता शास्त्रैकभित्तिर्हतदुरितदला शीतरश्मेः सुधेव
वाणी गीर्वाणवाणी बुधवनकमला निर्मला लोकलीला ॥ १ ॥

मान्यानां मोहमैत्री हतमतिकलुषा निर्भया भूमिभूतिः
शास्त्रार्थाम्भोधिधन्या मततिविमला भूकला वाक्कला का ।
वादानां मानदानां वरवचनजुषां जन्मदात्री दिशैका
त्यक्त्वा नः स्वर्गता सा विबुधवनचरी राजते तत्र रम्या ॥ २ ॥

[illegible]रौ लोकमोहे पतितवरधियश्चिन्वते पापराशिं
[illegible] दिग्द्रष्ट्री भव्यभूतिः सुरवरसदने भासुरा भव्यकीर्त्तिः ।
[illegible]ङ्नवानां विहरति सरणिर्देवलोकेऽधुना नः
शिष्यान् हित्वा दया सा विबुधवरवनं भासमाना स्वधाम्ना ॥ ३ ॥

[illegible]तमाभा वरवचनभुवः पाणिनेः कल्पनौका
गङ्गेशाभा द्वितीयाऽभिनवनयकुले गोकुले दीधितीशा ।
[illegible]धौ शेषमूर्त्तिर्दलयति दुरितं वाचिकं कम्पजालं
वेदान्ते शङ्कराङ्का कलयति कुशलां शेमुषीं चिन्मयीं गाम् ॥ ४ ॥

[illegible]यासैककान्तिः कनककुलकला चिद्घनानन्दमूर्त्तिः
सांख्ये सा कापिलाभा विहरति गगने तत्त्वसङ्घं दधाना ।
[illegible]गादीशा विशेषे वरनयकुलदा स्फीतवेशा सुरेशा
शिष्टानां मानभूमिर्जयति जयति सा शास्त्रसङ्घाश्रिताशा ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ख्याता विद्वत्समाजे नयमतिललिता शान्तिदा शान्तिमूर्त्ति-
वाणी शास्त्रे गभीरा बटुततिदमने भास्वती
कान्तिः शास्त्राम्बुधीनां हतपटुतिमिरा कल्पनैका हिमांशो-
स्तिग्मांशोश्चण्डरूपा भवभयदलने चेतना स
विद्यादानेऽद्वितीया गुरुकुलसदने भ्राजमाना प्रभैका
लुप्ता याता द्यु भूमिं सुरगुरुनगरीं द्योतयन्ती ज्योति
तीर्त्वा संसारसिन्धुं वरविबुधवनं भासयन्ती दिवं सा
पीयूषाङ्घ्रेसु रारेस्त्रिभुवनजयिनी कल्पतां श्रेय ॥ ७ ॥

काश्यामासंस्तदानीं बुधगुरुगुरवः ख्यातधामान एके
तेषां मध्ये कदम्बे गुरुकुलजयिनी शेमुषीसूक्ष्ममूर्त्तिः ।
स्फूर्त्तिः शास्त्रैकसूक्तिः सुरवरवचसां भव्यभक्तिर्दयार्द्रा
कूजन्ती शास्त्रकुञ्जे सुरमधुरगिरा सा गुरोः कम्रकान्तिः ॥ ८ ॥

पट्वी मृद्वी तदानीं बुधकुलकमले तादृशी नान्यमूर्त्ति-
र्दृष्टा भिक्षोर्नगर्या तिमिरनिकरहृद् गर्वकूलैककूला ।
सन्त्यन्याः पण्डितानां गृहकलहरता व्यर्थगर्वा निराशा
यासां पार्श्वे न शान्तिः कटुकपटरता मोहजालान्वितास्ताः ॥

सौम्यं रूपं यदीयं मधुसमवचनं भासमानं धरित्रीं
स्फीतं शास्त्रार्थनीतं नवनयललितं मोहशोकापनोद
कोपे मौनं नितान्तं सुरगवि गलितं नान्यथाभाररूपं
वन्दे मोहैकवज्रं गुरुवरवचनं दिव्यनेपालरत्न

पद्मप्रसादगुरुबोधविशालभूतिं
ध्यात्वा तदीयसरणिं विमलां विशोकाम् ।
वन्द्यां मनोमलहरां भुवनैककीर्त्तिं
रामो नमामि चरणौ सुखदौ शरण्यौ ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पद्मप्रसादस्मृतिः

—योगी नरहरिनाथः

•

हिमाल…कण्ठम्, हिन्दुराष्ट्रे विदेहभूमौ जनकाञ्चले च ।
…ण्डले शालिनि रामचापे[1] सालस्थले सामलि-सञ्ज्ञितेऽस्मिन् ॥ १ ॥

वशिष्ठगोत्रे भटराइवंशे श्रीकृष्णमाया-शुभ-कुक्षि-रत्नम् ।
श्री…नमंथादतुल-प्रभावः पद्मप्रसादोऽभवदुग्रतेजाः ॥ २ ॥

शाके गजेन्दुद्विपभूमितेऽब्दे वैशाख-मासे धवले दले च ।
द्वादश्युपेते भृगुवासरेऽसौ ऋतौ वसन्ते हसतीह पद्मे ॥ ३ ॥

श्रीस्वर्णकोशी-युत-ताम्रकोशी-प्रकाश-कर्ता किल कौशिकोऽसौ ।
सावित्र-मन्त्रं सवितुः प्रसादादत्रैव लेभे सुरदुर्लभं तम् ॥ ४ ॥

…प्रसादः पदसम्पदाढ्यः पद्मप्रसादः पदकृत्यवेदी ।
पद्मावतीपाद-पयोज-सेवी पद्माप्रसादोज्झित एव तस्थौ ॥ ५ ॥

…मय-बाधितोऽसौ पित्रा समं कान्तिपुरं[2] समेतः ।
…त्रिधारा[3]-स्थित-पाठशालाध्यायी चिरं छात्रगणैः सहास्थात् ॥ ६ ॥

…गुरुभ्यो विद्या अधीत्यापि न तृप्तिमागात् ।
…मगादुज्ज्वलवक्त्रपद्मः पद्मप्रसादोऽखिल-दर्शनेप्सुः ॥ ७ ॥

… पशुपत्यभिन्नं पश्यन्नसाधारणधीषणो वित् ।
…गङ्गावगाहो निगमागमज्ञः सत्सङ्गमङ्गीकृतवानजस्रम् ॥ ८ ॥

…-गीता-वचन-प्रमाणः प्रमाण-पारीण-पदं प्रपेदे ।
अनेक-विद्वज्जन-सेवनेन स्वयं स विद्वानपि विद्वदास्थः ॥ ९ ॥

…सी परकाशिवासि-बुधौघ-मध्येऽखिलशास्त्रबोधः ।
स्वाध्यायशीलः सुतरां सुशीलो विद्यार्थि-पर्षत्सु च लब्धकीर्तिः ॥ १० ॥

---

१. "रामे छाप" इत्यपभ्रंशः । २. काष्ठमण्डपनगरम् (काठमाण्डू) ३ तीनधारा संस्कृतपाठशाला ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वादे विवादे सदनल्पजल्पे मध्यस्थतामाप सदैव पद्मः । [illegible]

श्रीनागपञ्चम्यवधानधीरैः शास्त्रार्थसंसत्सु [illegible]

न्यायेन वैशेषिक-दर्शनेन सांख्येन योगेन पदेन पद्मः [illegible]

मीमांसया काव्यगिरा चिराय वेदान्तवाचोपचय[illegible]

स धर्मशास्त्रेण च कर्मकाण्डैः पुराणवाण्यापि पुराविदाभात् । [illegible]

अन्तेवसन्तः शतशः सहस्रमाचार्य-शास्त्रि-प्रमुखा लसन्ति [illegible] १३ ॥

वेदाङ्गदर्शन-विवाद-विवेकशीले पद्मे स्थिते स्थितिविदोऽखिल-कोविदास्ते ।

सानन्दमूर्जितगिरोऽखिल-नास्तिकानामुच्चाटनेषु पटवो वटवोऽपि दृष्टाः ॥ १४ ॥

अष्टासु कृष्टतपसा प्रहरेषु पद्मः स्वाध्यापने निपुणधीर्नियतःस्वपाकः ।

शुद्धाशयो मनुमतेऽनुमते गुरूणामाचारपूत इति सर्वजनैः प्रतीतः ॥ १५ ॥

स्वर्गङ्गते त्रिभुवने त्रि.[1] वि. पर्षदि स्वं पद्मं निमन्त्रयति भूभुजि विद्वदास्ये ।

काशीनिवासि-जनमानसमादरेण स्वेनैव साकमुपनीय समागतोऽसौ ॥ १६ ॥

आदौ मया सह ततः स परैः सभायामध्यापने च विदुषां परितोषणे च ।

काश्यां दिवानिशमिवात्र कृती कृतज्ञो विज्ञापयन्नपि च राज्ञि मनोज्ञयुक्ति[illegible] १७ ॥

निर्भीक एकमत एव विवादिवृन्दे सर्वत्र जित्वर उदित्वर उत्तरज्ञः । [illegible]

[2]गोरक्षदक्षिणभुजो निजधर्मनिष्ठः प्रेष्ठः सतां मतिमतां प्रथितः [illegible]

गोभक्ति-मुक्ति-पद-युक्ति-विदुक्ति-शक्तो व्यक्तीकृताखिलनिरुक्तिरमन्दसूक्ति[illegible]

निश्शुल्क-शिक्षण-नियोजित-शेष-कालो बालेषु बाल इव वृद्धजन[illegible]

१. त्रिभुवनविश्वविद्यालये (काठमाण्डूस्थे)।

२. "गोरखादक्षिणबाहु"रिति मानपदवी नेपालराज्ञा दीयमाना प्रसिद्धा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिवेशी पद्मः

—भरतराजशर्मा मन्थलीयः

अथ जनन-म[illegible]ण-जरा[illegible]व प्रशोभं
[illegible] ग्रिवे भासुरो यः ।
[illegible] जन्मनाऽभूषयद्द्रिकोणं
सुव[illegible] राष्ट्रमलंचकार ॥ १ ॥

यस्याः [1]स्रवन्त्याः सलिलं पिबामि
तस्या हि मूले गृहमस्ति तस्य ।
परन्तु तद्ग्रामगृहस्य लक्ष्मीः
स एव वैकुण्ठमहालये यः ॥ २ ॥

सत्त्वेन वृत्तेन विकासितान्त-
र्वित्तेन चित्तं विजितं न तस्य ।
नवे वयस्यप्यभिलाषिणीभि-
र्विलासिनीभिर्न मनो हृतं च ॥ ३ ॥

परोपकारार्पितजीवितत्वात्
स्वजीवनं शान्तिवनं व्यधात् सः ।
यत्र प्रफुल्लं कुसुमं व्यलोकि
लोकेन तस्यैव मुखं प्रसन्नम् ॥ ४ ॥

[illegible]तस्य तनौ मलो नो
[illegible]हरेश्चिन्तनतोऽमलं हि ।
[illegible]यगामी मननीयवाणि-
[illegible]यिकानां धुरि नायकोऽभूत् ॥ ५ ॥

आचारपूतः सुविचारपूतः
सुकर्मपूतश्च स भूसुरोऽभूत् ।
यशोऽम्बुधेः कीर्तिसरित्पतेश्च
निर्बाधधाराद्वयमार[2] तस्य ॥ ६ ॥

---

१. स्रवन्ती निम्नगापगे'त्यमरः । २. ऋ गतौ लिट् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पद्मा न पद्माय ददौ प्रसादं
तत्पीठपद्मं तु ददौ स्वरागम् ।
गुणैः प्रसादीकृतसौरभैः स
स्थाने हृदब्जस्य बुधैर्न्यधायि ॥ ७ ॥

'नेपालभूमिस्तनयं न तेन्का
समं प्रसूयेत चिराय चान्यम्' ।
इत्येव तर्कैस्तरलीकृतं नु
देशे विदेशे बुधमानसार्णः[1] ॥ ८ ॥

यस्याऽन्तरात्माऽऽस हरेर्निवासः
शिक्षाप्रदानं हि सुकर्म यस्य ।
तस्याऽपि साधोर्जरसि प्रदग्धा
तनू रुजाऽग्नेः शिखयेव वल्ली ॥ ९ ॥

पूर्वार्जिते कर्मणि लोकचक्रं
प्रवर्तते, लङ्घयितुं न शक्यम् ।
अनेकजन्माङ्कितपापपङ्कं
प्रक्षालयामास शनैः शनैः सः ॥ १० ॥

भुक्त्वाऽघमाद्यं स नु जन्मनीह
पुण्यानि भुङ्क्ते दिवि दिव्यरूपः ।
तन्नामवत् तद्वपुरेव पूतं
पूतानि कर्माण्यखिलानि चाऽऽसन् ॥ ११ ॥

तच्चक्रिणश्चक्रमिव प्रदीप्तं
स्मरामि तस्याऽऽ[2]मरमास्यचक्रम् ।
यच्चिन्तनाद्वृद्धिमियात् सुबुद्धि-
हृदन्तरालान्निरियात् कुबुद्धिः ॥ १२ ॥

---

१. 'अम्भोर्णस्तोय ...... 'इत्यमरः । २. अमरस्येदमामरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुरुपादानां स्मृतयः

—पं० श्रीरुद्रधर झाः

अथ जनन-मरण-जरा-व्याधि-दुःख-दोषमये साक्षात्परिदृश्यमानेऽस्मिन् विश्वस्मिन् जगज्जननी-जनकनन्दिनी-जानकी [illegible] तन-भूमिभवन-भाग्य-भूत-निरतिशय-महत्त्वास्पदतया, मानव-मूल-मनु-मुनिसम्मत-[illegible]-नियामक-कृष्णसार-मृग-चरण-स्थानतया, महामनीषि-मुनि-महर्षि-ब्रह्मर्षि-राजर्षि-ब्रह्मज्ञानि-हंस-परम-[illegible] वितततया, [illegible] सिद्धशिरोमणि-कपिल-महर्षिप्रवरपतञ्जलि-योगियाज्ञवल्क्य-कणादगौतम-जैमिनि-व्यासादि-[illegible] तनिवासदेशतया, निरन्तर-ब्रह्मवादपरायण-समिति-सम्मान्य-वदान्यवर-ब्रह्मज्ञानि-मौलि-मणिरत्न-विदेह-[illegible] राज्यतया, मण्डन-वाचस्पत्युदयन-शङ्कर-गङ्गेश-पक्षधरादिविद्वद्रत्नाविर्भावकतया, सकलभक्त-शि[illegible] राजप्रधानमन्त्रि-विद्यापतिसंगीततया च महामहीमण्डल-मस्तकायमान-मिथिला-मण्डनमणिर्महा-महीयान् नेपाल (नयपाल) देशो विराजतेतमाम् । आबालगोपालं प्रसिद्धतममदः सर्वदा स्वतन्त्रं हिन्दूराष्ट्रं को न जानाति शिक्षितान्यतमतामावहन् मनुष्यत्वेन मन्यमानो बहुबुधैः ।

तत्रैव (अधिनेपालं) कस्माचिद् ब्रह्मर्षेः कस्याञ्चित्पतिव्रतायामाविर्भावमवाप्य जगत्पालक-विष्णुपाद-पद्मविनिःसृताया उत्तरवाहिन्या निखिलपापसन्तापविनाशिन्या भागीरथ्यास्तटे विराजमानायां 'ज्ञानमिच्छेत्तु शङ्करादि'त्यादिवचनचयसूचितज्ञानदानाध्यक्षतामावहता विश्वनाथेन सनाथीभूतायां सकलानवद्यविद्याराज-धान्यामन्ताराष्ट्रियख्यातिमावहन्त्यां वाराणस्यपरनामधेयायां काश्यां सम्राजमाने राजकीयसंस्कृत-महाविद्यालये विश्वविश्रुतनैयायिकशिरोमणेर्महामहोपाध्याय-वामाचरणभट्टाचार्याद् यथाविधि न्याय-वैशेषिकादीनि दर्शन-शास्त्राणि समधीत्य सर्वतन्त्रस्वतन्त्रा अप्रतिमप्रतिभा-विभासितवैदुष्याः समस्तसंसारप्रसिद्धतार्किकशिरोमणयः न्याय-वैशेषिक[illegible] शास्त्रप्रवर्त्तकगौतम-कणादकल्पाः सतत-स्मित-मधुरदर्शन-वदना गूढतत्त्वविवेचनगम्भीर-[illegible]न्तःकरणा औरससुतनिर्विशेषस्नेहमानितशिष्यसमुदाया विलक्षणविचक्षणाः प्रातःप्रार्थनीय-[illegible] प्रसादभट्टराईमहोदया मारवाडी-गोयनका-संस्कृतमहाविद्यालययोः क्रमशो विद्यार्थि-[illegible] परितोषयन्तश्चासन् । येषां सहपाठिनः पण्डितराज-राजेश्वरशास्त्रि-न्यायाचार्य-वामाचरण-[illegible] देवदत्तमिश्रा बभूवुः । तेषामन्तेवासिप्रमुखेषु रामचन्द्रडोंगरे-धर्मेन्द्रनाथशास्त्रि-गङ्गाधर-[illegible] रायणझा-काशीनाथझा-शोभाकान्तझा-राजेन्द्रचौधरी-ताराकान्तझा-हरिदेवमिश्रप्रभृति-[illegible] वहन्नहमप्यासम् ।

[illegible] तगुरुवरान् श्रीभट्टराईमहानुभावान् प्रति काशीस्थेन केनचिद् विद्वद्वरेण विहितः [illegible] म्मतेषु सप्तस्वेव द्रव्यगुणकर्मादिपदार्थेषु जागतिकः सकलः पदार्थसार्थोऽन्तर्भवति, तदा [illegible] सप्तैव द्रव्यगुणकर्मादिपदार्थाः कुतो न स्वीकृताः ! कथञ्च तेन स्वतन्त्ररूपेण प्रमाण-[illegible] पदार्थाः प्रतिपादिताः, येषामभ्युपगमे महागौरवमापतति ?'

[illegible] श्रुत्वा सहजस्मितसमुद्भासिताननैर्दर्शनकाननपञ्चाननैः प्रकृतगुरुवरैस्तदुत्तरतया प्रत्यपादि–[illegible] पदार्थप्रतिपादनपरायणेन कणादेन जागतिकनिखिलपदार्थान् संक्षिप्य वर्गीकृतेषु सप्तस्वेव [illegible] अन्तर्भाविताः । गौतमेन तु मोक्षाधिगम-साधनीभूतज्ञानविषयतत्त्वाश्रयमात्रपदार्थनिर्वचन-पदा[illegible] (निःश्रेयसप्राप्तिकारणीभूतज्ञानविषयतत्त्वाधाराः) एव केचिद्वर्गीकृताः केचिच्च व्यष्टिरूपाः परायण[illegible] नामभिः पार्थक्यमाप्ताः षोडशसंख्यकाः प्रतिपादिताः । अत एव (गौतमेन मुक्त्याप्तिहेतुज्ञान-पदार्थाः [illegible] विषयतत्त्वाधिकरणमात्रपदार्थनिर्वचनादेव) सर्वसाधारणनिरन्तरव्यवहारविषययोरपि दिक्कालयोर्गौतमोक्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षोडशपदार्थेष्वनन्तर्भावेण सूचितात् पदार्थनिर्वचने कणादीय-गौतमीय-प्रक्रिययो... ...ात् सकलान्त... विस्मयाधायिनी परिस्थितिः समापतति— गौतमोक्तषोडशपदार्थेषु कणादोक्तसप्तपदार्थाने...:, कणादोक्तस... पदार्थेषु च गौतमोक्तषोडशपदार्थान्तर्भाव' इति।

पुनरेकदा प्रकृतगुरुवरान् प्रति वाराणसेयेन केनचिद् बुधद्वयेन प्र... ...—"ईश्वरः प्रमाणं ... वा ? आद्य (ईश्वरस्य प्रमाणत्वस्वीकारे) प्रमाणानां चतुष्ट्वव्याघात आपद्येत। द्वितीये (ईश्वरस्य प्रमाण... त्वानङ्गीकारे) ईश्वरोच्चरितस्य वेदस्य प्रामाण्यानुपपत्तिः प्रसज्येत।" इति।

उक्तं प्रश्नं श्रुत्वा सर्वथा युक्तं प्रथमं पक्षं समाश्रित्य प्रकृतगुरुवराः समाधितवन्तः—"ईश्वरः प्र... अत एव "तत्प्रामाण्यमाप्तप्रामाण्यान्मन्त्रायुर्वेदप्रामाण्यवत्" इति गौतमोक्तं सूत्रं संगच्छ... नन्... प्रमाणानां चतुष्ट्वव्याघातः प्रसज्येतेति चेन्न, 'करणाधिकरणयोश्चे'ति पाणिनीयसूत्रबलेन करणे... अर्थे ल्युट् प्रत्ययो भवति, एवञ्च 'प्रत्यक्षानुमानशब्दाः प्रमाणानि' इति गौतमोक्तसूत्रतो यत्र प्रत्यक्षा... चतुष्ट्वं सिध्यति, तत्रत्ये प्रमाणशब्दे 'प्रमीयतेऽनेने'ति व्युत्पत्तिसिद्धे करणेऽर्थे ल्युट्प्रत्ययो ज... ...च 'ईश्वरः प्रमाणम्' इति सर्वैरीश्वरवादिभिरनुमतमस्ति, तत्रत्ये प्रमाणशब्दे 'प्रमाऽस्त्यत्रे'ति व्युत्पत्तिनिष्पन्ने अधिकरणेऽर्थे ल्युट्प्रत्ययो भवति। एवञ्च करणार्थकल्युट्प्रत्ययनिष्पन्नेनैव प्रमाणशब्देन यानि प्रत्यक्षानु-मानोपमानशब्दाख्यानि चत्वारि प्रमाणानि प्रतीयन्ते व्यवह्रियन्ते च, तेषां प्रमाणानां चतुष्ट्वस्योपपत्तौ न किमपि बाधकं भवति, यस्माद् ईश्वरे अधिकरणार्थकल्युट्प्रत्ययनिष्पन्नस्यैव प्रमाणशब्दस्य प्रयोग आगम-निगमप्रामाण्यवादिभिर्विद्वद्भिरनुमतो विराजते। अत एव—

'मितिः सम्यक्परिच्छित्तिस्तद्वत्ता च प्रमातृता।
तदयोगव्यवच्छेदः प्रामाण्यं गौतमे मते॥

इति भगवच्चतुर्विंशत्यवतारान्तर्गत-सर्वतन्त्रस्वतन्त्र-श्रीमदुदयनाचार्य-विरचित-न्यायकुसुमाञ्जलि-चतुर्थ-स्तबकस्थिताकारिकाऽपि संगच्छते।

न चोक्तायां 'मितिः सम्यगि'त्यादिकारिकायां 'तदयोगव्यवच्छेद' इत्यस्य स्थाने ... ...रिनि...त्ति-रि'त्येव कुतो नोक्तमिति वाच्यम्, यथा रूप्यकवत्पुरुषमुद्दिश्य केनचित् कथितस्य 'अ... ...रूप्यका सन्ती'ति वाक्यस्यार्थतः केनचित् प्रतिपादितस्य 'अस्य पार्श्वेरूप्यकाणामभावो नास्ती'ति वा... ...दि... मनुभूयते सकलैः, यतो रूप्यकाणां न्यूनतायामपि प्रथमं वाक्यं प्रयोक्तुं शक्यम्, द्वितीय... मतायामेव व्यवहर्तुमर्हम्। तथा 'तद्योगपरिनिष्पत्तिरि'ति वाक्यस्यार्थतः 'तदयोगव्यव... परमवैलक्षण्यानुभवेन 'तद्योगपरिनिष्पत्तिरि'त्यस्यापेक्षया 'तदयोगव्यवच्छेद' इत्यस्यैव ... अत एव 'न्याय्य'मिति शब्दनिष्पादकव्युत्पत्तेः 'न्यायेन युक्तमि'ति स्वरूपतां विहाय 'न्याय... ताया एव परिगृहीतत्वं सङ्गच्छते, यतोऽल्पेनैकेनापि वा न्यायेन युक्ततायामपि 'न्याये... शक्यते, 'न्यायादनपेतमि'ति तु सर्वैन्यायैर्युक्ततायामेवैकेनापि न्यायेनापरित्यक्ततायामेव ... किञ्चेश्वरीयप्रमाया नित्यतया तदीयप्रमातृत्व-प्रामाण्ययोरपि नित्यताऽनिवार्या, सा च नित्या... तदयोगव्यवच्छेदस्वरूपप्रामाण्यस्वीकार एवोपपद्यते, न तु तद्योगपरिनिष्पत्तिस्वरूपप्रामाण्य... जन्यभावात्मकक्रियात्वेन नित्यत्वासम्भवात्। एवं सर्वं समञ्जसम्।

किं बहुना—प्रकृतगुरुवराणां श्रीभट्टराईमहाभागानाम्पर्वतीयगुरुजीति-प्रख्यातानाम... ...नां शास्त्रविवेचनघटनानाम्प्रवाह एव सन्ततं वहन्नासीदिति स्मारं स्मारं पुलकितवपुस्तेषां पादपङ्क... ...णामान् समर्पयन् विरमामीति शिवम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुरुपादानां संस्मरणम्

—डा० डिल्लीराम तिमसिनाः

संस्कृतं खलु [1]नेपालीवाङ्मयस्य स्रोतः। स्पन्दनभूतोऽस्य प्रभावो जनमानसेऽनुलग्नः। स्वनामधन्या ...शीयाः संस्कृतस्य विद्वांसः [2]शिवशर्मसूरि-नीलदेव[1]शास्त्रिपन्त–पण्डितराजरङ्गनाथपौडेल-राजगुरु-...ण्डेय - विद्वच्छिरोमणिकुलचन्द्रगौतम - पण्डितराजसोमनाथशर्मसिग्देल - न्यायावतारपद्मप्रसादभट्टराई-...लस्य गौरवसंवर्धकाः। येषु दार्शनिकप्रवरा गुरवो भट्टराईमहोदयाः पण्डितसमाजेऽग्रगण्या इ... विवादः।

भट्टराईमहाभागाः १९५३ मितविक्रमाब्दस्य वैशाखशुक्लद्वादश्यां नेपालाधिराज्यस्य पूर्वाञ्चलस्थं, 'रामेछाप'मण्डलान्तर्गतं 'सालु'नामकं ग्रामं जन्मनाऽलंचक्रुः।

तेषां शिक्षा काष्ठमण्डपस्थ-नेपालराजकीय-संस्कृतप्रधानपाठशालायां प्रारब्धा। काशीं गत्वा महामहोपाध्याय–वामाचरणभट्टाचार्यसन्निधौ न्यायशास्त्रमधीत्य तैः १९२४ मितेशवीयवत्सरे न्यायाचार्य-परीक्षा प्रथमश्रेण्यां समुत्तीर्णा, लक्ष्मणशास्त्रिसन्निधौ विविधं शास्त्रमधीतम्, महामहोपाध्यायगोपीनाथकवि-राजसकाशादपि अनुसन्धानपद्धतिः परिगृहीतेति ते शास्त्रनिष्णाताः संजाताः।

तेषां सर्वशास्त्रगं गहनं वैदुष्यं व्यापकं वाग्वैदग्ध्यं च श्रावं श्रावं न केवलं छात्रा अपितु शास्त्रमण्डिताः पण्डिता अ... इत्यद्याप्यनुभूयते। संस्कृतवाङ्मयस्य विविधशाखासु गुरुवराः पारंगता इति सर्वेषामपि ...षां ... न केवलं नेपालदेशे अपितु भारतस्य बहुषु प्रान्तेषु च गुरुवराणामेषां शिष्य-प्रशिष्य-...लितेति नात्र सन्देहलेशः। पण्डितप्रवरा भट्टराईमहाभागा न्यायावतारा इति काश्याः ...घोषोऽद्यापि श्रूयते।

...कः स्वभावो व्यवहारे स्पष्ट-वक्तृता ऊर्जस्वि स्वरूपं शास्त्रगभीरं पाण्डित्यं तपोमयं जीवनं ...म्। विद्यादानमेव तेषां जीवनस्य लक्ष्यं परिलक्षितमिति तु सम्यक्।

...नामेषां सुनाम प्रथितम्। शताब्द्याश्चतुर्थांशस्तु कालः काशीस्थे 'गोयनका-संस्कृत-महा-...संस्कृतमहाविद्यालये' साङ्गवेद-विद्यालये च शास्त्रानुशीलनेन प्राध्यापनेन च यापितः। ...देशीया भारतीयाश्च विद्याव्यसनशीला विद्वांसो जिज्ञासवो विद्यार्थिनश्च सम्यग् जानन्ति

...क्रमे २००७ तमवत्सरे नेपाले प्रजातन्त्रस्य प्रकाशः प्रविष्टस्तदा नेपालसर्वकारेण त...ीकृत्य चैतत् २००८ तमविक्रमाब्दे ते नेपालराजधानीं गताः। एभिः काष्ठमण्डपं गत्वा नेपाल-

१. इदमुपलक्षणम्। २. वासुदेवरसानन्दकृत्।

३. म. म. सुब्रह्मण्यं शास्त्रि-म. म. चित्रधरमिश्र-सीतारामशास्त्रिद्राविणादिविदुषामध्यापकः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

राजकीयसंस्कृतमहाविद्यालये प्रधानाचार्यरूपेणानेकवर्षं यावद् दार्शनिकतत्त्वान [illegible] कारं [illegible] शास्त्रगौरवं च वर्धितम् । 'गोरखादक्षिणबाहु'प्रभृतिपदैर्विभूषितास्ते राजप्रासादेऽपि [illegible] गात् सकल [illegible] पुपूजिताश्चासन् । [illegible] :, कणाः

सत्यमेवैतत् 'शरीरं व्याधिमन्दिरम्' इति । नियमनिष्ठादिसम्पन्ना [illegible] कालपर्यन्तं रुग्णाः संजाताः । रोगाक्रान्ता अपि स्वकीयं दुःखं विस्मृत्य पिधाय च पीडां सदैवाध्य [illegible] संलग्ना आसन् । "नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि"–इति शास्त्रोक्तिः सम्यग्घटतेऽत्र यदस्माकं गुरुपादा दुःखिता आसन् जीवनस्यान्तिमे भागे । तेषां दुःखेन दुःखिता वयम् ।

सर्वदैवाध्यापने तत्परा गुरुवरा लेखने न तथा प्रवृत्ताः । अत एव तेषामधिकाः कृतयो नोपल [illegible] एतत्तु विदितमेव विदुषां यत् प्राचीना खलु शिक्षापद्धतिः शास्त्रमर्यादायामवलम्बिता श्रुतिपरम्परा [illegible] भवतीति । तदानीं चिन्तनस्याधिकं महत्त्वमासीत् । शास्त्रीयग्रन्थेषु विश्वासाधिक्येन तत् उत्कृष्टा [illegible] न शक्यन्त इति मत्वाऽपि लेखने न प्रवृत्ता बहवः प्राचीनाः पण्डिताः । गुरुपादानां सम्बन्धेऽपि नापवा [illegible] प्रचलनम् । तेषां सम्पादने प्रकाशिता 'वीरमित्रोदय''न्यायकुसुमाञ्जलि'प्रभृतयो टिप्पणीसहिता ग्रन्थाः [illegible] दर्शनादिविषये विविधा लेखादयश्चोल्लेखनीयाः सन्ति ।

२०३० तमविक्रमाब्दस्य माघकृष्णप्रतिपदि पाशुपतक्षेत्रे गुरुपादानामिहलीला समाप्ता, पाञ्चभौतिकं शरीरञ्च वाग्वत्यां विसर्जितम् ।

यदाकदाचिदहमधुनाऽपि वाराणस्याः पञ्चगङ्गाघट्टस्थं दुग्धविनायकं गच्छन् दीर्घसोपानावलियुतं 'के' २३।११२ संख्योट्टङ्कितं गृहं दृष्ट्वा नैयायिकमूर्धन्यान् गुरुपादान् स्मारं स्मारं निरतिशयमानन्दमनुभवामि । तत्रैव मया १९४८–५० तमेशवीयवत्सरेषु एषामेव गुरुपादानां सन्निधौ सिद्धान्तलक्षणप्रभृतयो नव्यन्यायग्रन्था अधीताः ।

CC-0. In Public Domain. Digitization by eGangotri

पण्डितप्रवराः पद्मप्रसादमहोदयाः

—पं० केदारनाथ श्रोझाः

पूज्यपादानांन्यायाचार्योः पण्डितप्रवराः श्रीपद्मप्रसादभट्टराईमहोदयानां शास्त्रस्य स्फीतं वैदुष्यं स्वभावे पाठने वस्तु च गाम्भीर्यम्, अधीयानानां छात्राणां बोध-धारणादिशक्तीनामाकलनं, तदनुरुध्य च विषयाणामुपदेशवाचाञ्च विविधकलाभिरुपन्यसनं, मम प्रयासस्य वाणीनां च छात्रमनोमन्दिरे आद्यवस्तूनां स्फुटं प्रदर्शनं परमं प्रयोजनमित्यवधानञ्चेवंविधं विलक्षणं स्पृहणीयमनुसरणीयञ्च कतिपयदिवसानामल्पीयसा सम्पर्केणान्वभवमिति स्मरामि।

...तन प्रायश्चायं विंशख्रीष्टशताब्द्या अष्टाविंशतस्त्रिंशाब्दं यावद् (१९२८–३०) वर्षत्रयस्य ग्रीष्मावकाशः। तदानीं काशीहिन्दूविश्वविद्यालयन्यायमध्यमायाश्छात्रावासीयश्छात्र आसम्, तत्र, वर्षे मासदशकस्यैव छात्रवृत्तिः, महत्यवकाशे काशीमधितिष्ठासोरधिजिघांसोरर्थकृशस्य च मम संरक्षणेऽनुकम्पमानाभ्यां पूज्यपादश्रीमदम्बिकाप्रसादोपाध्याय-श्रीसभापत्युपाध्यायमहोदयाभ्यां काशीलालघट्टस्थश्रीविरलाविद्यालये निवासभोजनसामग्र्युलब्धिर्व्यवस्थापिता, तादृशे तावति च निवासे विलक्षणपाठनवैदुष्याभ्यां संसिद्धस्य वैयाकरणविचक्षणश्रीतिवारीजीमहाशयस्य शेखर-पाठनश्रवणपिपासा तदुपशमावसरश्चोपातिष्ठताम्। अत एव कतिपयदिवसानामल्पश्च सम्पर्कः।

मम तैः सह सम्पर्क स्त्रिर्वा द्विर्वेति न सम्यक् स्मृतिः। प्रथमसम्पर्के न्यायसिद्धान्तमुक्तावल्या गुणनिरूपणप्रकरणाध्ययनं निश्चितं, त्रिश्चेत् सम्पर्कस्तदा द्वितीये व्यधिकरणजागदीश्या अध्ययनं, तृतीये तु व्युत्पत्तिवाद-प्र...मकारकस्य, द्विरेव चेत् सम्पर्कस्तदा मया व्यधिकरणग्रन्थः पूर्णतया तेभ्यो नाधीतः किन्तु ग्रन्थस्य केचन ...शा एवाधीताः।

...श्च स ममाध्ययनमात्राध्यवसायस्य, ते माननीया मनीषिणोऽपि व्यवसायान्तरविरक्ता इव श्चिन्ताः ...रेव ...ासन्त, अतो विशेषपरिचयपोषका वार्तालापा न प्रासरन्, कदाचन केचन जाता अपि उपेक्षणीया ... दुग्धविनायके तेषां निवासो नाधिकजन-संकुलः, पाठनव्यवधानं कादाचित्कमेवाभूत्।

...परीक्षामेवोत्तीर्णस्य परिवारपोषणे लुब्धस्य काश्या बहिर्दारिद्र्य-द्रावणं समापतत्। यदा कदा ...श्यामागतस्यापि हतभाग्यस्य कृतघ्नस्य वा मम प्रणतिपातावसरः प्रायो नागत इति संभावये।

...तीते काले सम्भवत आसन्नषष्टितमेशाब्दे पटनाराजकीय-संस्कृतमहाविद्यालयेऽध्यापयता मया ...विद्यालयस्य परीक्षकत्वनियुक्तिपत्रं प्राप्तम्। न प्रार्थनापत्रं प्राहिणवम्, न च मम कश्चित्परि...स्तत्रेति चिन्तनं प्रादुर्भूतम्, इतस्ततो बहुचर्चया श्रीमन्तो न्यायाचार्या भट्टराईजी[१]महोदयास्तत्र ...वात्सल्यविजृम्भितमिदमिति पर्यवसन्नम्, निरन्तरं प्रायः पञ्चषाणि वत्सराणि प्राचलन् तत् ...निधन...रुद्धं, तदाऽन्वेषणेनाश्रौषं यद् वयोनि[२]यमेन कार्यविरतास्ते महोदयाः।

...ा च विद्वत्संमानदानपरायणाः कतिपये ये मनीपिमणयो न्यायाचार्य–श्रीपद्मप्रसादाचार्य-...महोदयानां पुण्यसंस्मरणपुस्तकं प्रकाशयन्ति मामुपकुर्वाणांस्तान् धन्यान् वदामि तेषां कृतज्ञतां च वहा...म, यतो लघूनीमानि संस्मरणानि चिराय मम श्रद्धाञ्जलेस्तिलाञ्जलेश्च रूपतां नयन्ते ते सहृदयसुधाकराः।

---

१. प्रसिद्धिप्राचुर्यादिदम्। २. वस्तुतो रुजा पूर्वमेव स्वतः कार्यत्यागः श्रीपद्मप्रसादानाम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वैरेव संस्कृतं संवेद्यम्

—पं. लोकनाथ ढकालः

यत्सन्निधौ शिथिलतां स्वयमेव जग्मुर्जिज्ञासु-मानसपटानवबोधबन्धाः ।
विद्वद्वरालिकुलसेवितपादपद्मं पद्मप्रसादगुरुवर्यममुं नतोऽस्मि ।

चेतनानन्दधामानं चेतनानन्ददायिनम् ।
चेतनाराधितं कृष्णं चेतनाऽऽप्त्यै नमाम्यहम् ॥ २ ॥

(१) विश्वशान्तिः, सर्वेषाम् सर्वविधं सुखञ्च संस्कृतशिक्षायाः परममुद्देश्यम् । तत्सिद्धये विपश्चिद्-पश्चिमैः संस्कृतविपश्चिद्भिर्निर्धारितया संस्कृतशिक्षणप्रणाल्या संस्कृतविद्या सर्वैरेव मानवैः संवेद्या ।

विश्वशान्तिः, सुखञ्च सर्वविधं संस्कृतसंवेदनादधिगम्यते । तत्र शान्तिर्नाम दुःखानुत्पत्तिः, सा च दुःखसाधननिवृत्तेरेव सम्भवति । तथा हि—सर्वेषां प्रतिकूलतया वेदनीयं बाधनालक्षणं दुःखम्, तच्चाध्यात्मिकाधि-दैविकाधिभौतिकभेदेन त्रिविधं परिसंख्यातम् । दुःखस्य च सर्वविधस्यासाधारणं साधनमधर्मापरपर्यायं दुरितमेव ।

विश्वेषां सर्वविधदुःखहेतुरधर्मश्च जातिवयोऽवस्थादेशकालादिभेदभिन्नं मानवजीवनमुद्दिश्य वेदादि-शास्त्रैर्निषिद्धस्याकर्तव्यस्य परपीडनाद्यसत्कर्मणः करणात् तद्विहितस्य कर्तव्यस्य नित्यनैमित्तिकादेः सत्कर्मणोऽ-करणाच्च जायते । अतो दुःखहेतोरधर्मस्यानुत्पत्तये शास्त्रविहितं कर्म सर्वैरेव विधेयम् । शास्त्रनिषिद्धञ्च सर्वैरेव मानवैः परिवर्जनीयम् । विहितस्योपादानं निषिद्धस्य हानञ्च तज्ज्ञानं विना न सम्भवति । विहित-निषिद्धकर्म-परिज्ञानञ्च सर्वेषां मानवानां कर्तव्याकर्तव्यबोधकात् संस्कृतवाङ्मयादेव सम्भवति नान्यत [illegible] संस्कृ[illegible] सर्वैरेव मानवैः सम्यगवगन्तव्यम् ।

तदित्थं संस्कृतशास्त्रश्रवणतः सदसत्कर्मणी परिज्ञाय स्वस्वाधिकारानुसारं तत्कर[illegible] न जायते । तदनुत्पत्तौ च तज्जन्यं दुःखमपि नोत्पद्यत इति सम्भवति संस्कृतज्ञानाद्विश्वेषां विश्वशान्तिरिति ।

एवं सर्वेषामनुकूलतया वेदनीयं सुखमपि सर्वविधं धर्मादुत्पद्यते ।

विहितकर्मज्ञानञ्च धर्मस्थानात् संस्कृत-वाङ्मयादेव संभवतीति सर्वविधसुखला[illegible] सर्वैरेव वेदनीयम्, एवं विश्वशान्तये सुखाप्तये च सर्वैरेव मानवैः संस्कृतं वेदनीयमित्युक्तम् ।

(२) एवं संस्कृतेर्योगक्षेमार्थमपि संस्कृतं सर्वैरेव बोद्धव्यम् । तथाहि—संस्कृतिर्नाम वि[illegible]ता-कर्मजन्यः संस्कारविशेष एव । यथा पतनादिकर्मतो वेगाख्यः संस्कारो जायते तेनैव चोत्तरसंयोगाभि[illegible]नष्टे पूर्वपतनादौ पुनः पतनादिकर्मान्तरं जन्यते । यथा वाऽनुभवात्मकज्ञानक्रियातश्चरमफलनाश्य उत्तरस्मरणादि-क्रियाजनकश्चिरस्थायी भावनानामकः संस्कार उत्पद्यते । तथैव वेदादिशास्त्रविहितनिषिद्धशुभाशुभकर्मभ्यामपि धर्माधर्माभिधानौ चिरस्थिरौ संस्कारौ जन्येते । ताभ्याञ्च जन्मान्तरार्जनद्वारा पुनरन्यौ पुण्यापुण्यसंस्कारौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

...स्य ...ोत्यनादिकालतोऽद्यपर्यन्तमसंख्या एव पुण्यापुण्यसंस्कारसम्पदः प्रत्येकदेहिनोऽना... ...ञ्चिताः सन्ति, सञ्चेष्यन्ते च तावद्यावन्नात्मतत्त्वज्ञानाग्निना मिथ्याज्ञानसलिलनादिनि... ...मशेषं शोषमेष्यति ...दि पुरु...

धर्माधर्मयोः स...ज्ञा 'अथ वर्तमानस्य कथं निवृत्तिः ? संस्कारक्षयात्, यावदस्य स्थितिहेतुः संस्कारो धर्माधर्मसमाख्यातोऽवतिष्ठते तावदवतिष्ठते, (न्या. वा. १ अ. १ आ. २ सू.) इतिवार्तिके न्यायवार्तिककृ...तकरेण प्रयुक्ता।

'क्लेशमूलः कर्माशय' इत्यादियोगसूत्र (२।१४) व्याख्यायां योगसुधाकरेणापि 'धर्माधर्मसंस्कारः ...क्तम्।

...दुबीजयोः प्रवाहरूपेणानादिभूतयोस्तयोरेव च धर्माधर्मसंस्कारयोः सूक्ष्मातिसूक्ष्मतया लौकिक...णात् "अदृष्टम्" इति संज्ञा, कर्मजन्यत्वात् कर्म इति पदम्, "सा प्रथमा संस्कृतिर्विश्ववारा" (... ...७।१४) इति वेदे सोमसंस्कारे संस्कृतिपदप्रयोगदर्शनात् संस्कार-संस्कृतिपदयोः पर्यायत्वाच्च संस्कृतिपदमपि प्रवर्तते।

संस्कृतिसञ्चय एव स्वात्मनि सञ्चितोऽनारब्धफलो भाविजन्मजन्मान्तरजनकः "सञ्चितकर्मेत्यभिधां बिभर्ति।" या तु संस्कृतिः फलदानाय प्रवर्तमाना वर्तमानजन्मादिजननी सा प्रारब्धं कर्मेति कथ्यते। प्रारब्धं कर्मैव चाद्यतनैः प्रयुज्यमानस्य संस्कृतिपदस्य वाच्यतामर्हति। शिल्पकलादिषु तु संस्कृतिसाध्यतया संस्कृतिपदं लोकैः प्रयुज्यत इति युक्तं दृश्यते। सेयं संस्कृतिर्विभिन्नकर्मप्रभवा विचित्ररूपा नानारूपाः प्रजाः सृजन्ती समष्टिरूपेण विश्वविधातुर्विश्वविधाने सहकारिशक्तिस्वरूपतामुपगच्छन्ती विश्वसंस्कृतिरिति समाख्ययाऽऽख्यायते। धर्मप्रधाना च सा दैवी, अधर्मप्रधाना दानवी, समानधर्माधर्मरूपा च मानवीति निगद्यते। मानवसंस्कृतिरेव प्राच्यप्रतीच्योऽदीच्याऽवाच्याद्यनेकविधाऽवान्तरभेदान् बिभर्तीति। अनेन संस्कृतेः संक्षिप्तः परिचयः प्रसङ्गात् प्रदर्शितः।

तदस्याः संस्कृतेरवगमनमर्जनञ्च संस्कृतवाङ्मयस्य सम्यग्ज्ञानं विना न संभवत्येवेति संस्कृतेर्योगक्षेमौ ...धातुं सर्वैरेव मानवैरनिवार्यरूपेण संस्कृतस्य गभीरं ज्ञानमर्जनीयमिति।

...संस्कृति-सामान्यस्यैव योगक्षेमौ संस्कृतं विना न संभवतस्तदा तद्विशेषभूताया हिन्दुसंस्कृतेस्तु ...ः संस्कृतमेव प्राणाः। अतो हिन्दुभिस्तु स्त्रीपुरुषैः सर्वैरेवात्मसंस्कृतेरधिगमार्थं योगक्षेमार्थञ्च ...तव्यम्।

...हे विश्वासभूमयः स्वधर्मपरायणाः विद्याभासुरा भूसुराः सुरैरपि संभाविता भवन्ति स्म। यो... ...न्दिग्धा अनधीतसंस्कृता अपि जनाः संस्कृतेर्योगक्षेमौ विधातुं क्षमा अभवन्। साम्प्रतन्तु ...मेव संस्कृतं समधिगम्य स्वसंस्कृति-सञ्जीवनाय यत्नो विधेयः।

...च सर्वदा सर्वत्र च सर्वजनहितकरे चतुर्वर्ग-रत्नाकरे संस्कृतरत्नाकरेऽस्मिन् कराङ्गुलि...निधन...यानां कतिपयब्राह्मणगणानामेव न स्वत्वं किन्तु निःशेषमनुष्याणामेव कुलपरम्पराऽऽगते पैतृके ...पुत्राणामिव जन्मसिद्धं स्वत्वं विद्यते। अतः सर्वैरेव मानवैः संस्कृतवाङ्मयस्यास्य स्वकीयसंपत्तिवत्संरक्षणं ...णीयम्। संरक्षणञ्चास्य सर्वासु शिक्षणसंस्थासु चारुविचारविरचितयाऽनिवार्यसंस्कृतशिक्षणप्रणाल्यैव संभवति नान्यथेति।

यद्यपि "स्त्रीशूद्रौ नाधीयाताम्" इति निषेधविधिना स्त्रीशूद्रयोरध्ययन-निषेधात् सर्वेषां मानवानां न संस्कृताध्ययनेऽधिकारस्तथाऽपि तेन निषेधविधिना स्त्रीशूद्रयोर्वेदाऽध्ययनमात्रं निषिध्यते न त्वध्ययनमात्रम्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सकलव्यवहारविप्लवप्रसङ्गात्। न हि सम्यग् व्युत्पत्तिं विना प्रवृत्तिनिवृत्ति ... व्युत्पत्तिर्नाऽध्ययनं विनेति, ततोऽध्ययनमात्रस्य निषेधानुपपत्तिः। सर्वथाऽनर्थ ... दसम्पन्ना ... अत एव— व्युत्पत्तिविरहेण प्रयोज्यप्रयोजकभावाभावात् केवलं व्यवहारतोऽपि व्युत्पत्त्याधा... डां सदैवाह—

'शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः'' ॥

इत्यत्र वर्णितेषु व्युत्पत्तिसाधनेषु व्याकरणादीनामुपादानं संगच्छते। सामान्यतोऽध्ययनध... तु स्त्रीशूद्राणां पत्यादिप्रयुक्तवाक्यार्थानवबोधेन स्वकर्तव्यतत्संवादिकार्यसंपादनायोग्यत्वाच्च। तस्मात् पूर्वोक्त... विधेर्विधिप्राप्तवेदाध्ययनातिरिक्तवेदाध्ययनमात्रं विषय इति बोध्यम्। तदत्रेत्थमवगन्तव्यम्— उत्कृष्टा ...

संस्कृतभाषा द्विविधा, वैदिकी लौकिकी चेति। तत्र वैदिक्याः ''पत्नी इमं मन्त्रं पठति'' ...ऽपि नापत्र... याजयेत्'' इत्यादिविधिप्राप्ताध्ययनातिरिक्ते गुरूच्चारणानूच्चारणात्मकाध्ययनलक्षणलक्षितेऽध्ययने ...हिता ... द्विजातेरेवाधिकारः। लौकिक्याः संस्कृतभाषायाः शब्दतदर्थोभयग्रहणात्मकसामान्यलक्षणलक्षितेऽध्य...ने विशेषनिषेधं विना द्विजातेरन्यस्याप्यधिकारः।

अत एव—

''स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा।
तस्माद् भारतमाख्यानं कृपया कृतवान् मुनिः ॥''
''श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः''।

इत्यादिकं स्त्रीशूद्रादीनामपि भारतादिश्रवणवर्णनं संगच्छते। श्रवणन्तु शब्दतदर्थोभयग्रहणरूपमेवेति। संगच्छते च सप्तदिनपर्यन्तमुपवासादिनियमपुरःसरमक्षरशो भागवतश्रवणेन प्रेतस्याऽपि धुन्धुकारिणो मुक्ति-कथनं पद्मपुराणकथितम्। सर्वमानवाधिकारविषयशम-साधनात्मतत्त्व-ज्ञानस्य दुरूहन्यायादि-दर्शनपरि-शीलनमात्रसाध्यमननादिसाध्यस्य संस्कृतसम्यग्ज्ञानं विना दुःसाध्यत्वात्।

अत एव—'शमाय शास्त्रं जगतो जगाद' इति न्यायवार्तिककृदुक्तिः सुसंगता भ... स्त्रीशूद्रादिभिः पुराणादिश्रवणादित एव संपाद्यम्, तेषां श्रुतिश्रवणेऽनधिकारात्। अत एव पुरा... दिव्यासनादि कृत्वा ब्रह्मज्ञानमपि स्त्रीशूद्रैः सम्पाद्यमिति धर्मसिन्धुवाक्यं संगच्छते, स्त्री-शू... व्यतिरेकेण वैदिकवाङ्मयस्य श्रवणेऽपि नाधिकारः। आर्षाणां पुराणेतिहासादीनान्तु ब्राह्मणं ... मात्रेऽधिकारो न तु पठने। आधुनिककविकाव्यादीनान्तु पठनेऽप्यधिकार एवेति। काव्यादि... पठनादावेवाधिकारस्तयोः निर्माणेऽप्यधिकार इति। अत एव—

नीलोत्पलदलश्यामां विज्जकां मामजानता।
मुधैव दण्डिना प्रोक्ता सर्वशुक्ला सरस्वती ॥''

इति विज्जकोक्तिः संगच्छते, संगच्छते च 'मोदकैः सिञ्च मां राजन्' इत्यादिका भारतीयविदुषीणा-ममरभारतीततिर्भारतीयविद्वद्भिस्तत्र तत्रोपदर्शिता। न हि ताः सर्वाः स्त्रियः पुराकल्पभवाः, कृतमौञ्जी-बन्धना एवासन्नित्यत्र किमपि प्रमाणं श्रूयते। यत्तु ''स्त्रीशूद्रौ नाधीयाताम्'' इति श्रुतिः कुत्रापि श्रुतिषु न श्रूयते अस्ततस्याः प्रामाण्यमेव नास्तीति केश्चिदुक्तम्। तन्न युक्तम्—नहि बहुशाखाः श्रुतयः सर्वाःसर्वैरधीयन्त इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुत्र ... दविदग्धा अपि निःसंदिग्धं वदितुं शक्नुवन्ति । क्वचित् केनचिच्चाश्रूयमाणायाः शिष्टाचा... प्रामाण्येऽविवादादिति । अत एव 'स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा, इति वचनं संगच्छत इति ।

(३) यथेदानीं राष्ट्रपती राष्ट्रियभाषायां राष्ट्रियसंविधानं विधाय राष्ट्रवासिभ्यो वितरति, तथैव विश्वविधाता विश्वपतिरपि वेदपदवेदनीयं विश्वजनीनं विश्वसंविधानं विश्ववासिभ्यो विश्वेभ्यो जनेभ्यो व्यतरत् । राष्ट्र संविधाने प्रयुक्ता भाषा राष्ट्रभाषेव विश्वसंविधाने प्रयुक्ता भाषापि विश्वभाषा भवतीति विश्व-संविधाने वेदे प्रयुक्ता संस्कृतभाषाऽपीयं विश्वभाषातया विश्वैरेव विश्वजनैः समादरणीया संरक्षणीया संवेद्या, ...व्यवहारसृतिर्यथाधिकारमनुसरणीया चेति । विश्वभाषा तयैव च विश्वहितैषिण्याऽनया भाषया ...णि समुपवर्णितानि ।

...वोक्तं मनुना—

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥ इति

यदि च बहुसंख्यका राष्ट्रवासिनो जना यया भाषया व्यवहरन्ति सैव राष्ट्रिया, तस्यामेव संविधानं विधीयते इति वस्तुस्थितिस्तदाऽपि तादृशी वस्तुस्थितिर्विश्वसंविधानेऽप्यासीत् । यदा विश्वसृजा विश्वेश्वर-सकाशादुपलब्धं वेदमयं विश्वसंविधानं विश्वजनेभ्यो वितीर्णं तदा विश्वजनाः सर्वे संस्कृतभाषयैव व्यवहरन्ति स्मेति तात्कालिकेतिहासपर्यालोचनतोऽवगम्यते । भाषा हि मूलपुरुषमुखशिखरान्निःसृत्य नीचैः स्रवन्ती स्रवन्तीवापत्योऽपत्यकादिषु प्रसरति । अतः साक्षात् परम्परया वा विश्वसृजा सृष्टाः सर्वे देवा, दानवा, मानवा-ऋषयः प्रजापतयश्च तदानीं चतुर्वदनवदनोद्गतां संस्कृतभाषामेव भाषन्ते स्मेति निःसंशयमेव वदितुं शक्यते । अदितिनन्दनैस्तु सा भाषा स्वमातुः सकाशादेव शिक्षिता । देवमाताऽदितिः प्रजापतेः कश्यपस्य दयिततया वीरणाख्यस्य प्रजापतेर्दौहित्रीतया दक्षप्रजापतेर्दुहितृतया च जगज्जनयितुरजस्याऽदूरवर्तिपुरुषसन्ततिरिति पुरुषपरम्पराप्राप्तसंस्कृतभाषाभाषिण्येवाऽसीत् । अत एवेयं भाषा देववाणी, सुरभारतीत्यादिपदान्तरै-... संस्कृतभाषाया गीर्वाणवाणीतयैव च देवानामावाहनार्चनयजनादिकृत्यं तद्द्वारैव विधीयते ।

...यंभुवोऽङ्गभूः स्वायंभुवो मनुस्तथा तद्दयिता शतरूपा प्रियव्रतदेवहूत्यादयस्तदात्मजाः ...तत्सन्ततयस्तत्प्रभवाश्च सर्वे मानवा मूलपुरुषात् परम्पराप्राप्तं संस्कृतभाषितमेव भाषन्ते ...नुपौत्रस्य ध्रुवस्य देवर्षिणा नारदेन सह संवादः पुराणवर्णितः संस्कृतभाषयैव संपन्नः । पद्मजात्म-...ः संस्कृतेतरभाषाभाषित्वानुपपत्तेः । तेन ज्ञायते तदानीं वालवृद्धवनितादीनां मानवानामपि ... मातृभाषाऽऽसीदिति । तथा दैत्यमातादितिर्दानवजननी दनुश्च दक्षदुहितृतया कश्यपद-... अपि कुलपरम्पराऽगतसंस्कृतवाग्वादिन्यावेवास्तामिति तत्सुता दैत्य-दानवास्तत्कुलप्रसूताश्च सर्वे तदा ...भाषाभाषिण एवाभूवन्निति सुतरामेव तर्कयितुं शक्यते ।

देवदानवादीनां विश्वजनानाञ्च तदानीन्तनानां संस्कृतभाषाभाषित्वादेव च देव-दानव-मानवानुदिश्य प्रजापतेर्ब्रह्मणो 'द-द-दे'ति समानभाषया दकारत्रयोपदेशो बृहदारण्यकश्रुतौ श्रुतः संगच्छते, संगच्छते च प्रजा-पतिनेन्द्र-विरोचनाभ्यामेकभाषयाऽऽत्मोपदेशप्रदानं छान्दोग्योपनिषदि प्रतिपादितम् । अत एव च गीर्वाणैरुदितां गीर्वाणवाणीमेव पुरा विश्वजना वदन्तीति ऋग्वेदेनावेदितं संगतं भवति—'देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति' इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतभाषाया अनादित्वम्—

सेयं संस्कृतभाषा प्रवाहरूपेणानादिभूताया: संस्कृते: साधनत्वाद[illegible] ... गात[illegible] च ... [illegible]यागादि-शुभकर्मणां नरकादिदु:खजनकश्येनयागादिदुष्कर्मणाञ्च संस्कृतिसाधनभूतानां [illegible] अत एव- वेदस्य च संस्कृत-भाषामयतया संस्कृतिवत्तस्या अपि अनादिकालादेव सत्त्वं सिध्यत्येव ।

अपि च संस्कृतिसाधनत्वादेव संस्कृतभाषाया अनादित्वं न, किन्तु संसारसृष्टिहेतुत्[illegible]दपि तस्या-अनादित्वं स्वीकार्यम् । कथम्—यथा श्रुत्यादौ श्रुतं सृष्टिकर्त्तुस्तत्तच्छब्दोच्चारणपुर:सरमेव तत्तद्[illegible]सर्जनं संगच्छेत । श्रूयते हि—"स भूरिति व्याहरत् स भूमिमसृजत् (तै. ब्रा. २।२ ४।२) इत्यादि, । स्मर्यते च—

"सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक् ।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ॥ (मनुस्मृतौ १।[illegible]

अत एव—नाम रूपञ्च भूतानां कृत्यानाञ्च प्रपञ्चनम् ।
वेदशब्देभ्य एवादौ देवादीनां चकार स: ॥
ऋषीणां नामधेयानि तथा वेदश्रुतानि वै ।
तथानियोगयोग्यानि ह्यन्येषामपि सोऽकरोत् ॥ (वि. पु. १।५।६४,६५)

इति पुराणमपि संगच्छते । श्रीव्यासदेवेनाऽपि ब्रह्ममीमांसायां श्रुतिपूर्विकैव सृष्टिर्व्युत्पादिता । तथा च ब्रह्मसूत्रम्—"शब्द इति चेन्नात: प्रभवात् प्रत्यक्षानुमानाभ्याम्" । (१।३।२८)

विश्वस्रष्टा हि प्रलयकाले सूक्ष्मरूपेण परमात्मनि स्थितं वेदराशिं तत्सकाशाल्लब्ध्वा तत एव देवा-दीनां नामरूपाणि विज्ञाय देवादि जगत् सृजति स्म । अत एव "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" (श्वेता० उ० ६।१८) इति "धाता यथापूर्वमकल्पयत्" इति च श्रुती संगच्छेताम् । कथमवगम्[illegible] वैदिकाच्छब्दादेव जगदुत्पद्यत इति, प्रत्यक्षानुमानाभ्याम्—प्रत्यक्षमत्र श्रुति: प्रामाण्यं प्रत्यनपेक्षत्वात् अनुमानं स्मृति:-प्रामाण्यं प्रति श्रुतिसापेक्षत्वात् । एवञ्च प्रत्यक्षानुमानाभ्यामित्यस्य श्रुतिर[illegible] तत्र श्रुति:—"एत इति वै प्रजापतिर्देवानसृजतासृग्रमिति मनुष्यानिन्दव इति पितॄंस्तिर: पवित्र[illegible] इति स्तोत्रं विश्वानिति शस्त्रमभिसौभगेत्यन्या: प्रजा: इत्यादि ।" स्मृतिस्तु—

अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा ।
आदौ वेदमयी दिव्या यत: सर्वा: प्रवृत्तय: ॥ १२१-[illegible]

इत्यादिका शाङ्करभाष्योद्धृता बोध्या । उत्सर्गोऽप्यत्र ऋषिभ्य: प्रदानरूपो बोध्य:, तदु[illegible]ष्य-कृद्भि:—"उत्सर्गोऽप्ययं वाच: संप्रदायप्रवर्तन रूपोऽन्यादृशस्याऽनादिनिधनत्वानुपपत्ते:" इति । संप्रदायो न वेद: किन्तु तस्य प्रवर्तमम्—गुरुशिष्यपरम्परयाऽध्ययनम्, ब्रह्मणेऽपि परमात्मना वेदप्रदानश्रुते: । तथा च श्रुति:—"यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ।" इति

अत एव "स पूर्वेषामपि गुरु:"—इति योगसूत्रं संगच्छते ।

१. भाष्यकृत्–श्रीशङ्कराचार्य: ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्य स्र...

प्रक... "तेने ब्रह्म हृदा य आदिकवये" (भा. १-१-१)

इत्यादि पुरा... पूर्वेषामित्यस्य हिरण्यगर्भादीनामित्यर्थः।

उक्तरीत्या संस्कृतभाषाया विश्वसृष्टिं प्रति निमित्तकारणत्वमुपपादितम्। केचिद्दार्शनिकास्तु वाचकः शब्द एव वाच्यार्थरूपेण विवर्तते, परिणमते वेति सर्वोऽप्ययं वैरिञ्चः प्रपञ्चः शब्दब्रह्मरूपाया नित्याया वाचो विवर्तः परिणामो वेति व्यवस्थापयन्तो जगत उपादानकारणत्वमेव मन्यन्ते संस्कृतभाषाया अस्याः। ...र्तृहरिणा—

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥ (वा. ब्र. १।१)

...कृतत्पा...

तथा—

शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः।
छन्दोभ्य एव प्रथममेतद् विश्वं व्यवर्तत॥ (वा. ब्र. १।१२०)

तत्र विवर्तः—उपादानविषमसत्ताककार्यापत्तिः, परिणामस्तु—उपादानसमसत्ताककार्यापत्तिरिति बोद्धव्यम्।

तदित्थं संस्कृतसरस्वती जगतो निमित्तहेतुरुपादानहेतुर्वाऽस्तु, उभयथाऽपि कारणस्य कार्यप्राक्काल-वृत्तित्वनियमात् तस्याः सृष्टिपूर्वकालसत्त्वं सिद्धम्। सृष्टेश्च प्रवाहरूपेणानादितया तद्धेतुसंस्कृतस्याप्य-नादित्वमेवेति।

ये तु शब्दमात्रस्यानित्यतया तत्समूहरूपायाः श्रुतेरप्यनित्यत्वं परमाप्तेन परमेश्वरेण प्रणीततया तत्-प्रामाण्यञ्चाङ्गीकुर्वन्ति तैरपि परमेश्वरस्यानादितया तद्वाक्यस्य वेदस्यापि प्रवाहरूपेणानादित्वमङ्गीकरणीयम्। अन्यथा सृष्टेरनादितया श्रुतौ श्रुतस्य सृष्टौ तद्धेतुत्वस्यानुपपत्तेः। अत एव श्रुतौ ऋगादीनाममृतत्वश्रुतिः। "...निधना नित्या वाग्०—", "आदौ वेदमयी" इत्यादिस्मृतौ अनादित्वोक्तिश्च संगच्छते।

...ना यां भाषां भाषते तत्सन्ततिरपि तामेव भाषां भाषत इति योनिजसर्गे दृश्यमानः सामान्योऽयं ...ानुसारिणि प्राथमिकेऽयोनिजसर्गे तु स्रष्टुर्यादृशी सिसृक्षाऽऽसीत् तादृश्य एव प्रजा ...यम्भूः स्वयं यां भाषां भाषतेस्म तद्भाषाभाषिण्य एव प्रजास्तेन सृष्टाः नतु भाषान्तर-...नीं तादृशसृज्यसर्जने तस्य संकल्पो जात इति कल्पने मानाभावात्। स्वयम्भूस्तु भगवान् ...मेव भाषते स्म इत्यत्र पूर्वोदाहृताः "स भूरिति व्याहरत् स भूमिमसृजत्" इत्यादिश्रुतिः—"अनादि-निधन" इत्यादिस्मृतिश्च प्रमाणम्। अत एव पद्मजः पद्मस्थ एव "तप" इत्याकाशवाणीमाकर्ण्य तपसि प्रवृत्त इति पौराणिककथनमपि संगच्छते।

सेयं संस्कृतभाषा सृष्टिसमयाद् यावदसत्यव्यवहारो नासीत् तावत् सर्वमानवमातृभाषाऽभवत्। कालक्रमेण यदा सत्यस्य धर्मपादस्य विनाशोऽभूत् तदाप्रभृति शनैः शनैः समेधमानेन मिथ्याज्ञानेन मानवमनांसि समलान्यभवत्। ततः परमात्मसाक्षात्कारानुकूला मानवानां सहजसिद्धिः शैथिल्यमभजत्। पुराणादिषूपवर्णिताः रसोल्लासादिका अष्टसिद्धयोऽपि सर्वा अनशन् ताश्च—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रसस्य स्वत एवान्तरुल्लासः स्यात् कृते युगे
रसोल्लासात्मिका सिद्धिस्तया हन्ति क्षुधं नरः ।
स्त्र्यादीनां नैरपेक्षेण सदा तृप्ताः प्रजास्तथा ।
द्वितीया सिद्धिरुद्दिष्टा सा तृप्तिर्मुनिसत्तमैः ॥
धर्मोत्तमश्च योऽस्त्यासां सा तृतीयाऽभिधीयते ।
चतुर्थी तुल्यता तासामायुषः सुखरूपयोः ॥
ऐकान्त्यबलबाहुल्यं विशोका नाम पञ्चमी ।
परमात्मपरत्वेन तपोध्यानादिनिष्ठता ॥
षष्ठी च कामचारित्वं सप्तमी सिद्धिरुच्यते ।
अष्टमी च तथा प्रोक्ता यत्र क्वचन शायिता ॥

स्कन्दपुराणोपवर्णिता इति १।६ गो. पु० मुद्रितस्य विष्णुपुराणस्य टिप्पण्यां समुद्धृताः, ततश्चाधर्म-वृद्ध्या मानवानां जन्मसंस्कारविद्यादेर्ह्रासः समजनि। एवं क्रमेण प्रजासु ग्रहणधारणादिशक्तेर्ह्रासात् प्रजाः सर्वाः संस्कृतोच्चारणे समर्था न बभूवुः किन्तु कतिपयाः सुजन्मभाज एव प्रजास्तदुच्चारणक्षमा बभूवुरिति कल्पनायां न किमपि बाधकजातं दृश्यते। तत्प्रभृत्येव च शक्तिहीनैरध्ययनवर्जितैश्च जनैरसम्यगुच्चरिता संस्कृतवाणीयमपभ्रंशभूतानि भाषान्तराण्यसृजदिति कल्प्यते। शूद्रादीनां वेदाध्ययनाङ्गमौञ्जीबन्धना-विधानात् सविधिवेदाध्ययनहीना अपि ते द्विजातिसंसर्गात् कृतयुगे संस्कृतमातृभाषयैव व्यवहरन्ति स्म। तदानीं तेषां मातृभाषान्तरमासीदिति कल्पने मानाभावात्। अत एव शूद्राणां द्विजशुश्रूषादिविधायिका—

शूद्रस्य द्विजशुश्रूषा तयाऽजीवन् वणिग् भवेत् ।
शिल्पैर्वा विविधैर्जीवेद् द्विजातिहितमाचरन् ॥
भार्यारतिः शुचिर्भृत्यभर्ता श्राद्धक्रियारतः ।
नमस्कारेण मन्त्रेण पञ्चयज्ञान्न हापयेत् ॥ इति (या.स्मृ. १–१२०)

साम्प्रतं संस्कृतभाषेयं देवमात्राऽदित्या भाषितत्वेन देवमातृभाषातया देवभाषेति सत्य... पदं विदधत्यपि विश्वविसारिविश्वभाषाणां मातृभूतभाषेति कथञ्चित्तन्मातृभाषेति अभिधां ... कलिकालविकरालकरवालचङ्क्रमणान्मानवमातृभाषाभावाभावेन निरधिकारैरिव नरैररक्षिता परकीयगौरव सीदति-सर्वसंवेद्याया अस्याः समुद्धरणे संरक्षणे संपोषणे च सर्वैरेव मानवैः प्रत्येकं सम्भूय च निर्व्याजो यत्नो विधेयः।

तदित्थं सृष्टिसमये निखिलजगज्जनन्यै ब्रह्मरूपायै, स्थितिकाले सर्वमानवकर्तव्यनिर्देशेन विश्वधात्र्यै विष्णुरूपायै, संहारकाले च सकलजगत्संहर्त्र्यै रुद्ररूपायै, अकारोकारमकाराक्षरमयप्रणवरूपिण्यै गीर्वाणवाण्यै गीर्वाणवाण्यैव प्रकल्पितं नमोवाकं समुपहरामि—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वस्य प्रणवो ह्यादिर्मध्यमन्तस्तथैव च ।
एवं हि प्रणवं ज्ञात्वा व्यश्नुते तदनन्तरम् ॥ (मा.का.१।२७)

"ओमित्येतदक्षरं सर्वम्" (मा. उ. १)

"ओङ्कार एवेदं सर्वम्" (छा. २।२३।३) इति

गीर्वाणवचसः किञ्चिद्वैभवं मम चेतसि
यदीयकृपया भातं तस्मै श्रीगुरवे नमः ॥ १ ॥

परापरब्रह्मविचारसारमगाधबोधं प्रतिभाविभातम् ।
सत्यव्रतं धैर्ययुतं प्रशान्तं पद्मप्रसादाख्यगुरुं नमामि ॥ २ ॥

विशिष्टं यस्य वैदुष्यमासीन्न्यायद्वये तथा ।
शब्दशास्त्रे च साहित्ये धर्मवेदान्तशास्त्रयोः ॥ ३ ॥

विद्याज्योत्स्नाविनिक्षिप्तनिखिलाज्ञानतामसम् ।
छात्रनक्षत्रमध्यस्थं विद्वच्चन्द्रं नमामि तम् ॥ ४ ॥

यस्त्यक्त्वाहारनिद्रादि निशि गङ्गाङ्गणं गतः ।
समाधिना समाधत्त समस्यां शास्त्रगामिनीम् ॥ ५ ॥

पादपद्मद्वयं तस्य विद्वद्भ्रमरचुम्बितम् ।
नमामि प्रत्यहं भक्त्या तद्वियोगाधिबाधितः ॥ ६ ॥

नेपालपद्माकरतः समुद्गतं
प्रपुष्पितं भारतभानुभानुभिः ।
आमण्डितं पण्डितभृङ्गमण्डलैः
स्मरामि पद्मं सुरलोकसंश्रितम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खिन्नामिव वाराणसीं विसृज्य गत...

—आनन्दझाः

विद्वद्वरस्स्वर्गतो न्यायाचार्य्य-श्रीपण्डितपद्मप्रसादभट्टराईमहोदयः सर्वथा समये समये स्मृतिपथ... मम सादरम् । यतो हि यदा गुरुवराणां महामहोपाध्यायानां विद्वन्मूर्धन्यानां प्रातःस्मरणीयचरणा... चरणभट्टाचार्य्याणां सविधे गतोऽहमासमध्ययनार्थम्, तदाऽसौ भट्टराईमहोदयस्सम्प्राप्तन्या... पोष्टाचार्य्यकक्षाङ्कतः समये समये गुरुवराणां प्रोक्तानां निकट आत्मतत्त्वविवेकं पठन् दृष्ट इत्य... दृश्यत इवासौ । तदानीमपि तद्वैदुष्यं विद्वत्समाजे ख्यातिपथमारूढमिव स्मर्यते मयेदानीम् । ... प्रतिष्ठिते खलु काशीस्थे मीरघट्टस्थिते मारवाडीसंस्कृतमहाविद्यालये सर्वप्रथमं नियुक्तोऽसौ सम... शास्त्राध्यापकपदे । तत्रापि तस्य महती ख्यातिरासीदध्यापनसौष्ठवे । बह्वोऽन्तेवसन्तो विद्वांसस्तस्मात्सपरिश्रमं शास्त्राभ्यासं कुर्वाणाः श्रूयन्तेस्म । तदनन्तरं ख्यात्याधिक्यं लभमानोऽसौ विद्वद्वरो भट्टराईः काश्यामेव ललिता-घट्टस्थे गोयनकासंस्कृतमहाविद्यालये न्यायशास्त्राध्यापनाय सादरं तदधिकारिभिस्समाहूतो नियुक्तिं प्राप्त-स्तत्र । तत्रापि तस्याध्यापनसौष्ठवं श्रूयते स्म इति स्मर्यत एव ।

बहुकालपर्यन्तं विद्वद्वरोऽसौ तत्रैव समध्यापयन्नासीत् प्रतिभावत छात्रान् कांस्कान् । विदुषस्तस्य वैशिष्ट्यमिदमासीद्यत्प्राचीननवीनयोरुभयोर्न्यायशास्त्रयोः परमं वैदुष्यं समानमेवाभवत् । इदमपि तस्य वैशिष्ट्यमासीद्यद्गम्भीरशास्त्राचिन्तननिरततया मितभाष्येव दृष्टस्तत्र तत्र मया । सब्रह्मचारितया विद्वद्वरेण्य-प्रसिद्धेन पण्डितराज-राजेश्वरशास्त्रिद्राविडमहोदयेन सह घनिष्ठसम्बन्ध आसीदिति साधु स्मर्यते ।

अत एव च प्रोक्तशास्त्रिवरेण्याधीनरामघट्टस्थवल्लभरामशालिग्रामसाङ्गवेदविद्यालये संस्थया-नन्वासीत् विदुषस्तस्य घनिष्ठसम्बन्धः । मन्ये शास्त्रचर्चाविधुरे स्थाने कस्मिन्नपि गतागतं तस्य नाभवज्जाय-मानम् । सुबहुकालमेवं काश्यामेव महतीं समध्यापनकीर्तिं लभमानोऽसौ विद्वद्वरो भट्टराईः सबहुमान-श्रीनेपालमहीमहेन्द्रेण तदानीन्तनेन साग्रहमाहूतो विसृज्य खिन्नामिव वाराणसीं गतस्ततस्स्वकीयजन्म... नेपालराष्ट्रम्, तत्रापि विशिष्टां स्वीयां शास्त्रप्रतिभां प्रसारयितुमिति वस्तुस्थितिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रद्धाञ्जलि-पञ्चकम्

—पं० माधवप्रसाददेवकोटाः

•

बाणासुरस्य सरसि श्रीमान् पद्मप्रसाद आविरभूत् ।
सूर्याश्रयानपेक्षो यशःपरागो दिवानिशं जाग्रत् ॥ १ ॥

अन्तेवासिभ्रमरा बहुसंख्याका विभिन्नदेशीयाः ।
जाता यतः कृतार्था अमन्दविद्यामरन्दमासाद्य ॥ २ ॥

तस्मिन् खल्वग्रमन्यौर्विधिवशतो वा चिराय विकलाङ्गे ।
षड्दर्शनपदविरहाद्बत ते भ्रमरा अष्टपदा जाताः ॥ ३ ॥

अधुना तु हा विलीने तस्मिन् सुमनोगणस्पृहाविषये ।
शिवपार्षदस्य बाणासुरस्य जातं सरोवरं शून्यम् ॥ ४ ॥

श्रद्धाञ्जलीन्प्रददतो जगदीश्वरमर्थयामहे विनयात् ।
सुरदीर्घिकाप्रदेशाद् विबुधालीनां स मोदमातनुयात् ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीभट्टराई-महाभागानां पदसाधुत्वे विलक्षण... यम्

पं० गोपालशास्त्री 'दर्शनकेसरी'

अस्माकं पूर्वपरिचितः स्वामी प्रपन्नाचार्यो हि अस्मानभ्यधात्, "अयि विद्वन् ! नेपाल... कियन्तो विद्वांसो भट्टराईमहोदयस्य सम्बन्धे तदीयस्मृतिग्रन्थं प्रकाशयितुमिच्छन्ति। तत्र भवान् ... लिखिषति ?" इति। तदुत्तरेऽस्माभिरुक्तम्-अये डॉक्टरस्वामिवर्य ! नैषधकाव्ये श्रीहर्षकविरभि...

"वाग्जन्मवैफल्यमसह्यशल्यं गुणाद्भुते वस्तुनि मौनिता चेत्"।

इति, तदीयानुशासनं संस्मरन्तो वयमवश्यं महाविदुषः श्रीपद्मप्रसादमहोदयस्य स्मृ... नीयाष्टाध्यायी-वैशिष्ट्यम्" इति विषयमधिकृत्य लघुनिबन्धं लेखिष्याम इति। यद्यपि भट्टराई-महा... नैयायिकाः प्राधान्येनासन्। इह वाराणस्यां बहुत्र महाविद्यालयेषु ते न्याय-शास्त्रस्य प्राध्यापका एवाऽभूवन्। तथापि तेषां पाणिनीयाष्टाध्याय्याः पातञ्जलभाष्यस्य ग्रन्थिविमोचनेऽद्भुतं सामर्थ्यमासीत्। ते हि पाणिनीयं व्याकरणमष्टाध्यायीग्रन्थाधारमेवाध्येतुं छात्रानादिशन्ति स्म। न तु धर्मकीर्तिना बौद्धविदुषा प्रवर्तितस्य रूपावतारग्रन्थस्य लक्ष्यसिद्धिप्रधानस्यानुकरणतो लिखितां सिद्धान्तकौमुदीमाश्रित्य।

अतो वयं तत्प्रियस्य पाणिनीयस्य अष्टाध्यायीग्रन्थस्य वशिष्ट्यमेव संक्षिप्तं विवृणुमः। तथा हि-'पाणिनीयप्रशस्तिनाटके'ऽस्माभिरभिहितम्—

समाजशास्त्रावगतिर्भवेदितस्तथेतिहासादिनयादि बुध्यते।
न केवलेयं पदसिद्धिसंहिता द्विजत्वसम्पादनसञ्चिकाद्भुता ॥

अष्टाध्यायीग्रन्थस्य प्रथमं वैशिष्ट्यमिदं यत् शिव-सूत्राधारेण द्वाचत्वारिंशत्प्रत्याहारात्मिका पाणिनीयाष्टाध्यायी। द्वाचत्वारिंशत्प्रत्याहारज्ञातारश्छात्रा बहूनां सूत्राणां स्वयमर्थं कर्तुमर्हन्ति यथा—"इको यणचि" (६।१।७७), "झलां जशोऽन्ते" (८।२।३९) झलां जश् झशि (८।४।५३) इत्येवमादीनि बहूनि सूत्राणि सन्ति। येषामर्थज्ञानं सन्धिविच्छेदेनैव प्रत्याहारज्ञानशालिनश्छात्राः कर्तुमर्हन्ति।

अन्येषामपि सूत्राणां केवलमणन्तानामकारेकारोकारान्तानां त्रयाणामेव शब्दानां पदज्ञानं कृत्वा सन्धिविच्छेदेन पूर्वसूत्रानुवृत्त्या क्वचित् केवलं द्वित्र-सूत्रपदानुवृत्त्यैव सूत्रार्थं स्वयं छात्राः कर्तुमर्हन्ति। ... वैशिष्ट्यं क्रमशः सूत्राणां पाठ एव निबद्धमस्ति। ये हि च्छात्राः क्रमेणाष्टाध्यायीं घोषित्वा तदाधारं व्या... पठन्ति। ते हि वर्षद्वयेन अष्टाध्यायीं ततो वर्षत्रयेण पातञ्जलं महाभाष्यञ्चाधीत्य महावैयाकरणा भवन्ति बौद्धव... पद्धत्या लिखितां सिद्धान्तकौमुदीं पठन्तश्च्छात्रास्तु प्रौढमनोरमां शब्दरत्नं शब्देन्दुशेखरादिशाखाप्रशाखाञ्च पठन्तो "द्वादशवर्षैर्व्याकरणं श्रूयते" इति आभाणकं चरितार्थयन्ति सूत्राणामध्ययने क्रमराहित्यात्। स्वयञ्च पदसिद्धावशक्ता एव भवन्ति। क्रमसूत्रपाठाभावात् पदसिद्धिं रीत्या नीत्या कर्तुं नैव समर्था इत्युक्तमस्माभिः पाणिनि-प्रशस्तिनाटके। तथा हि—

"क्रमोपबन्धेऽप्यथ लाघवे मुनेस्तपःप्रकर्षप्रतिभापरिश्रमौ।
विलोक्य मुग्धोऽस्मि च, वक्तुमक्षमः, प्रशीलयन्तः प्रविदन्तु पण्डिताः ॥"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

...स्य ... द्वा किल पाणिनीयता, व्युत्क्रम्य साऽलुप्यत कौमुदीकृता ।
... प्रक्र निष्क्रमाधीतिरभूतपूर्वा महर्षिशिक्षोत्तमशस्य-दूर्वा ॥

पूर्वकाले छात्राः क्रमेण सूत्राणि संघुष्य स्वयं सूत्रवृत्तिं निर्माय सूत्रार्थं ज्ञात्वाऽध्यापकेभ्यः प्रयोग-सिद्धिमात्रं पठन्ति स्म । सम्प्रति रूपावतारग्रन्थानुकरणेन लिखितां सिद्धान्त-कौमुदीं सवृत्तिं निष्क्रमां पठन्तो जीवितमेव ...पयन्ति । अत एव वयं ब्रूमो यदियं सिद्धान्तकौमुदी सूत्रक्रमरहिता सती पाणिनेरुत्तमसस्यरूपेऽष्टा-ध्यायी... दूर्वाघासमुत्पादयति । यथा क्षेत्रे दूर्वाघासः सर्वथा सस्यं विनाशयति । तथैवेयमपि सर्वथा क्रम-प... ष्टाध्यायीं विलोपितवतीति दृश्यत एव । कोऽपि छात्रो नाष्टाध्यायीं पठति नापि स्वयं सूत्रवृत्तिं निर्मांति ।

... सूत्रवृत्तिनिर्माणप्रकारम्—

...वर्तमाने लट् (३।२।१२३) इति सूत्रे 'धातोः' 'प्रत्ययः' 'परश्च' इति अधिकारत्रयं गृहीत्वा छात्राः ...कुर्वन्ति—"वर्तमानकाले धातोः लट्प्रत्ययः परो भवति" । अनुवृत्त्या सूत्रार्थं यथा—"हलन्त्यम् (...) इति सूत्रे 'उपदेशेऽजनुनासिक इत्' इति सूत्रात् 'उपदेशे' 'इत्' इति पदद्वयं गृहीत्वा छात्रः स्वयं सूत्रार्थं करोति—"उपदेशेऽन्त्यं हल् इत् भवति" । अग्रेप्येवं छात्राः क्रमसूत्रपाठेनैव 'आदिर्ञिटुडवः' । इति सूत्रे 'भूवादयो धातवः' (१।३।१) इत्यतः धातुपदं गृहीत्वा पूर्ववत् 'उपदेशे' 'इत्' इति पदद्वयं गृहीत्वा सूत्रार्थं कुर्वन्ति । उपदेशे धातोरादिः ञिः, टुः, डुः, च इद् भवति । एवं हि विना प्रयासं हसन्तश्छात्राः सूत्रार्थं कुर्वन्ति । एवं "षः प्रत्ययस्य" इत्यत्रापि उपदेशे प्रत्ययस्यादिः षः इद् भवतीत्यर्थो भवति । अग्रे 'चुटू' (१।३।७) इत्यस्यापि पूर्ववत् 'उपदेशे इत् आदिः प्रत्ययस्येत्यनुवृत्या पद-चतुष्टयं गृहीत्वा छात्राः स्वयं सूत्रार्थं कुर्वन्ति । "उपदेशे प्रत्ययस्य आदी 'चुटू' इतौ भवत "इति" । लशक्वतद्धिते (१।३) इति सूत्रस्यापि पूर्ववत् पद-चतुष्टयं गृहीत्वा स्वयं छात्रा "उपदेशे अतद्धिते प्रत्ययस्य आदिः लः शः कुश्च इद् भवति । ततः 'तस्य लोपः' (१।३।९) तस्य इतो लोपो भवति इत्युपस्थापयन्ति छात्राः सूत्रार्थम्—

दृष्टं भवद्भिः क्रमसूत्रे-पाठस्य माहात्म्यम् । अत एवास्माभिः "पाणिनिप्रशस्ति-"नाटके "पाणिनि-प्रबोध-"नाटके चोभयत्राप्युक्तम्—

"सूत्रवृत्तिं स्वयं कुर्यु रध्यायिनः, पाठनस्य प्रकारोऽयमासीन्मुनेः ।
तद्विहन्त्री पठत्प्राणहर्त्री हृदा निष्क्रमा पाठरीतिर्द्रुतं हीयताम् ॥" इति ।

एवंविधचतुर्दशवैशिष्ट्यरत्नानि सागर इव इहापि पाणिनीयाष्टाध्यायी-शब्द-सागरे सन्ति । यतो ... एकमेवानायासं सूत्रार्थ-कृति-रूपं वैशिष्ट्यं विवृतमत्र लघुनिबन्धे । अन्यानि तु पाणिनि-प्रबोधनाटके ...नि सन्ति । जिज्ञासवो जानन्त्विति "छन्दःप्रबन्ध"-पुस्तके मन्दाक्रान्ताछन्दसा निबद्धं पद्यमुधृत्यैवोप-...मि वक्तव्यमिदम्—

"अष्टाध्यायी मधुरमधुरा घोषिता बालवृन्दै-
र्मन्दाक्रान्ता भवति जनितः पञ्चमाब्दात्परेण ।
सन्धिज्ञानात् पदपरिचयादर्थदा स्यात्समासा—
च्छब्दाश्चत्वार इह विदिता अण् हलन्ता यदि स्युः ॥

अष्टाध्यायी बालवृन्दैः जन्मतः पञ्चवर्षानन्तरं घोषणेनैव अभ्यस्ता भवति सन्धिविच्छेदेन, समासे सति समासविग्रहं कृत्वा, अणप्रत्याहारान्ताः (अकारैकारोकारान्ताः) शब्दाः, तथा हलन्तशब्देषु अक्-अच्-हल्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यादिप्रत्याहारशब्देनैव पूर्वसूत्रानुवृत्या च छात्राः स्वयं सूत्रार्थं कृत्वा प्रयोगसि... ...इति संक्षेपः। अत्र संक्षेपेण पद्यैरष्टाध्यायीपाठप्रकारो बोध्यते स्रग्विणीछन्दसा—

अक्षराम्नायसूत्रं पुरो घुष्यतां प्रत्याहारावगत्या स...ताम्।
स्थानयत्नादिबोधः स्वनुष्ठीयतां सन्धिबोधोऽपि तद्बोधतो बुध्यताम् ॥ १ ॥

स्थानमात्रेण कार्या अचां सन्धयः स्थानयत्नैर्हलां सन्धिराधीयताम्।
अश्खरोर्भेदतः स्यात् सवैसर्गिको रुर्भवेल्लोपभृद्योऽप्यवर्णादशि ॥ २ ॥

हश्यति स्यादतो रुः स उः सन्धिगः, स्थानसाम्येन खर्षु व्यवस्था मता।
आलि चैषोऽपि सोऽयं विसर्गप्रहृत्, रोरिलोपे पुरोऽण् दीर्घतां विन्दते ॥ ३ ॥

ज्ञानमाराधनीयं पदानां ततो, यत्र सन्धिक्रियाङ्ग क्रियेते उभे।
घुष्यतां प्रत्ययः सुप्तिङां मूलतश्चानुबन्धव्यपोहात् पुनर्घुष्यताम् ॥ ४ ॥

तत्र पूर्वं हलच्प्रत्यहारादिगं, रूपमुन्नीयतां स्वादिषु प्रक्रमात्।
रूपवृन्दं कियद् घुष्यतां सन्धितस्तद्वदेवानुपूर्व्याऽपगन्तादिकम् ॥ ५ ॥

लां प्रबोधः परावश्यकस्तिङ्कृते, ते दशापि स्मृताः शैवसूत्रक्रमात्।
लड्लिडाद्याष्टितः षण् ङितः पञ्च ते, धातुतस्तान् समानीय संस्थापयेत् ॥ ६ ॥

ते हि तिङ्प्रत्ययाः शोधिता बोधिता ये हि लां वै दशानां पृथक् कीर्तिताः।
ते गणानां विकारैः शबाद्यैः समं, तङ्पदानीह सर्वाणि संस्कुर्वते ॥ ७ ॥

एतेषां पिण्डितार्थोऽस्ति यत् चतुर्दशशिवसूत्राणि घुष्ट्वा प्रत्याहारज्ञानं कार्यं, ततः स्थानयत्नज्ञानं कार्यम्। ततस्तालुस्थानीयेकारस्य तालुस्थानीययकारो जायते। एवमग्रेऽपि ओष्ठस्थानीयस्य उकारस्य वकारः मूर्धन्यस्य ऋकारस्य रेफः, इत्यादिकार्याणां ज्ञानं कार्यम्। सर्वोऽपि अच् सन्धिः केवलं स्थानज्ञानेनैव सम्पद्यते। अकारयोः कण्ठ्ययोः आकारः कण्ठ्यः। एवमिकारयोः ईकारः। इत्यादिगुण-सन्धिरपि कण्ठतालव्ययोः अकारेकारयोः कण्ठतालव्यः एकारः। वृद्धिसन्धिरपि स्थानमात्रज्ञानतः सम्पद्यते।

हल्सन्धौ स्थानयत्नौ द्वौ गृह्येते यथा तत् + चलति इत्यत्र दन्त्यः अल्पप्राणः तकारः, तालव्येन अल्पप्राणेन चकारेण योगे तालव्योऽल्पप्राणः चकारो जायते। रामस् + चिनोति इत्यत्र दन्त्यः महाप्राणः सः तालव्यो महाप्राण एव शकारो भवति। इत्यादिस्थान-यत्नबलाद् हल्सन्धिज्ञानं कार्यम्।

पदज्ञानार्थमपि बहुसारल्यमस्ति। सु, औ, जस्। अम्, औट्, शस् इत्यादिः सुप् प्रत्याहारं प्रथमं मूलरूपेण घुष्ट्वा ततोऽनुबन्धं हित्वा स्, औ, अः। अम् औ अः। आ आभ्यां भिः। ए, भ्याम्, भ्यः। इत्येवं घुष्ट्वा अच्,-अक्, इत्यादिप्रत्याहारशब्दानामेव पूर्वं पदं निर्मेयम्। यथा—अच्+स् इत्यत्र, हलन्त-शब्दात् परः 'स्' इति लुप्यते। अग्रे शब्दान्तो हल्वर्णः अज्वर्णेन युज्यते। अच् अचौ अचः, इत्यादि। एवं मरुत्प्रभृतिहलन्तशब्दानां पदानि निर्मेयाणि।

लकारज्ञानं तिङन्तपदसिद्धौ आवश्यकम्। इति। अ इ उ (ण्), ऋ ऌ (क्) एओ (ङ्) इति शिवसूत्राणि 'ल्-ट्' इत्यक्षरद्वयमध्ये संयोज्य लट्, लिट्, लुट्, लृट्, लेट्, लोट्, इति टिल्लकारान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विङ् ... लिङ् (विधिराशीरिति भेदद्वयेन सह) लुङ् लृङ् इति दशैव ग्राह्या लेट् तु वेदे ... प्रकृ ति, त, अन्ति, इत्यादि, लटि, तु (तात्) ताम्, अन्तु, इत्यादि लोटि, सर्वेषामेव पृथक्-पृथक् प्रत्यय... प्रकृति-प्रत्यययोर्मध्ये शबादिविकरणयोगे धातोर्भूरित्यस्य भवेति विकार्यं भवति भवतः भवन्ति। दिव्-इत्यस्य "दीव्य' इति विकार्य 'दीव्यति' इति। स्वादौ–सुनोति सुनुतः इत्यादि पदानि ज्ञेयानि।

गुरुवराणां शास्त्रीयसम्पदुत्कर्षः

—पं. सुरेन्द्रझाः

तत्र भवताम्परमाचार्यचरणानां सर्वदर्शनसूरि–महामहाप्राध्यापक-द्रव्येशझाशर्मणामधिहरिद्वारं योगेन तनुवियोगभाजां शिष्येष्वन्यतमोऽनुजश्चाहं विहाय हरिद्वारयोगाश्रममध्येतुमधिकाशि सहस्रद्वयमिते वैक्रमाब्दे समागत्य सुरभारतीरहस्योदधिमूर्ति–प्रकाण्डपण्डित-मण्डलप्रचण्डसन्देहसन्दोहसमेधमानजूति–प्रतिभटानां तत्रभवतां परमश्रद्धेयगुरुवरपद्मप्रसादपादपद्मानां स्वकीयप्राक्तनसुकृतनिचयेन सान्निध्यं सन्निधिमिव विधिवशादुपलभ्याऽद्यापि धन्यमात्मानं मन्यमानो भवामि।

हन्त! विविधान्तरिकान्तरायावरुद्धगतिकोऽनल्पानि दिनानि यावत् तदीयसदुपदेशमधिगन्तु-मनपारयन् आधिनीरधिनिमग्न एवास्मि।

तदानीं सामान्यनिरुक्तिमधीयानो गुरुवराणामनुपमां प्रतिपादनशैलीमालोक्य नितराञ्चमत्कृतो गुरुवरद्रव्येशशर्माऽनल्पवियोगक्लेशमल्पीकृतवान्।

स्मारं स्मारं तेषां विद्वदन्तेवसतां समवाये ग्रन्थग्रन्थिविमोचनपूर्वकं सरलतया सरहस्योद्घाटनाध्यापन-प्रकारं सकलशास्त्रेषु निर्बाधाङ्गतिञ्च परां शिक्षामुपलभमानो गुरुवराणां शास्त्रीयसम्पदुत्कर्षवर्णने स्वकीया-योग्यताक्षमतामुपलक्ष्य सविनयं क्षमायाच्वां विदधानो विरमामि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहो ! तेषां पाण्डित्यवैभवम्, अवक्रं परिपूतं [illegible]

[illegible] जगन्नाथोपाध्यायः

वेदान्त-शास्त्राण्यधीत्य तद्विषये च समुपात्ताचार्यपदवीको न्यायशास्त्राध्ययने विशेषेण प्राचीनन्याय-वैशेषिकग्रन्थानामध्ययने यदाहं प्रवृत्तः, तदानीं नव्यन्यायशास्त्राध्यापनपटवो नैके सुप्रसिद्धा विद्वांसः काश्यां स्वाध्यायनिरता आसन्, तेषु इदानीमपि केचिदवशिष्यन्त एव। एवं सत्यपि, काणाद-गौतमीयानां प्राचीनन्याय-शास्त्रप्रवर्तकानां वात्स्यायनोद्योतकर-वाचस्पति-जयन्त-शङ्करमिश्रोदयनाचार्यप्रभृतीनामतिगभीरशास्त्रा[illegible]-मध्ययनाध्यापनं काश्यामुच्छिन्नप्रायमासीत्, किमु वक्तव्यं शास्त्रपरम्परापहारकेऽस्मिन् युगे। [illegible]-शास्त्राणां सम्यगालोचनं प्राचीनन्यायशास्त्रमनधीत्य न संभवतीति मत्वाऽहं बङ्गीयन्यायतीर्थ[illegible] प्राचीनन्यायशास्त्राण्यध्येतुं तर्ककर्कशविद्वद्बहुलायां महानगर्यां कालिकातायां प्रवासः कर्तव्य[illegible] कुर्वन्नासम्, किन्तु तद् विधातुमपेक्षितोऽवकाशो नैव सुलभो यतो हि तदानीं राजकीयसंस्कृतमहा[illegible]-सरस्वतीभवने न चिरादेव मया जीविकापदमधिगतमासीत्। [1]विवशः कथञ्चिद् वाराणस्यामेव विख्यातगुरु[illegible] परितः संभ्रमन्नभवम्। कृपालुगुरुभ्यः सायासं मया प्राचीनन्याये पल्लवज्ञानमर्जितम्। न्यायशास्त्राध्यापकेष्वपि एतादृशा विद्वांसो मया लब्धा यैर्मन्मुखादेव ते ते प्राचीनन्यायग्रन्थाः प्रथमवारमेव श्रुताः।

सौभाग्यवशादस्मच्छात्रमित्रेणैकेन संन्यासिना बलादिव मीरघट्टस्थमारवाडीसंस्कृतकालेज-मधिवसतो नितान्तं स्वभावसारल्यं गभीरञ्च पाण्डित्यं बिभ्रतः स्वनामधन्यस्य पद्मप्रसादभट्टराईमहाभाग-स्यान्तिकेऽहं निक्षिप्तः। प्रथमचर्चयैव तेषां प्राचीनन्यायग्रन्थानां तदन्तर्वर्तिविषयाणां च सम्यगुल्लेखः पण्डित-महाभागेन कृतः। तत्सकलं श्रुत्वा मोदमानेन मया भट्टराईमहाभागस्यान्तेवसता प्रशस्तभाष्यस्य द्रव्यकिरणा-वली टीका सिद्धान्तमुक्तावल्याश्च रामरुद्रीसहिता मङ्गलवाददिनकरी सम्यगधीता। तन्मध्य एव एकस्मिन् दिने पण्डितप्रवरैर्नितान्तं संक्षेपेणोक्तं यत् काशीं विहायाहं नेपालं जिगीमिषुरस्मीति। एतद् दुर्वृत्तं सविस्मयं सखेदं चाकर्ण्य यदा सनिदानं सविस्तरं घटनजातमवगन्तुमुपक्रान्तस्तदा स्तब्धोऽहं जातो यतो हि भट्टराईमहाभागाः काशीत्यागदुःखैर्मर्माहताः सन्तः, [2]अत्रत्योपेक्षापीडिता नेपालगमने विवशाः सन्तीति ज्ञात्वा।

अकिञ्चित्करेणापि मयैतत्सम्बन्धे किञ्चिद् विधेयमित्यालोच्य तदानीन्तनानां केषाञ्चित् सुप्रसिद्ध-संस्कृतसंस्थाधिकारिणामन्येषाञ्च पुरतः काशिकानां यशोहारि वृत्तमेतद् श्रावितम्। तत्सर्वं व्यर्थमिव जातं यतो हि ते च सर्वेऽपि भट्टराईमहाभागानां प्रकर्षातिशायिपाण्डित्येन पूर्वत एव नितान्तं सुपरिचिताः सन्तोऽपि स्ववैवश्यं प्रकटयामासुः। तैः सर्वैरेव तेषां पाण्डित्यानुरूपं पदं प्रदातुं समये समये चेष्टमानैरपि न साफल्यं लब्धमित्यनेकैर्दृष्टान्तैरहं प्रतिबोधितः। तदानीं ममाध्ययनविरामस्य किं मूल्यं, यदा हि काशिकपाण्डित्यस्य शिरोमणिभूता एव काशीतो बहिर्गमने विवशा जाताः। एवं मया बहुधा श्रुतं यत् काशीप्राणास्त आप्रयाणं स्वमातृभूमौ नेपाले अमनस्का विरसा एव कालं यापितवन्त इति। इदमपि सत्यं यत् कदाचित् काशीमागते तस्मिन् महात्मनि काशिकविशिष्टसंस्थाधिकारिभिः कैश्चित् तान् पुनरावर्तयितुं यत्नः कृतः, किन्तु मनस्विभि-स्तैर्विगतसारं तन्मत्वा न किमप्यवधानं विहितम्।

अद्यापि सा पुण्यस्मृतिर्मां बाधते। गभीरपाण्डित्यपरम्पराख्यानेऽधुनापि ते काशिकपाण्डित्य-परम्परायां जीवन्ति। अहो ! स्मरामि; महापण्डितानां पद्मप्रसादभट्टराईमहाभागानां कोलाहल-रहितां ग्रन्थिभेदिनीं मिताक्षरामध्यापनशैलीम्। अहो ! तेषां पाण्डित्य-वैभवम्, अवक्रं परिपूतञ्च जीवनम् ! !

---

१. विवशतेरत्र सर्वत्रावशत्वमर्थोऽभीष्टः। २. इदमन्यैस्तदुदन्तदातृभिर्नैव लिखितम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुरुचरणारविन्देषु श्रद्धासुमनसामञ्जलिः

पं० सुरेन्द्रनाथद्विवेदः

विविधविद्याविद्योतितान्तःकरणानां श्रौतस्मार्तकर्मानुष्ठानसंलग्नानां प्रातःस्मरणीयश्रद्धेयगुरुवर-श्रीपद्मप्रसादभट्टराईमहोदयानां जीवनं प्राचीनमहर्षिजीवनसदृशमासीत्। विद्याभ्यसनं व्यसनं, शास्त्रचिन्तनञ्च विना कदाचिदपि ते वृथावार्तालापं न कुर्वन्ति स्म, न वा अर्थस्यार्जने कदापि कुत्रचिदपि साभिलाषा गुरुचरणाः। अनायासेन यल्लब्धं स्वल्पमपि तद् बहु, इति तेषामर्थविषये राद्धान्तः।

आदौ वाराणसेयमारवाडीसंस्कृतमहाविद्यालये न्यायाध्यापकपदे नियुक्ता अध्यापनकार्यं सम्पादित-वन्तः ... जो०म०गोयनकासंस्कृतमहाविद्यालये अध्यापयन्ति स्म; तस्मिन्नवसरे ममाप्यध्ययनं तेषां स... तम्।

... तिः

... छात्राणामपि ग्रन्थस्य पाठशुद्धिः सम्यक् भवेदित्येतदर्थं तेषां मुखेनैव पाठ्यपुस्तकपङ्क्तीनां पाठं कारयित्वा तदनन्तरं गभीरया गिरा स्वयमपि ग्रन्थपङ्क्तीनां पाठं कुर्वन्ति स्म। अध्यापने प्रत्येकपदार्थस्य केन सह केन सम्बन्धेन कस्य कुत्रान्वयः ? कीदृशश्च शाब्दबोध इति विलक्षणया शैल्या ते पाठयन्ति स्म। रामघट्टस्थसाङ्गवेदविद्यालयाध्यक्ष—पण्डित–श्रीराजेश्वरशास्त्रि-द्रविडमहोदयाः तेषां सतीर्थ्या मित्रवरा आसन्। तदानीन्तन-वाराणसेय, सं० सं० विश्वविद्यालयस्य साहित्यविभागाध्यक्षाः श्रीमुकुन्दशास्त्रि-खिस्ते महोदया मित्रभूता अपि तेषां गुरुचरणानां समीपे न्यायशास्त्रस्याध्ययनमपि कुर्वन्ति स्म।

नयपालराज्यपुरोहिता अपि निर्णयतया समापतितस्य विषयस्य धर्मशास्त्रपद्धत्या विचारविधौ श्रीभट्टराईमहोदयानां सान्निध्यमपेक्षमाणास्तेषामाह्वानं कुर्वन्ति स्म। न धर्मशास्त्रस्य निर्णायका एव, किन्तु तेषां जीवनमपि तथाविधं धार्मिकमासीत्। स्वकीयमातुः स्वर्गवासो यदा समजनि तदैकवर्षपर्यन्तं हविष्यान्नस्य स्वयं पाकं विधाय भोजनं भवति स्म। यथाधर्मशास्त्रनिर्देशं शयनादिकं भूमावेव, तेषां मनसो वचसां कर्मणाञ्चैकरूपता महात्मतां ख्यापयति स्म।

नेपालमहाराजद्वारा त्रिभुवनविश्वविद्यालयान्तर्गतसंस्कृतमहाविद्यालयस्याध्यक्षतायै[१] समाहूतास्ते-गोयनकासंस्कृतमहाविद्यालयतो नेपालराजधानीं प्रति गतवन्तस्तत्र विद्यालयाध्यक्षतां सम्पादयद्भिस्तैरध्यापन-कार्यमपि सुसंपादितम्।

गुरुचरणा न केवलं नव्यन्यायशास्त्रे किन्तु प्राचीनन्यायशास्त्रे वैशेषिकदर्शने उभयविधमीमांसायां धर्मशास्त्रे चाप्रतिहतगतयस्तत्तच्छास्त्राणामप्यध्यापनं कुर्वन्ति स्म।

दैवदुर्विपाकाद् वातव्याधिना संग्रस्तास्ते वाराणस्यां समागतवन्तः, तेषां चिकित्सा वाराणस्यां यदा प्रचलति स्म तदाऽहं दर्शनाय गतवान् "प्रारब्धस्य कर्मणो भोगादेव क्षयः" इति वदन्तो गुरुचरणाः प्रमुदितमनस्का एव दृष्टाः।

प्राचीनभारतीयसंस्कृतौ तेषां महती आस्था। "आर्याणां बलं तेजश्च सदा वर्धितं यथा भवेत्तदर्थं प्रयत्नो विधेयो वेदानां शास्त्राणाञ्च संरक्षणार्थं "ब्राह्मणस्य देहोऽयं क्षुद्रकामाय नेष्यते। विद्यायै तपसे चैव प्रेत्यानन्तसुखाय चे"ति चिन्तयन्तो, "आचारहीनं न पुनन्ति वेदाः" अतः सदाचारसंपन्नाः सर्वे भवेयुरिति भावनां भावयन्तः, स्वकीयसात्त्विकब्राह्मणोचितजीवनेनैव शिक्षायाः प्रचारं कुर्वन्तस्ते आदर्शभूता गुरवः, तादृशा महामान्या जगति विरला एव, अत उक्तम्—

"सन्ति सन्तः कियन्तः" इति।

---

१. प्रधानाचार्यत्वाय।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यायाचार्यः श्रीपद्मप्रसादभट्टराई [illegible]

[illegible]यः

इन्द्रियार्थसन्निकर्षात् प्रत्यक्षं भवति, कियद्दूरं वेन्द्रियाण्यर्थानां सन्निकर्षं भजन्ते ? । प्रमेयस्य कृतेऽपर्याप्तं भवति प्रत्यक्षम् । तस्मादनु यज्ज्ञानकारणं भवति तदनुमानं प्रमाणं संजायते । प्रमीयतेऽनेनेति करणार्थाभिधानो हि प्रमाणशब्दः । वर्तमानकालिकं सद्विषयं प्रत्यक्षं भवति चेत् त्रिकालयुक्ता अर्था अनुमानेन गृह्यन्ते । अतीतमनागतञ्चासद्भवति तदप्यनुमानेन भविष्यति, अभूदिति चानुमातुं शक्यते । तस्मा[illegible] तस्य परमन्यायस्य पञ्चावयवाः प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि विद्यन्ते । तेषु प्रमाणसमवायः । आगमः [illegible]ज्ञा । हेतुरनुमानम् । उदाहरणं प्रत्यक्षम् । उपनय उपमानम् । सर्वेषामेकार्थसमवाये सामर्थ्यप्रदर्शनं नि[illegible]ति । सोऽयं परमो न्यायः । तत्र नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्तते, न्यायस्तु संशयितेऽर्थे प्रवर्तते ।

तस्मात् न्यायशास्त्रं 'प्रदीपः सर्वविद्याना'मिति घोषितम् । अनुमाने व्याप्तिज्ञानं कारणं भवति । [illegible] हेत्वाभासा हेतुवदाभासन्ते । हेतोः स्वरूपं याथार्थ्येनावगन्तव्यम् । सत्यमेतत्, त्रिविधा [illegible]स्य प्रवृत्तिः,–उद्देशो लक्षणं परीक्षा चेति । तत्र नामधेयेन पदार्थमात्रस्याभिधानमुद्देशः । तत्रोद्दिष्टस्य तत्त्वव्य[illegible]को धर्मो लक्षणम् । लक्षितस्येदं लक्षणमुपपद्यते न वेति प्रमाणैरवधारणं परीक्षेति व्याजहार भाष्यकारः ।

नव्यन्यायस्य प्रणेत्रा गङ्गेशोपाध्यायेन न्यायस्य नवीनां पद्धतिमाकलय्य लक्षणपरीक्षे नितरां विवेचितेस्तः । नव्यन्यायस्य जन्मनः पश्चात् शास्त्रस्य विमर्शप्रक्रियायामामूलचूडं परिवर्तनं जातमिति वक्तुं शक्यते । साहित्यव्याकरणवेदान्त-ग्रन्थकारा अपि नव्यन्यायसरणिमेवावलम्बन्ते स्म । मायावादिनो विद्वांसोऽपि स्वमतं प्रत्यपीपदन् नव्यन्यायदिशा । अवच्छेदकावच्छिन्नवादं परित्यज्य ननु न चेति वक्तुमप्यसमर्थाः सञ्जाता विद्वांसः । तस्माल्लक्षणग्रन्थस्याध्ययनमपि नव्यन्यायं विहाय पूर्णं न भवति चेत् परीक्षणं तु गगनकुसुमायितं भवत्येव ।

न्यायस्य नव्यसरणिमनुसृत्य पठनपाठनविधौ प्रकाण्डं पाण्डित्यं प्राप पद्मप्रसादभट्टराईरिति सर्वे विद्वांसः स्वीकुर्वन्ति । बाधान्तन्याये पारं गतस्य सर्वतन्त्रस्वतन्त्रस्य पद्मप्रसादभट्टराईमहोदयस्य समयः शास्त्राभ्यसन एव व्यतीयाय । स्वाध्याययज्ञे स्वतनुमहौषीत् पद्मप्रसादभट्टराईमहाभागः । काशीं वसतस्तस्य शतशोऽन्तेवासिन आसन् । स्वप्राणधारणमात्रपर्याप्तां वृत्तिं स्वीकृत्यापि काशीमेवाश्रित्य ज्ञानयज्ञः सञ्चालितस्तेन विदुषा । भारतवर्षेऽद्यापि तस्य शतशश्छात्रा विद्यन्ते । वाराणसेयराजकीयसंस्कृतमहाविद्यालये तु पद्मप्रसादः स्थानं नालभत । नेपाले यदा राजकीयसंस्कृतमहाविद्यालयस्योद्घाटनमभूत्, तदा बहुसंमानपुरःसरं पूर्वमुपप्रधानाचार्यपदे पद्मप्रसादमस्थापयत् नेपालसर्वकारः । पण्डितराजसोमनाथा राजकीयप्रज्ञाप्रतिष्ठाने सदस्यत्वेन यदा प्रतिष्ठापिताः, तदा प्रधानाचार्यपदवीमलंकृतवन्तः पद्मप्रसादमहाभागा गुरुचरणाः । पण्डितराजसोमनाथशर्म्मणो यत्र प्रधानाचार्या आसन् पश्चात् तामेव पदवीमलंकृत्य पद्मप्रसादमहाभागा न्यराजन् । तस्मिन् समये प्राध्यापकत्वेन स्थातुमहमलभ इति स्मारं स्मारं हृष्टं भवति हृदयम् । नेपालस्य संस्कृतधुरंधरास्त्रयः पुत्रा आसन् अस्यां शताब्द्याम्, ते खलु कुलचन्द्र-सोमनाथ-पद्मप्रसादा एव । त्रय एव विद्वांसः सरस्वत्याः सुपुत्रा इत्यत्र नास्ति कापि विप्रतिपत्तिः । अहमपि भाग्यवानस्मि तैर्विद्वद्वर्यैः साकं स्थित्वा किमपि ज्ञानमुपलब्धवानिति ।

प्रकृतमनुसरामः, वाराणसीस्थाः ख्यातिप्राप्ता महान्तो विद्वांसोऽपि शास्त्रार्थावसरे पण्डितप्रवरेण पद्मप्रसादेन स्थापितं निर्णयं निराकर्तुमसमर्था आसन् । धर्मसभायां निर्णायकसमूहे सदैव पद्मप्रसादस्य स्थानं सुरक्षितमासीत् । संस्कृतवाङ्मयस्य पीठत्वेन भारतस्य काशीनगरी सम्मानिताऽस्ति । एको नेपालदेशाद्गतो विद्वान् सर्वातिशायिन्या स्वविद्यया तत्र स्वस्थानं प्रकटीचकार । भारतवर्षे यत्र कुत्रापि पण्डितसभाया आह्वानं भवति स्म तदा काशीस्थैः पण्डितैः पद्मप्रसादस्य स्थानमपि निर्णीतमेव सञ्जायतेऽस्य ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

...स्य ...पद्मप्रसादो यदा छात्रान् पाठयति स्म तदा तस्य हृदये सर्वा विद्या स्फुरति स्म, जिह्वायां सरस्वती ... प्रतिभा नरीनृत्यति स्म स्वान्ते। नव्यन्यायस्य तादृशपाठको गुरुर्न भविष्यतीति वक्तुं शक्यते। नव्यन्यायदिशा लिखिता व्याकरणसाहित्यवेदान्तग्रन्था निधनमुपगते पद्मप्रसादे अनाथाः संजाता इति मन्ये। अधुना कः पाठयिष्यति खण्डनखण्डखाद्याद्वैतसिद्धिप्रभृतीन् वेदान्तग्रन्थान्। को रसगङ्गाधरं निरूपयति, को व्युत्पत्तिवादं व्युत्पादयति। बाधान्ता नव्यन्यायग्रन्थास्तेषां क्रोडपत्राणि च दिवं गते भट्टराई महोदये स...पं मौनमेवावलम्बन्ते। पद्मप्रसादस्य सर्वाधिक्यं वैशिष्ट्यं पाठनकर्मण्येवासीत्। सूर्योदयात् रात्रिप...त पाठनक्रमः प्रचलति स्म तस्य गृहे। स्वाध्याययज्ञे दीक्षितो गुरुर्विद्यादाने कदापि न विरमति स्म। ...व सहचराः, अध्ययनमेव व्यसनम्, अध्यापनमेवानन्दविषयः। सर्वात्मना वाग्देव्याश्चरणसरोरुहे स्वस्य ...य समर्प्य परममुदितः पद्मप्रसादः स्वशास्त्रज्ञानदीपेन भास्वता प्रकाशितोऽभवत्।

नव्यन्यायाचार्यपण्डितपद्मप्रसादोपाध्याया अनेकान् ग्रन्थान् संशोधयामासुरिति श्रूयते। पठनपाठनकर्म...पाल...न विदुषा यदि बहवो ग्रन्था: लिखिताः स्युः तदा संस्कृतवाङ्मये नव्यानि शास्त्राणि प्रादुर्भूतानि भ...ने यदा पण्डिताग्रणीर्लिखितुमारभते तदा तत्र तस्य पाण्डित्यं प्रकटीभवति। वीरमित्रोदयस्य भक्तिप्रकाशस्य संशोधनं पण्डितपद्मप्रसादोपाध्यायेन कृतं, तस्य भूमिकायां स्वमतं प्रतिपादयति पण्डिताग्रणीराचार्यः पद्मप्रसादः, तथाहि—

"तत्र भक्तित्वं ज्ञानत्वव्याप्यजातिविशेषः, इति द्रव्यकिरणावलीप्रकाशे वर्धमानोपाध्यायाः। आराध्यत्वप्रकारकं ज्ञानं भक्तिरिति केचित्। मधुसूदनसरस्वतीप्रभृतयस्तु भगवद्गुणगणश्रवणेन द्रवावस्थां प्राप्तस्य चित्तस्य सर्वेशविषया धारावाहिकी वृत्तिर्भगवदाकारता भक्तिरित्याहुः। वयन्तु भगवद्विषयकानुरागहेतुक्रियात्वं, भगवदनुरागमात्रोद्देश्यकविहितक्रियात्वं वा भक्तित्वमिति ब्रूमः। अत्र मात्रपदेन स्वर्गाद्युद्देश्यकयागादिव्यवच्छेदः। विहितपदेन भगवदनुरागोद्देशेनानुष्ठितनीरहवनादेर्व्युदासः। न च फलभक्तावव्याप्तिः। भगवद्गोचरानुरागवृत्तिकार्यतासाक्षात्कारजनकसाक्षात्कारविषयत्वस्य निरुक्तसाक्षात्कारविषयतावच्छेदकधर्मत्वस्य वा विवक्षितत्वात्। ननु साध्यरूपाया भक्तेः सुखात्मतया पुरुषार्थत्वेन तत्र प्रवृत्त्युपपत्तावपि साधनभक्तेः स्वयमपुरुषार्थत्वेन तत्र प्रेक्षावतां प्रवृत्तिर्न युक्तेति चेत्, निरुपाधीच्छाविषयत्वरूपपरमपुरुषार्थत्वस्य सुखदुःखाभावयोरेव विश्रान्ततया तत्त्वज्ञानद्वारापवर्गसाधनतया च पुरुषार्थत्वमक्षतमेवेति न तयोरिव तस्यामपि प्रवृत्त्यनुपपत्तिरिति।"

वर्धमानोपाध्याय-मधुसूदनसरस्वतीप्रभृतीनां भक्तिस्वरूपं निरस्य स्वमतं प्रतिपाद्य स्वकृते लक्षणे दोषमुद्भाव्य तस्य समाधानं विधाय निर्दुष्टं भक्तेर्लक्षणं स्थापयतोऽस्य विदुषो विद्वत्ता समुद्धृतपङ्क्तिभिरेव स्पष्टीकृता। भक्तिलक्षणं विदधतोऽस्य दार्शनिकस्य लेखनप्रणाली नव्यन्यायात्मिका दरीदृश्यते। यदि पद्मप्रसादमहाभागा अनया एव दिशा किमपि विषयवस्तु प्रतिपादयेयुस्तदा संस्कृतज्ञानां महानुपकारः स्यात्। परन्तु तैर्ग्रन्थलेखनविषये उत्साह एव न दर्शितः। तत्रभवन्तो गुरुचरणा ग्रन्थनिर्माणाय विज्ञापिते सतीत्थमवोचन् "लिखितं पुस्तकं न पठ्यते किमर्थं लेखनीयमिति"। तत्र भवन्तः संशयच्छेदिनः पण्डिता आसन्। धर्मशास्त्रस्य विषये विलोक्यैव पुस्तकं स्वनिर्णयं ददति स्म। यदि व्यवहारविषये प्रशासनकर्मणि शास्त्रीयकृत्ये च तैः सह विवादो भवति यदा तदा स्वतर्केण तस्य मतं सभायां खण्डितमपि स्वीकरोति स्म। तस्यालौकिकं पाण्डित्यं सारल्यञ्च, निभाल्य सदैवाहं सश्रद्धं स्मरामि। अल्पविषया मे मतिर्विद्यासागरं दुस्तरं ततुंमिच्छति श्रद्धावाणीकुसुमेन समर्चयामि गुरुचरणान्, अनुगृह्णन्तु गुरुचरणाः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यज्ञस्वरूपं ज्ञानयज्ञश्च

—पं० गोविन्द-नरहरिवैजापुरकरः

अस्माकं गुरुवर्याः कैलाशवासिनो गोपालभट्टभट्टपादा अध्यापनप्रसङ्गे प्रासङ्गिकचर्चासु कथ[illegible]ति स्म यत् न्यायशास्त्रीयसतीर्थ्यवर्येषु स्वर्गीया द्वितीया अप्यद्वितीयाः श्रीवामाचरणभट्टाचार्या यथा [illegible]हीद-धावुच्छलत्प्रगाढतरङ्गकल्पास्तथैव श्रीपद्मप्रसादभट्टराईमहाभागाः किल प्रसन्नगभीरजलाशयकल्पा [illegible]न्याय-महासरसि। गुरुपादानामियमुक्तिः जनेनानेन तदैवाञ्जसा समनुभूता यदा तेषामसामयिककैलासवासान[illegible] मध्येमार्गमध्ययनान्तरायं परिलक्ष्य जनोऽयमवशिष्टं नव्यन्यायशास्त्राध्ययनं प्राचीनन्यायशास्त्रा[illegible]मु-भयोर्विदुषोरन्तेवासित्वं स्वीकृतवान्। अनुमिति-गादाधरीं पाठयन्तो भट्टाचार्यपादा नूनमनेन [illegible]येन न्यायमहोदधेरुच्छलत्प्रगाढतरङ्गा एव परिलक्षिताः। महर्षेर्वात्स्यायनस्य न्यायभाष्यं पठता तत्रापि चक्षुरिन्द्रि-यस्य एकत्व-प्राप्यकारित्वविषयनिरूपणावसरे शब्दशक्तिप्रकाशिकायाञ्च मण्डनमिश्र-प्राभाकरादिमतखण्डना-वसरे समालोकिता भट्टराईपादानां प्रसन्न-गभीर-वैदुष्यसमलङ्कृता निरूपणशैली चाद्यापि स्मृतिविषयतां भजते।

अखण्ड-ज्ञानयज्ञानुष्ठातारो भट्टराईपादाः !

नूनं भट्टराईगुरुपादैर्यावज्जीवमखण्डं ज्ञानसत्रं शिष्यानुग्रहाय परिचालयद्भिर्भगवतो नन्दनन्दनस्य 'श्रेयान् द्रव्यमयाद् यज्ञाज्ज्ञानयज्ञः परन्तप' इति वचनमक्षरशः समनुष्ठितम्। भगवत्पादैः श्रीमदाद्यशङ्कराचार्यैः श्लोकस्यास्य भाष्ये उक्तम्–'द्रव्यमयो हि यज्ञः फलस्यारम्भको ज्ञानयज्ञो न फलारम्भकः, अतः श्रेयान् प्रशस्ततरः' इति। एतेनेदं व्यज्यते यद् भट्टराईगुरुपादानामयमध्यापनात्मको ज्ञानयज्ञः सर्वथा निष्कामकर्माऽसीत्। ज्ञानयज्ञस्य माहात्म्यं साधुशिरोमणिभिर्ज्ञानेश्वरमहाभागैः श्लोकस्यास्य व्याख्याने ज्ञानेश्वर्यां यथा निरूपितम्, मन्ये तन्नूनमद्वितीयमेव। ते लिखन्ति-'अर्जुन ! यस्य मूलं वेदः कर्माधिक्येन यो हि वृद्धिङ्गतः, मदीयापूर्वतायाः फलं किल स्वर्गसुखम्, तादृशो द्रव्ययज्ञो निर्विचिकित्सं यज्ञ एव। तथापि नक्षत्राणां तेजो यथा सूर्यतेजस[illegible] न भजते, तथैव द्रव्ययज्ञा अपि ज्ञानयज्ञस्य साम्यापादनेऽसमर्थाः। पश्य, योगिनो हि परमात्मसुखस्वरूप-शेवधेः प्राप्तये नेत्रयोर्ज्ञानाञ्जनसंयोजनं न विस्मरन्ति। ज्ञानाञ्जनमेतद् दीर्घतमायाः कर्मयात्रायाः परिसीमा, नैष्कर्म्यबोधस्य निधिः, क्षुधार्तानां शाश्वततृप्तेश्च साधनमस्ति। तत्र प्रवृत्तिः खञ्जतां याति, तर्कस्य दृष्टि-र्नश्यति, इन्द्रियाणि किल विषयसङ्गं विस्मरन्ति, मनसो मनस्त्वं विलीयते, शब्दानां पाण्डित्यं वामनतां गच्छति, ज्ञातव्यमधिगम्यते, वैराग्यस्य दारिद्र्यं आकाशकुसुमायते, विवेकस्योत्कण्ठा कुण्ठिता भवति, अनायासञ्च आत्मस्वरूपं लभ्यते। काव्यच्छटालङ्कृतेन ज्ञानेश्वरमहाराजस्य ज्ञानयज्ञमाहात्म्येनानेन भट्टराईपादाः स्फुटं परिचिता आसन्। अत एव तैर्यावज्जीवमन्तेवासिनः पाठिताः, वैदुष्येण समलङ्कृताश्च। एतादृशानां पुण्य-स्मरणानां गुरुपादानां श्रद्धाञ्जलिसमर्पणप्रसङ्गेऽयं जनोऽपि सश्रद्धमिमं शब्दसुमाञ्जलिं समर्प्य तेषु कृतज्ञता-मभिव्यञ्जयति।

श्रद्धाञ्जलावस्मिन् ज्ञानयज्ञस्य यो महिमा समासतो वर्णितः, स तदैव महत्तरतां यायात्, यदा अन्येषां द्रव्ययज्ञानाम्, किं बहुना, यज्ञस्य महत्त्वं दृशोर्विषयीभवेत्। अत्र प्रसङ्गे यज्ञविषये किमपि शास्त्ररहस्यमा-विष्कर्तुं लेखनी मोहं नावृणोतीति तच्छन्दोवशीभूतोऽयं जनो नूनं क्षन्तव्यो विद्वद्वरैः 'अप्रासङ्गिकमेतदि'ति मनसा धारयद्भिः। अयं जनश्च इममपि गुरुपादानां श्रद्धाञ्जलिं मनुते। आस्तां तावत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मा... ...स्य स्थानम्—

... ...यसंस्कृतेर्मूलग्रन्थेषु वेदेषु यज्ञस्याऽतितरां महिमा समुपवर्णितो दृश्यते। श्रुतिर्भगवती वदति–

'इयं वेदिः परो अन्तः पृथिव्या अयं यज्ञो भुवनस्य नाभिः।
'यावती वै वेदिस्तावती पृथिवी।'

अर्थात्-दृश्यमाना पृथिवी किल वेदिस्तत्र च क्रियमाणो यज्ञो भुवनस्य नाभिः। विज्ञा जानन्ति देहे नाभेः कि...म् मूल्यमिति। तेन हि यज्ञस्य सुस्पष्टं महत्त्वम्। अन्यच्च—

'यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्'।
'यज्ञेन देवा दिवं गता यज्ञेन असुरानपानुदत'।
'यज्ञेन द्विषन्तो मित्राणि भवन्ति'।
'यज्ञे सर्वं प्रतिष्ठितम्'। 'तस्माद् यज्ञं परमं वदन्ति'।

एभिर्मन्त्रैः सुस्पष्टमेतद् यदमरैः सर्वैर्यज्ञद्वारा यज्ञपुरुषो विष्णुः समुपासित इति। सर्वप्रथमं स एव धर्मरूपेण आविरासीत्। यज्ञेनैव देवाः स्वर्गमधिवसन्ति। यज्ञेनैव शत्रवो मित्रतां गताः। किम्बहुना, यज्ञे सर्वमेव प्रतिष्ठितम्। तस्मादेव यज्ञः परमो धर्मः।

गीता–गायको भगवान् स्पष्टमेवाऽऽह—

'सह यज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्॥' इति।

शुक्लयजुर्वेदे तृतीयेऽध्याये इन्द्र-यजमानसंवादेन तु सुस्पष्टं जायते यत्तदा भूतलस्था जनाः स्वच्चेत्रे अनुपलब्धाः स्वर्गदुर्लभाश्च पदार्था यज्ञविधिना देवेभ्योऽधिगच्छन्ति स्मेति। तत्र यजमानो ब्रूते—

'वस्नेव विक्रीणावहा इषमूर्जशतक्रतो।' इति।

अर्थात्–हे शतक्रतो! आवां हविषः फलस्य च परस्परं क्रय-विक्रयं कुर्वः। अहं हविर्ददामि भवन्तश्च ...हं फलं प्रददतु। तत इन्द्रोऽवदत्-प्रथमं त्वं मे हविर्देहि, ततोऽहं फलं दास्ये। मत्पुरतो हविः संस्थाप्य पश्य ...दहं फलं दास्यामि न वेति—

'देहि मे ददामि ते नि मे धेहि नि ते दधे।' इति।

अत्रायमभिसन्धिः—यथा मनुष्येभ्यः स्वर्गीयफलान्यावश्यकानि तथैव प्रशासकस्य कृते प्रशासन-वशात् हविरावश्यकमित्थं यज्ञोऽयं देव-मानवयोः परस्परं व्यापारस्य भव्यमेकं रूपम्, येन स्वर्गे मर्त्ये च ...समानरूपेण सुव्यवस्था-साम्राज्यं प्रतितिष्ठति। बृहदारण्यकोपनिषदः (३–८) मन्त्रेणानेन एतत्सुस्पष्टं भवति—

यथा च यजमानं देवा ईश्वराः सन्तोऽपि जीवनार्थेऽनुगताश्चरु-पुरोडाशाद्युपजीवनप्रयोजनेन अन्यथापि जीवितुमुत्सहन्तः कृपणां दीनां वृत्तिमाश्रित्य स्थिताः। तच्च 'प्रशास्तुः प्रशासनात्' इति।

पुनश्च, उपनिषदः सृष्टिप्रक्रियां विलोकयन्तु, यत्र किल सुस्पष्टमुक्तं यद् यज्ञेन धूमद्वारा मेघो जायते, मेघेन वर्षा, वर्षात ओषधयः, ओषधिभ्योऽन्नम्, अन्नाद् रेतः, रेतसश्च पुरुष इति। एतेन सुस्पष्ट-मेतद् यद् यज्ञोऽयं मानवजीवनस्योपादानकारणम्। स्मृतिकारोऽपीदमेवानुवदति—

'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठति।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः॥' इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत एव गीताकारो यज्ञं सामान्यतः कर्मणो योनिमाह, यत्रायं कर्मलोकोऽधिष्ठितः—

'यज्ञाद् भवति पर्जन्यः पर्जन्यादन्नसम्भवः। अन्नाद् भवन्ति भूतानि यज्ञः कर्मसमुद्भवः' इति।

अत एव च कविकुलगुरुः कालिदासो महाराजस्य दिलीपस्य गुणवर्णनप्रसङ्गे ब्रूते, यद् देवराज इन्द्रः पृथिवीराजश्च दिलीप उभावपि लोकौ धारयतः—

दुदोह गां स यज्ञाय सस्याय मघवा दिवम्। सम्पद्विनिमयेनोभौ, दधतुर्भुवनद्वयम् ॥' इति।

यज्ञस्य व्यापकत्वम्—

इत्थं स्फुटमेतद् यज्ञः किल भारतीय-संस्कृतेः प्राणभूत इति। अत एव वेदेषु संहितात्मकेषु ब्राह्मणेषु उपनिषत्सु च अधीयतेऽस्माभिर्यत् मानवस्य समग्रं जीवनमेव यज्ञमयमिति। यदि स शास्त्रोक्तविधिना जीवनं यापयेत्तदा तज्जीवनं यज्ञमयं जायेत। छान्दोग्योपनिषदि (३.१६) उक्तमस्ति—

नूनं पुरुषस्य जीवनं यज्ञ एव। पुरुषायुषः आदिमानि चतुर्विंशतिवर्षाणि महायज्ञस्य प्रातः सवनम्, अग्रिमाणि चतुश्चत्वारिंशद्वर्षाणि माध्यन्दिनं सवनम्, ततः पराणि अष्टचत्वारिंशद्वर्षाणि तृतीयं सवनम्। ज्ञातव्यमेतद्यत् अग्निष्टोमादिश्रौतयज्ञेषु सवनत्रयं भवति, तदेवाश्रित्य उपनिषदि रूपितम्। इत्थं पुरुषायुषः षोडशोत्तरशतवर्षाणि यावत् प्रचलितोऽयं यज्ञः। यो हि पुमान् एतेषु त्रिषु कालखण्डेषु सवनभावनां भावयन् शास्त्रविहितं जीवनं यापयति स षोडशोत्तरशतवर्षाणि यावत् स्वस्थो जीवति, कथमप्यल्पायुर्न जायते।

छान्दोग्योपनिषदेव (५.७८) मानवोत्पत्तिं यज्ञरूपेण रूपयन् वदति यद् 'हे गौतम! पुरुष एवायमग्निः, तदीया वागेव समित्, प्राणो धूमः, जिह्वा ज्वाला, चक्षुरङ्गारः, कर्णौ विस्फुलिङ्गाः। तस्मिन्नेवाग्नौ देवा यजन्ति। तदाहुत्या वीर्यं जायत इति।

हे गौतम! स्त्री एव अग्निः। तदीयमुपस्थमेव समित्। पुरुषस्य तया सह उपमन्त्रणं (रहः-संलापो) धूमः। योनिर्ज्वाला। प्रसन्नं (मैथुनम्) हि अङ्गाराः। तत्र प्रतीयमानं सुखमेव विस्फुलिङ्गाः। तत्रैव अग्नौ देवाः वीर्यं जुह्वति। तत्रैव आहुत्या गर्भो जायत इति।

बृहदारण्यकोपनिषदि (६.२.८–१५) तु द्युलोक-पर्जन्य-पृथिवी-पुरुष-पत्नीष्वपि यज्ञभावना प्रदर्शिता। एतेषु यथार्थतो यज्ञत्वे भाविते अनुसन्धाता ब्रह्मलोकं याति जन्म-मरणबन्धात् प्रमुच्यते च।

शास्त्रेषु मानवीयनित्ययज्ञवत् प्रकृतेरपि नित्ययज्ञाः कल्पिता दृश्यन्ते। यथा—आकाशस्थः सूर्यो यज्ञकुण्डम्। तत्र स्थितं जलं हवनीयं द्रव्यम्। सूर्य एव स्वीयैः स्वर्णमयैः किरणैः प्राणिजातेभ्यो वनस्पतिभ्यश्च औष्ण्यं प्रकाशञ्च वितरन् जीवनशक्तिं प्रददाति। अत एव स्थावर-जङ्गमात्मकस्य जगत आत्मा सूर्यो वर्णितः— 'सूर्य आत्मा जगतस्तस्थुषश्च' इत्यादिना श्रुतिमात्रा।

इयं पृथिवी यज्ञकुण्डम्। तत्र बीजवपनमेव आहुतिप्रक्षेपणम्। यथा अग्नौ हुतं द्रव्यं भस्मीभूय देवैरासाद्यते, आसाद्य च प्रसन्ना भूत्वा ते विश्वकल्याणं समाचरन्ति, तथैव पृथिव्यां प्रक्षिप्तं बीजमपि मृदा संगतं सूर्य-जल-वाय्वादिदेवसाहाय्येन वृक्ष-लतादिरूपतां गच्छद् विविधपुष्प-फलादिद्वारा सर्वप्राणिनां शिवं वितनुते। तन्त्रानुसारेण विचार्यमाणे चिदग्नौ बिन्दोराहुतिः, योगदृष्ट्या कुण्डलिनी–समुद्बोधनम्, आगमशास्त्रानुसारमपरिच्छिन्ने विशुद्धचैतन्यात्मके निजस्वरूपभूतेऽग्नौ इन्द्रियसंवेद्यानां सर्वेषां विषयाणां हविर्भूतानामिन्द्रियद्वारा प्रक्षेपः-सर्वमेतद् यज्ञस्य रूपम्। इत्थं सृष्टेरणुरेणुषु यज्ञस्य व्याप्तिं विलोक्य, सर्वोऽपि विश्वसिति यत् 'सर्वं यज्ञमयं जगत्' इति।

एतादृशस्यैव महायज्ञस्य सीमा ज्ञानयज्ञो नाम। यदनुष्ठातॄणां भट्टराईपादानां श्रद्धाञ्जलिप्रदानावसरे चर्चितोऽयं विषयः सादरं तच्चरणेषु समर्प्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मान्यानां गुरूणां विद्यानुरागस्यैकमुदाहरणम्

—डॉ० देवराजपौड्यालः

श्रीमन्तः पूज्यचरणाः श्रीगुरवः पद्मप्रसादमहाभागाः स्वस्य चरमे वयसि दैवोपपादितेन पक्षाघातेन रोगेणाचलद्वामाङ्गाः पत्नी-पुत्र-शिष्यादिभिः कथञ्चित्कारितावश्यककृत्याः शिथिलसर्वावयवाः, हन्त ? शयनीये [illegible]याना एवाभूवन् ।

[illegible] विद्या[illegible] छात्रावासकृत्यमध्यापनं च समाप्य हस्ते किमपि फलादिकं गृहीत्वा तेषां दर्शनाय प्राय उपतिष्ठन् आ[illegible]व्यवस्थायां ते प्रसन्नवदना दृश्यन्ते स्म ।

अहं पूर्वं चरणयोः प्रणम्याऽऽनीतं भोजयित्वा पीडितान् तच्छरीरावयवान् मर्दयन्नतिष्ठमेकस्मिन् दिवसे । तदा तेऽकथयन्—"देवराज ? अहं खल्वस्य जन्मनो जन्मान्तरस्य वा दुष्कर्मणां प्रायश्चित्तरूपामिमां रोगबाधां प्रसन्नेनैव हृदा सहमानोऽस्मि । सहिष्ये च यावदायुः ।

तथापि मम कृते दिनयापनमतिकष्टप्रदम् । त्वं विदुरो वान्यो वा कश्चनाध्यापको यदागच्छति तदा सुखं यापयामि दिवसम् ।

यस्मिन् दिने कोऽपि नागच्छति, तदा परिवाराणां बालानां च भोजनाच्छादनादिचिन्ताप्रधानेन निरर्थकेन प्रसङ्गेन कर्णयोः शूलाभ्यामिव विद्ध्यमानस्तिष्ठामि । न्यायवेदान्तविद्ये मया सम्यगभ्यस्ते । नैतयोर्धर्मशास्त्रेषु च मम कृते पुस्तकदर्शनस्यावश्यकताऽस्ति । तत्प्रस्तूयतां कुतोऽपि शास्त्रवादः । यत्र मम हृदयं नितरां प्रसीदति ।

अथवा यां काञ्चन विद्यां मत्तः पठतु भवान् । तथा कृते ऽनिवार्यता च भवति तवेहागमनस्य । येनाहं सुखं दिनानि यापयिष्य' इति ।

ततोऽहं तेषामाज्ञया कारिकावलीं पठितुं प्रवृत्तः सहर्षम् ।

हस्ताभ्यां रोगपीडितानि तदङ्गानि निपीडयन्, कर्णाभ्यां गुरोर्वचांसि शृण्वन् बुद्धयार्थतत्त्वमनुप्रविशन्, तादृश्यामवस्थायां गुरोर्विद्यानुरागं निध्यायन्, मनस्तच्चरणारविन्दयोः समर्पयन्नधीतवान् ।

मध्ये-मध्ये पाठावसाने चापृच्छं गुरुचरणानपहायोत्तरयितारमपरमपश्यन् ।

तदानीमेव पृष्टानां प्रश्नानां निर्विकल्पकं मनोमोदयितृ चोत्तरं ते ददति स्म ।

प्रभाव-शालिनी निर्णय-शक्तिः, बहूनां ग्रन्थानां दीर्घकालिको नैरन्तरोऽभ्यासः, तपोमयं तेषां जीवनं, चैतानि स्मर्यमाणानि हृदाकर्षयन्ति मामकम् ।

एवं गच्छत्सु कतिपयेषु मासेषु २०३० तमे वैक्रमाब्दे माघे मासि दिवसे गुरोः प्रयाणाभिमुखां प्रवृत्तिमवलोक्य भीत-भीतैः पार्श्वस्थितैः पुत्रभातृव्यशिष्यादिभिर्गैरीधारास्थितस्य गुरुगृहस्य द्वितीयखण्डाद् भूतलेऽवतार्य ते स्थापिताः ।

तदनु च वाराणसीनयनचर्चा गुरुपत्न्या प्रवर्तिताः । अहं त्वरितं तदानीन्तनप्रधानमन्त्रिणो श्रीनगेन्द्रप्रसादरिजालस्यावासं गत्वा गुरोः प्रयाणाभिमुखतां वाराणस्यां देहविसर्जनेच्छां च तदीयां सूचितवान् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेन निर्दिष्टस्तदानीन्तनः शिक्षामन्त्री श्रीकृष्णराज-अर्ज्याल-महाभागः चतुःसहस्रमितानि रूप्या... ...तम-कृत्याय दत्तवान् ।

ततस्त्वरितं सूचिता वाल्मीकि-विद्यापीठस्था अध्यापका अल्पेनैव कालेनोपस्थिताः । सर्वेषां परामर्शतो गुरोर्जीवितावस्थायां वाराणसी-प्रापणमशक्यं मत्वा पशुपतेः पादमूलं प्रति गुरवः प्रस्थापिताः ।

तत्राऽऽर्यघट्टस्थायां धर्मशालायां तान् स्थापयित्वाऽऽदिनं पण्डिताः भगवद्गीतादीनां पा[illegible]नश्रावयन् । रात्रौ द्विवादनसमये गुरूणां नाडिपरीक्षणे कूर्परगतां तनीयसीं तामुपलभ्याऽयमेव कालोऽ[illegible]दानस्येति गुरुपत्न्योपस्थापितैर्गो-सुवर्ण-तिल-द्रव्य-वस्त्रादिभिर्दशमहादानानि पददानमष्टदानं च कारयित्वा वैत[illegible]-क्रियां च सम्पाद्यावश्यककरणाय परस्मिन् दिने प्रातः पञ्चवादनेऽहं निर्गतवान् ।

तस्मिन्नेव दिवसे दिवा द्विवादनसमये वाग्वत्या जलेनाक्लिन्नं तत्तटे शायितं पीतवाससाऽऽच्छा[illegible] रोगमन्दिरं जीर्णमपि तदवधि प्रभावप्रोज्ज्वलं मर्त्यं देहं विसृज्य पुण्यं प्रियेष्वपुण्यमप्रियेषु [illegible] सायुज्यमलभन्त । [illegible]र्यं

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुः साक्षात् परं ब्रह्म तस्मै श्रीगुरवे नमः ॥

श्रीभट्टराईमहाभागाः

—पं० श्रीकृष्णपन्तः

पण्डितप्रवरश्रीपद्मप्रसादभट्टराईमहाभागा महान्तो नैयायिका आसन् । तेषां बहवः शिष्याः कालक्रमादिदानीं न स्मर्यन्ते । तेषु राजनारायणत्रिपाठिप्रभृतयः स्मर्यन्ते । तेषां साहित्येऽपि महानधिकार आसीत् । तेषां कतिचन लेखा अपि स्मृतिपथं दृष्टिपथमुपनीताः सन्ति । कविता अपि ते अमरभारतीवल्लरीप्रभृतिषु पत्रिकासु समस्यापूर्त्तिरूपेण प्रकाशयन्ति स्म । संस्कृतभाषणमप्यस्माभिः श्रुतम् । तदतीव मधुरं गम्भीरञ्चासीत् । धर्मशास्त्रेऽपि तेषां प्रौढिरासीत् । ते महानुभावा मृदुभाषिणस्सरलमानसा अप्यासन् । गोयनकासंस्कृतमहाविद्यालय-प्रबन्धकपदमधितिष्ठन्विश्वनाथपुस्तकालयाध्यक्षतामावहयन्नहं यावज्जानामि तावत् समर्पयामीति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'हार्दिकीं कृतज्ञतां बिभर्मि'

—पं० श्रीकृष्णमिश्रः

२०४०।६।५।४तमे दिवसे जनकपुर-धामस्थित'मुरलीसर'समीपवर्त्ति-'संन्मार्गसंस्कृतविद्यालये' समागतानां डा० स्वामिश्रीप्रपन्नाचार्याणामाज्ञां स्वीकृत्य गुरुवरपण्डितप्रकाण्ड स्वर्गीयपद्मप्रसादभट्टराईपादपद्मयोः [illegible]त्तदीयपुण्यावहसंस्मरणं यथामति विलिख्य सविनयं श्रद्धाभक्तिपूर्वकं समर्पयामि ।

[illegible] वि[illegible]४७तमे ख्रिष्टाब्दे गुरुवरपण्डितप्रकाण्डपद्मप्रसादोपाध्यायभटटराईमहोदयेभ्यः काशीस्थ-गोयं[illegible]महाविद्यालये 'अवच्छेदकत्वनिरुक्ति'नामकं नव्यन्यायग्रन्थं व्यधिकरणनामकग्रन्थस्यापि कांश्चिद्[illegible]नहमध्यगीषि ।

नव्यन्यायग्रन्थसंलापन-च्छात्रबोधनशैली तेषामतिविलक्षणाऽऽसीदिति मयाऽवधारितमस्ति, तेषां हार्दिकीं कृतज्ञतां बिभर्मि ।

एकदा तत्समीपे समागत्य केनचिज्जनेन कस्यचन नव्यन्यायग्रन्थप्रणेतृविदुषश्चर्चायामनुष्ठितायां तदीयजीवनाभिजनग्रामपरिवारादिविषय-जिज्ञासां विज्ञाय गुरुचरणा यदवोचन् तदद्यापि मम स्मृतिपथे तिष्ठति ।

'वयं ग्रन्थकर्तृणां क्व जनिभूः कति पुत्राः, कः पिता…? का माता…? कियन्त्यः पत्न्यः ? इत्यादि नानुसन्दध्मः तैरुल्लिखितेषु प्रतिपादितेषु विषयेष्वेव विवेचनं कुर्म्म' इति ।

अध्ययनसमयस्य पश्चादपि जनकपुर-धाम्नि, काष्ठमण्डपे च धर्मशास्त्रे, कर्मकाण्डे, राजनीत्याञ्च [illegible]र्चायां कृतायां तत्तद्विषयेऽपि तदीयविचारगाम्भीर्यमहमन्वभूवम् ।

निर्दलीयपञ्चायताभिधप्रजातन्त्रप्रणाल्यां प्रवृत्तायां मया स्वनिर्मितपञ्चलक्षणेषु श्राविते‌षु, पर्याप्त्याऽपेक्षितमेतल्लक्षणमिति तैरुक्तमासीत्…। तद्धि लक्षणात्मकं पद्यम्—

"सत्यनिष्ठा, श्रमस्त्यागो, राजभक्तिश्च सुस्थिरा ।
देशसेवारतिश्चैव पञ्चायत-सदस्यता ॥" इति

तत्र सुस्थिरेति पद्यमर्थवशाद्वचनविपरिणामपूर्वकं सर्वत्रान्वेतीति मदुक्त्यनन्तरं गुरुवराणां 'पर्याप्त्याऽपेक्षितमिदं लक्षण'मित्युक्तिः सर्वदा स्मर्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दार्शनिकसार्वभौमश्रीपद्मप्रसादभट्टराईमहाभागानां पुण्यस्मृतयः

—पं० गणेशझाः

परमपुरुषार्थसाधनानि दर्शनशास्त्राणि न साधारणैर्जनैरवगम्यानि, व्युत्पन्नैरपि महता श्र[illegible]णापि दुरधिगम्यान्येव। तत्रापि तर्ककर्कशनव्यन्यायशास्त्रन्तु सुबोधैरपि जनैर्दुरधिगम्यमेवेति नात्र वैमत्यं विदुषाम्।

किन्तु दर्शनशास्त्रमर्मज्ञानां श्रीपद्मप्रसादभट्टराईमहाभागानां दर्शनशास्त्रीयपदार्थजातं करत[illegible]मलकमिव प्रतिभाति स्म। नव्यन्यायशास्त्रेऽद्वैतवेदान्तशास्त्रे च ग्रन्थग्रन्थिविस्फोरणे छात्राणां[illegible]व [illegible]ीयं काचनाऽपूर्वैव शक्तिरासीत्। सौजन्यसम्पदा पाण्डित्य-प्रकर्षेण च विदुषश्छात्रांश्चानुगृह्णन्ति स्म।

एतैरेवाऽलौकिकासाधारणगुणैर्विद्वत्समाजेषु छात्रसंसदि च नितान्तं ख्यातिमागताः। वाराणस्या मारवाडी-संस्कृतमहाविद्यालये तदनु जोषीराम-मटरूमल-गोयनका-संस्कृतमहाविद्यालये च नव्यन्यायाध्यापकपदमलङ्-कुर्वन्तो भूयसश्छात्रान् व्युदपादयन्। पश्चात् वाराणसेयसन्न्यासिसंस्कृतमहाविद्यालयाध्यक्षैः सम्प्रार्थितास्तदीय-संस्कृतमहाविद्यालये प्रधानाचार्य्यपदं भूषयन्तस्समासन्। ततो विख्यातेनैव पाण्डित्येन नेपालराज्ये त्रिभुवन-विश्वविद्यालयान्तर्गतश्रीवाल्मीकिविद्यापीठे प्रधानाचार्य्यपदमलङ्कुर्वन्। एतैश्च महाभागैरध्यापिता व्युत्पा-दिताश्च विद्वांसोऽद्यापि भारतस्य दिग्विदिक्षु तदीययैव शैल्याच्छात्रानध्यापयन्तो महाभागानामेषां भूयांसि यशांसि विस्तारयन्ति, ख्यापयन्ति च तदीयपाण्डित्यप्रकर्षम्। तत्स्मरणेन नितान्तमहं प्रसीदन् विरमामि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पावनी स्मृतिः

—पं० लोकमणिदाहालः

पद्मासनाबद्धहृदे प्रपन्नपद्मासनस्थाय सपद्मजाय ।
पद्मासपत्न्यर्थितमानसाय पद्मप्रसादाय नुतिर्मदीया ॥

अस्ति तत्रभवतां श्रीमतां गुरुपादानां पद्मप्रसादमहोदयानां पुरातनी स्मृतिरस्मन्मनःपटले । स्मर्यते यत्तत्र[illegible]न्ता महनीयमहिमानो गुरुचरणा वाराणसीतः काष्ठमण्डपं प्रत्यागच्छन्त आसन् । नेपालराजकीयसंस्कृत-महा[illegible]द्यालयस्य तत्कालं प्राचार्यपदमलङ्कुर्वाणास्तत्रभवन्तो महामहिमशालिनो विद्वद्वराः पण्डितराजपदभाजः सो[illegible]नाथसिग्द्यालमहोदया अस्मानसूचयन्, यद्विदितसकलशास्त्रसारा नैयायिकानां धुरि कीर्तनीयाः पद्मप्रसाद-[illegible]भागाः भूयो जन्मभूमिमलङ्कुर्वाणाः सन्तीति । छात्रभावादस्मासु महत्कुतूहलं सञ्जातं तत्रभवतां चरण-[illegible] विद्या[illegible]पवित्रीकर्तुम् । विस्मृतौ तिथिवारौ च यदा तत्रभवन्तो गुरुचरणा महाविद्यालयं सनाथीकृतवन्तः । सर्वे [illegible]र्शनेन कृतकृत्या अभूवन् । तत्रभवतां सौम्याकृत्या मृदुवचसा च प्रभाविताश्छात्राः परस्परमेव-मालापमकुर्वन् ते विद्वांसो ये खलु स्वविनयेनाविनीतानपि सौम्यीकुर्वन्तीति । अहं खलु बाल्यचापल्यवशात् तत्रभवतामग्रत आत्मानमुपास्थापयम् । तैः पृष्टं—कस्त्वमसीति । मया निवेदितं यदहमेको भवतामन्तेवासीति । तैरनुयुक्तं कस्यां कक्षायां पठसीति । मया सम्पूर्णमध्यमायां साहित्यविषयावलम्बी छात्रोऽस्मीति निवेदितम् । प्रार्थितञ्च मया यदहं तर्कसङ्ग्रहं विपठिषुर्भवद्भ्य इति । प्रथमन्तु तैर्नोरीकृतमादिष्टञ्च कक्षाध्यापकसकाशादेव पठनाय । बहुप्रार्थितास्तत्रभवन्तः प्रसन्ना अभूवन् । तैः स्वीकृता च मम प्रार्थना, प्रारब्धञ्च पाठनाय ।

अथैकदा बाल्येन मया निवेदितं यदहं छात्रवृत्तिकामस्तत्र भवन्त एव प्रमाणमिति । तैरुक्तम्-न वयमध्यक्षा अध्यक्षं पृच्छेति ।

व्यतीतः कालः । परीक्षा समाप्ता । प्राप्तसाफल्योऽपि नियमिताध्ययनं प्रवर्त्तयितुमशक्तोऽप्यहं समये [illegible]समये तत्रभवतां दर्शनेनात्मानं पवित्रीकर्तुं महाविद्यालयं गच्छन्नभूवम् । अनन्तरं तत्रभवन्तः प्राचार्यपदं [illegible]चालङ्कृतवन्तः । धन्यास्ते छात्रा ये तदध्यक्षतायां पठनावसरमलभन्त ।

यदा कदाप्यहं तत्रभवतां दिदृक्षुस्तदावासभवनं चागमम् । तत्रैकदा मया प्रार्थिता गुरुचरणा यत्स्वीयमगाधज्ञानं पुस्तकाकारेणोद्घाटनीयमिति । तेऽब्रुवन्-यदस्ति प्रकाशितं तस्यैवाप्यध्ययनाय छात्रा नालम्, कोऽर्थो नवीनग्रन्थवर्द्धनेनेति ।

चरमे वयसि सरस्वतीप्रसादलब्धसर्वसिद्धयोऽपि ते पद्मप्रसादाभावेन किञ्चिच्छारीरिककष्टमप्यन्व-भूवन् । [illegible]आक्रान्ताश्च पक्षाघातरोगेण । किन्तु प्रसादसौम्या तेषां मुखाकृतिस्तु सदोज्ज्वला महिमशालिन्येवातिष्ठत् । कलेवरे व्याधिग्रस्ते सत्यपि सदा पठनपाठनोद्यतास्तत्रभवन्तो महानुभावाः कृताध्येतृसाहाय्या आसन् ।

धन्या खलु नेपालभूमिर्या विद्याविनयसम्पन्नमेतादृशं पुत्ररत्नमजीजनत् । सनाथिताश्च तत्र भवद्भि-र्बहवश[illegible]त्रा ज्ञानार्थिनोऽध्येतारश्च । कृतप्रकाशो न्यायमार्गः सहैवेतराध्वभिः । तद्विरहेण दग्धहृदया वयन्तेषा-मन्ते[illegible]नः सहैवाखिलसमानचित्तवृत्तिभिस्तत्रभवतां गुणकीर्तनेनात्मानं पावयन्तः स्मृतिपद्यमिदं गायामः—

पद्मपत्रनिभः पद्मप्रसादः पद्महृन्मुदा ।
पद्मासनेन सायुज्यं प्राप्तवान् पद्मजेन[1] हि ॥

१—ब्रह्मसायुज्यमलभतेत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पण्डितप्रवराणां श्रीपद्मप्रसादमहोदयानां संक्षिप्तं जीवनचरित्रम्

—पं० ताराप्रसादोपाध्यायः सुवेदी

पण्डितपद्मप्रसादमहोदयस्य जन्म १९५३ विक्रमाब्दे वैशाखमासस्य शुक्लपक्षे द्वादश्यां तिथौ शुभवासरे नेपालाधिराजस्य जनकपुराञ्चलान्तर्गतस्य रामेछापप्रदेशस्य सालु-सामलीस्थान-नामके ग्रामे शुभब्राह्मण-कुले बभूव।

पद्मप्रसादमहाशयस्य पितुर्नाम श्रीदीनानाथस्तस्य मातुर्नाम कृष्णमाया चासीत्। प... स्वल्पे वयसि अस्मरीरोग पीडितं पद्मप्रसादं तत्पिता चिकित्सार्थं काष्ठमण्डपमानयत्। आङ्ग... चिकित्सालये कश्चिदाङ्गलश्चिकित्सकः शल्यक्रियया तं रोगं निर्मूलयितुं सफलोऽभवत्।

चिकित्सार्थं काष्ठमण्डपागमनात् पूर्वमेव पद्मप्रसादस्याक्षरारम्भस्तत्पितामहेन श्रीकान्तमणिशर्मणा कारित आसीत्। तत्पितामहस्य श्रीकान्तमणेर्ज्येष्ठभ्रातुर्लक्ष्मीनारायणस्य पुत्रो जीवनाथः काष्ठमण्डपे पद्मप्रसादस्य शिक्षायाः प्रबन्धमकरोत्। बाल्यकालादेव पद्मप्रसादस्याध्ययने महत्यभिरुचिरासीत्।

१९६४तमख्रिष्टाब्दे पद्मप्रसादस्तीनधारा-संस्कृतछात्रावासे प्रविष्टः। तस्मिन्नेव वर्षे तस्य प्रथमो विवाहश्च सम्पन्नः। श्रीमोदनाथादध्यापकाल्लघुकौमुद्याः पण्डितराज-श्रीसोमनाथ-सिग्देल-महोदयात् काव्यस्य च शिक्षां लब्धवान्। पद्मप्रसादस्य शास्त्रोपयोगि-व्युत्पत्त्याधायकस्तु पराजुलीत्युपाह्वयो देवीदत्तमहाशय आसीत्।

तत्पश्चात् राजकीयप्रधानपाठशालायास्तात्कालिक-प्रसिद्धवैयाकरणात् प्रधानाध्यापकात् श्रीविष्णु-हरिरिमालमहोदयाद् व्याकरणशास्त्रस्य शिक्षामलभत।

पद्मप्रसादोऽध्ययने परिश्रमी तथा विचक्षणबुद्धिश्चासीत्। वाराणसीं गत्वा व्याकरणस्य मध्यमां परीक्षां दत्तवान्, तस्यां प्रथमश्रेण्यां समुत्तीर्णश्च। कलकत्तायाः साहित्यस्य मध्यमपरीक्षायामपि द्वितीयश्रेण्यां समुत्तीर्णः। प्रथमधर्मपत्न्या निधनेन द्वितीयो विवाहश्च पुनः सम्पादितः।

संस्कृतपाठशालायां राजगुरोर्हेरम्बराजस्य पुत्रः श्रीखगेन्द्रराजोऽपि श्रीविष्णुहरेरध्यापकस्य छात्र आसीत्। सोऽपि आत्मन एव कक्षायां तादृशं प्रतिभाशालिनं छात्रं समुपलभ्याधिकं तुतोष। गुरोर्विष्णुहरे रिमालस्येच्छया स्वस्यैव निवासस्थाने पद्मप्रसादायावासस्थानं प्रायच्छत्। राजगुरोर्हेरम्बराजमहोदयस्य निवासस्थान एकः पुस्तकालयश्चासीत्। तस्मिन् पुस्तकालये च बहूनि संस्कृतस्य ग्रन्थरत्नान्यासन्। तेषां पुस्तकानां रक्षणभारः पद्मप्रसादस्यैव स्कन्ध आपतितः। एवञ्च स बहूनां पुस्तकानां दर्शने पठने च स्वातन्त्र्य-मुपलब्धवान्। व्याकरणस्य साहित्यस्य च मध्यमां परीक्षां समुत्तीर्णोऽपि स विविधशास्त्राणां कठिनान् ग्रन्थान् बोद्धुं नाशक्नोत्। अतृप्ता एव तस्य जिज्ञासा मनसि-अलीयत।

दैवगत्याध्यापकस्य विष्णुहरे रिमालस्यापि सांसारिकी लीला समाप्ता। गुरोर्निधनेन पद्मप्रसादस्य व्याकरणशास्त्रस्याध्ययनेच्छाऽपि गलिता। मनसि च दर्शनशास्त्रस्याध्ययनेऽत्युत्कटोऽभिलाषः समुत्पन्नः। स्वकीयमभिप्रायं सतीर्थ्यं राजगुरुपुत्रं श्रीखगेन्द्रराजं न्यवेदयत्। राजगुरुपुत्रोऽपि पद्मप्रसादं गृहीत्वा सहैव काशीमगच्छत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मिन् समये काश्यां म. म. श्रीकैलाशचन्द्रशिरोमणेः शिष्यस्य म. म. श्रीवामाचरण-भट्टाचार्यस्य दर्शनशास्त्रे महती प्रसिद्धिरासीत्। श्रीखगेन्द्रराजो विद्यार्थिना तेन पद्मप्रसादेन सह श्रीवामाचरणभट्टाचार्यस्य निवासस्थानं प्राप्तः। भट्टाचार्येण सह पद्मप्रसादस्य परिचयं कारयित्वा छात्रवृत्तेः प्रबन्धं च विधाय स काष्ठमण्डपमेव प्रतिनिवृत्तः।

तदनन्तरं पद्मप्रसादः पठनाय श्रीभट्टाचार्यस्य सेवायामुपस्थितवान्। भट्टाचार्यश्च विद्यार्थिनं तं पद्मप्रसादं [illegible] किमर्थमागतोऽसि किंवा पठितुमिच्छसीति किमपि नापृच्छत्। एवं च दशदिनानि व्यतीतु[illegible]। तथापि स गुरुगृहगमनकार्यं नियमेन पालयति स्म। एकदा भट्टाचार्यो मधुरस्वरेण पद्मप्रसादं पाठनायाह्वयत्। तदाप्रभृति भट्टाचार्यस्य शिष्यत्वं स्वीकृत्य न्यायशास्त्रस्य पठने संलग्नः। १९७४ तम-[illegible]माब्दे न्यायशास्त्रस्य मध्यम-परीक्षायां प्रथमश्रेण्यां समुत्तीर्णः।

[illegible] विद्या[illegible]७८ तमविक्रमाब्दे पितुस्तथा १९७९ तमविक्रमाब्दे द्वितीयधर्मपत्न्याश्चापि निधनमभूत्। एवं दैवे [illegible] कृतं पात [illegible] नसि धैर्यं समालम्ब्य पठनकार्यात् स्वल्पमपि विचलितो नाभूत्। विद्याध्ययने दत्तचित्तः पद्म-प्रसादस्त्रीणि वर्षाणि यावत् मातुर्दर्शनायापि गृहं नागच्छत्। पुत्रवत्सला माता तं गृह आगमनाय पुनः पुनः गृहात् पत्रं प्रेषयामास।

नेपालात् श्रीखगेन्द्रराजमहोदयोऽपि "अहं काशी मागच्छन्नस्मि। अस्मिन् वर्षे भवता मया सह बम्बईनगरे गन्तव्य"मित्यलिखत्। एकदा गुरुणा भट्टाचार्येण चोक्तम् "पद्मप्रसाद ! अस्य वर्षस्यावकाश-समयेऽहं स्वगृहं बङ्गदेशं गच्छामि, तदा त्वयापि मया सह गन्तव्यम्, मार्गे त्वं मम सहायको भविष्यसि, तदा तत्र गतस्य तव स्वाध्यायश्च गृहे भविष्यतीति। इत्थं पद्मप्रसादस्याग्रे तुल्यबलविरोधाख्यो विषयः समुपस्थिताः। अन्ते च "शिवेरुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन" इत्यवधार्य गुरुणा भट्टाचार्येण सह बङ्गदेशमेवागच्छत्।

तदानीं न्यायदर्शनस्योच्चतराणि पुस्तकानि देवनागरीलिप्यां नासन्। तानि बङ्ग-मैथिल-कर्नाटक-लिपि-ष्वेव मिलन्ति स्म, अतो लिपीनां तासां ज्ञानमपि, आवश्यकत्वेनोपस्थितम्। लिपीनां ज्ञानं विधाय पुनः स्वाध्याये संलग्नः सुयोग्यं गुरुमुपलभ्य पद्मप्रसादस्य प्रतिभा प्रतिदिनमवर्धत। १९८० तमविक्रमाब्दे न्यायविषये वाराणसेय-परीक्षायां प्रथमश्रेण्यामाचार्यपदवीं लब्धवान्। तत्पश्चात् १९८३ तमविक्रमाब्दे म. म. डा० गोपीनाथ-कविराजस्य सान्निध्यं समुपलभ्य न्यायवैशेषिकयोः पोष्टाचार्यस्य पदवीं प्राप्तवान्। स्वाध्यायार्थं काशीमधिवसता श्रीपद्मप्रसादमहोदयेन म. म. श्रीलक्ष्मणशास्त्रिद्रविडाद्-वेदान्तस्य श्रीनित्यानन्दपर्वतीयाद् धर्मशास्त्रस्या-ध्ययनेऽवसर उपलब्धः।

१९८२ तमविक्रमाब्दे बाबुरामाचार्यस्य पुत्र्या सह तृतीयो विवाहः सम्पन्नश्चासीत्। सापि पुत्ररत्नमेकं श्रीरामचन्द्राभिधेयं विसृज्य १९८६ तमविक्रमाब्दे दिवं गता।

पुनश्च चतुर्थो विवाहः कृतः। तस्याञ्च धर्मपत्न्यामेका पुत्री जाता, सा पत्न्यपि दैववशात् स्वल्पेनैव कालेन त्रिदिवं गता। ततश्च पञ्चमोऽपि विवाहः कृतः। अस्यां धर्मपत्न्यां सन्ति चत्वारः पुत्राश्चतस्रः पुत्र्यश्च। २००० तमविक्रमाब्दे च मातुः कृष्णमायादेव्याः काश्यां मुक्तिरभूत्।

१९९८ तमविक्रमाब्दे काश्यामेव मीरघट्टस्थिते मारवाडीसंस्कृतमहाविद्यालये न्यायशास्त्रस्य प्राध्यापकपदमलंकृत्य प्राध्यापयत्। तदनन्तरं २००३तमविक्रमाब्दे गोयनकामहाविद्यालये न्यायशास्त्रस्य प्राध्यापकः सञ्जातः, इत्थमेव संन्यासिसंस्कृतमहाविद्यालये (अमपारनाथमठे) साधुबेला संस्कृतमहाविद्यालयेऽपि प्राधानाचार्य्यपदमलङ्कृतवान्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रखरपाण्डित्येन तथाध्यापनकौशलेन चाचार्यवर्यस्य पद्मप्रसादस्य दर्शनशास्त्रे धुरन्धरेषु विद्वत्सु प्रसिद्धिर्जाता । भारतस्य पूना-मद्रास-कलकत्ता-बम्बई-प्रभृतिमहानगरेभ्यो विदुषां सभासु सादरमामन्त्रणा[illegible] श्रीपद्म [illegible]चागच्छन्ति स्म । तत्र गत्वा सहर्षं भट्टराईमहोदयेन दत्तः शास्त्रसम्मतनिर्णयश्च विद्वत्सभा स्वीकरोति स्म । श्रीपद्मप्रसादस्य वैदुष्येण तथाद्भुततर्कशक्त्या च संतुष्टाः काशिकाः पण्डिताः २००८ तमविक्रमाब्दे पण्डितवर्यं श्रीपद्मप्रसादं न्यायरत्नोपाधिनाऽलञ्चक्रुः । क्रमशः काश्या नेपालिविद्याधर्मप्रचारिणीसमितेः सभापतिपदे तथा गीर्वाणवाग्वर्धिन्याः सभायाश्च विशिष्टमध्यस्थपदे च स्थापितवन्तः ।

२००७ तमविक्रमाब्दे नेपाले प्रजातन्त्रस्योदयो जातः । श्री ५ महाराजाधिराजत्रिभुवनवीरविक्रमस्य करकमलेन नेपालराजकीय-संस्कृत-महाविद्यालयस्य स्थापना जाता । २००९ तमविक्रमाब्दे नेपाल-राजकीय-शिक्षाविभागः पण्डितवर्यं पद्मप्रसादमहोदयं संस्कृतमहाविद्यालयस्य सेवार्थं नेपाल आगमनाय सादरं समाहू[illegible] स्वमातृभूमौ संस्कृतस्यैव सेवार्थं समाहूतः षट्पञ्चाशद्वर्षमितेऽपि वयसि महात्मा समुत्कण्ठया स[illegible]मागच्छत् । आगत्य च २००९ तमविक्रमाब्दाद् वाल्मीकिसंस्कृतमहाविद्यालय उपप्रधाना[illegible]श्चात् प्रधानाचार्यस्य च पदं समलंकृत्य प्राध्यापयन् तस्य कार्यभारमवहत् । २०१६ तमविक्रमाब्दात् [illegible] तम-विक्रमाब्दे पर्यन्तं त्रिभुवनविश्वविद्यालयस्य संस्कृतविभागेऽध्यक्षस्तथा २०१९ तमविक्रमाब्दस्य चैत्रात् २ २० तमाब्दाषाढमासपर्यन्तं कलाविभागे डीनेतिपदमवाप्य विरराज । २०२३ तमविक्रमाब्दे श्री ५ महाराजाधिराज-महेन्द्राद् द्वितीयश्रेण्या गोरखादक्षिणबाहुरिति पदवीं प्राप्तवान् । ततो धर्मसभामण्डलस्योपसभापतिः, राज-सभाया अस्थायिसमितेः सदस्यश्चाभवत् ।

तत्रभवतः पण्डितप्रवरस्य पद्मप्रसादस्य प्रभूता नैपालका भारतीयाश्च विद्वांसः शिष्याः स्वविद्यया जगदाह्लादयन्ति ।

२००२तमविक्रमाब्दे पाशुपतक्षेत्र आयोजितस्य महारुद्रयागस्य प्रमुखाचार्यत्वेन यज्ञकार्यं सञ्चालयन्तं पद्मप्रसादं दैवगत्या यज्ञमण्डप एव पक्षाघातो रोग आक्रामत् । श्रीपशुपतेरसीमकृपया चिकित्सकानां परिश्रमेण श्री ५ महाराजाधिराज-महेन्द्र-वीरविक्रमस्यार्थिकसाहाय्येन च जीवनं लब्धवान् । किन्तु शरीरस्य वामभागो निष्क्रियः संजातः । स्वस्थतायाः कामनां कुर्वन्नपि २०३० तमविक्रमाब्दे पौषमासस्य २५ तमे दिवसे बुधवासरे ७८ तमे वयसि पाशुपत-क्षेत्रे आर्यघट्टे श्रीनारायणं कदाचन श्रीशङ्करञ्च संस्मरन् मोहमनाप्नुवन्नेव स्वपाञ्चभौतिकं शरीरं संत्यज्य, ईशसायुज्यमलभत । पूज्यचरणस्य श्रीपद्मप्रसादमहोदयस्य पत्नी पुत्राः पुत्र्य-श्छात्राश्च वियोगव्यथया पीडिता निःसहायाश्च संजाताः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पद्मप्रसादः सदा प्रतिभाति

—जनकलालशर्मा

•

नैवं सदा उत्पद्यन्ते पद्मप्रसादसदृशा विद्वांसः। यश्च विद्वान् न केवलं आर्यावर्त्तान्तर्गते नेपाले किन्तु पूर्णमार्यावर्त्तं तत्परञ्च देशं स्वयशसा व्याप्नोत्। कालेऽस्मिन् जातोऽपि सार्वकालिकः। न्यायशास्त्रं वा किमपि शास्त्रान्तरं पद्मप्रसादस्याननसरसि सरसं पद्ममिव प्रतिभाति स्म।

प्रकारत्रयेण विद्वांसः प्रसिद्धिं प्राप्नुवन्ति। १—अध्यापनकार्येण २—प्रवचनेन ३—लेखनेन च।

[illegible]षतोऽध्यापनवृत्त्या गुरोर्गौरवं परंपरां च पद्मप्रसादः सायासं पालयति स्म। तस्य महाभागस्य बहु[illegible]या नेपाले भारतेऽपि सन्ति। तस्यैव कृपया अद्यापि नूनं भान्ति। एषा महती परंपरा अस्माकं प्राच्यविद्याप्रवर्द्धनाय। यदि न भवेयुर्वेदानां गायकाः नैरन्तर्येण किं वेदा अद्यत्वे जीवेयुः? तस्यामेव परंपरायां पद्मप्रसादो जीविष्यति।

धन्योऽहं यत् पङ्क्तिद्वयमुल्लिख्य एतद्देशप्रसूतमेकं महापुरुषमभिवादये। इत्यलम्।

अखण्डकीर्तीनां तेषां स्मरणेन जायते मनस्युल्लासः

—पं. [1]छविलालबाँस्तोलाः

•

मदीया गुरवः पद्मप्रसादा नूनमखण्डकीर्तयः। यदा यदा तान् स्मरामि तदा तदा [2]जराजीर्णेऽप्यस्मिन् कलेवरे स्फूर्त्तिर्मनसि च विस्मृतिपराहते कश्चन मधुरमधुरोल्लासोऽनायासं मधुरयति मदीयां वृद्धताम्। तत्रापि यदिदानीं शृणोमि गुरोर्मे पद्मस्मृतिग्रन्थप्रकाशनमिति वचसामानुपूर्वीं, कोनु मत्कृते इतोऽपि सुखकरः प्रसङ्गः? दुःखकरमपि दीर्घतरमायुः सुखकरमिदानीं संवृत्तम्। धन्याश्च ते येषां प्रयासेनेदं कर्णाभ्यामाभ्यां श्रूयते। अत्युच्चैरुच्यमानमेवेदानीं शृणोमि। तेषां गुरूणां चरणकृपया प्राचीनन्याय-वेदान्तशास्त्रयोरध्ययनं मेऽभूत्। तेषामन्तेवसता मया वेदान्ताचार्य-परीक्षोत्तीर्णासीत्। ग्रन्थस्य तात्पर्यस्फोरणे यावती दक्षताऽस्मद्गुरोरासीन्न तथान्यत्रेति मे प्रत्ययः। तेषां चरणसेवया मया बहु लब्धमित्यधमर्णतां वहन् मनसा वाचा च गुरुचरणेषु श्रद्धाञ्जलिं समर्पयामि।

१—केशवशर्मेदमपि नाम। २—इदानीमेषां वयः अष्टाशीतिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महनीयगुरुपादानां स्वाध्यायप्रवचनकला

—माधवाचार्यः

स बिन्दुमाधवः पातु विभोर्यस्य निरीक्षणात् ।
अपारोऽपि हि संसारसिन्धुर्बिन्दुत्वमश्नुते ॥

अपारे वैरिञ्चप्रपञ्चे किल मे सुखमेव भूयान्मनागपि दुःखं माभूदिति समेषामेवेच्छा नयनगोचरीभ[illegible] परञ्च तादृशसुखप्राप्त्यर्थं ज्ञानस्यावश्यकता वरीवर्ति तत्र श्रुतयः प्रमाणत्वेन राजन्ते । तथाहि '[illegible] [illegible]श्वात् [illegible] विद्वान् अमृतो भवति' 'नान्यः पन्था विद्यतेऽयनाय' इत्यादयः । तत्तु वेदान्तशास्त्रम् । तदेतच्छास्त्रज्ञा[illegible] [illegible]ग-न्यायमीमांसाशास्त्रादीनां पठनं विना न सम्भवति ।

अत एव तत्पठनार्थमहं दक्षिणदेशतः (अग्रखेडग्रामबीजापुरमण्डलमहीसुरप्रान्ततः) अत्र काशीं समायातः । त्रिंशदधिकैकोनविंशति (१९३०) तमे ख्रिस्ताब्दे तस्मिन् समये प्रातःस्मरणीयश्रद्धेयगुरुचरणानां ब्रह्मभूयङ्गतसारस्वतसार्वभौमानां पण्डितपद्मप्रसादभट्टराईमहोदयानां नामधेयमाकर्ण्य काशीमीरघट्टस्थ-मारवाडीसंस्कृतकालेजं गत्वा गुरुचरणानां दर्शनं कृतम् । प्रथमस्तेषां दर्शनमात्रेणातीव सन्तोषस्समजनि । तदनन्तरं साष्टाङ्गप्रणिपातं कृत्वा तेषामनुज्ञयाऽहमुपविष्टः । ते 'गुरुचरणा' मम 'परिचयं' 'पृष्टवन्तः । अनया' दिशाऽऽगमनप्रयोजनमपि महता सौजन्येन पृष्टवन्तः । पूज्यचरणानां प्रतिवचने मयोदीरितं किलात्रभवतां भवतां सविधे नव्यन्यायशास्त्रं पिपठिषुरस्मि तत्रभवतां न्यायशास्त्रधुरन्धराणां नामधेयं श्रुत्वाऽहमत्र समुपस्थितः । अतोऽनुकम्पापूर्वकन्यायशास्त्रपाठनेन मामनुगृह्णन्त्विति । ततोऽतीववात्सल्यभावेन ओमित्युक्तवन्तः । वस्तुतः कालोऽयं पुण्यश्लोकः । इतः परं गुरुचरणैस्सर्वशास्त्रोपकारकस्य तर्कसङ्ग्रहस्यैवाध्यापनं प्रारब्धम् । अत्र च गुरुवरमुखाद्यथा श्रुतं नीरक्षीरविवेचनपेशलप्रेक्षावतां संख्यावतां समक्षे तथैव स्थापयामि—

निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् ।
बालानां सुखबोधाय क्रियते तर्कसङ्ग्रहः ॥ इति मङ्गलपद्यम् ।

अस्याध्यापनप्रकारः श्रीपद्मप्रसादगुरुचराणाम्—

विश्वेशं हृदि निधाय गुरुवन्दनञ्च विधाय, बालानां सुखबोधाय मया (अन्नंभट्टेन) तर्कसङ्ग्रहः क्रियत इत्यन्वयः । शाब्दबोधः–विश्वस्य ईशः, विश्वेशः, तं विश्वेशम् । विश्वशब्दस्य समस्तप्रपञ्चोऽर्थः । षष्ठ्या नियम्यतार्थः, विश्वशब्दार्थः समस्तप्रपञ्चस्याधेयता सम्बन्धेन षष्ठ्यर्थनियम्यतायामन्वयः । तथा च समस्तप्रपञ्च-निष्ठनियम्यता, ईशशब्दस्य नियामकतावानित्यर्थः । समस्तप्रपञ्चनिष्ठनियम्यताया निरूपितत्वसंबन्धेनेशशब्दार्थ-नियामकतावदेकदेशनियामकतायामन्वयः । तथा च समस्तप्रपञ्चनिष्ठनियम्यतानिरूपितनियामकतावानित्यर्थः । विश्वेशमित्यत्र द्वितीयाया विशेष्यतावानित्यर्थः । समस्तप्रपञ्चनिष्ठनियम्यतानिरूपितनियामकतावत आधेयता-सम्बन्धेन द्वितीयार्थविशेष्यतायामन्वयः । तथा च समस्तप्रपञ्चनिष्ठनियम्यतानिरूपितनियामकतावन्निष्ठविशेष्यता, हृदीत्यत्र हृच्छब्दः सप्तमी च, हृच्छब्दस्य मनोऽर्थः, सप्तम्या अधिकरणतार्थः । हृच्छब्दार्थमनस आधेयता सम्बन्धेन सप्तम्यर्थः, अधिकरणतायामन्वयः । तथा च मनोनिष्ठाधिकरणता, निधायेत्यत्र न्युपसर्गपूर्वक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

[illegible] ल्यप्प्रत्ययः। न्युपसर्गपूर्वकधाञ्धातोराधेयत्वप्रकारकाहार्यज्ञानमर्थः। ल्यप्प्रत्ययस्य ध्वंसाधि[illegible]त्तित्वमर्थः। मनोनिष्ठाधिकरणताया निरूपितत्वसंबन्धेन न्युपसर्गपूर्वकधाञ्धात्वर्थः। आ[illegible]रकाहार्यज्ञानैकदेशाधेयत्वेऽन्वयः। तथा च मनोनिष्ठाधिकरणतानिरूपिताधेयत्वप्रकारकाहार्यज्ञानम्। ल्यप्प्रत्ययस्य ध्वंसाधिकरणकालवृत्तित्वमर्थः। मनोनिष्ठाधिकरणतानिरूपिताधेयत्वप्रकारकाहार्यज्ञानस्य स्वनिष्ठप्रतियोगितानिरूपकत्वसम्बन्धेन ल्यप्प्रत्ययार्थः, ध्वंसाधिकरणकालवृत्तित्वैकदेशध्वंसेऽन्वयः। तथा च मनोनिष्ठाधिकरणता[illegible]पितध्वंसाधिकरणकालवृत्तित्वम्। समस्तप्रपञ्चनिष्ठनियम्यतानिरूपितनियामकतावन्निष्ठविशेष्यताया निरूपकत्वसम्बन्धेन मनोनिष्ठाधिकरणतानिरूपिताधेयत्वप्रकारकाहार्यज्ञाननिष्ठप्रतियोगितानिरूपकध्वंसाधिकरणकालवृत्तित्वैकदेशध्वंसेऽन्वयः। तथा च समस्तप्रपञ्चनिष्ठनियम्यतानिरूपितनियामकतावन्निष्ठविशेष्यतानि[illegible]कमनोनिष्ठाधिकरणतानिरूपिताधेयत्वप्रकार काहार्यज्ञाननिष्ठप्रतियोगितानिरूपकध्वंसाधिकरणकालवृत्तित्वम्।

[illegible] विद्या[illegible]रुवन्दनं विधाय–गुरोः वन्दनं गुरुवन्दनं तद्गुरुवन्दनम्। गुरोरित्यत्र गुरुशब्दः षष्ठी च। गुरुशब्दस्य [illegible] इत्यर्थः। षष्ठ्या विशेष्यतार्थः। गुरुशब्दार्थ उपदेशकर्तुराधेयतासम्बन्धेन षष्ठ्यर्थः विशेष्यतायामन्वयः। तथाचोपदेशकर्तृनिष्ठविशेष्यता। वन्दनमित्यत्र वन्दनशब्दः द्वितीया च। वन्दनशब्दस्य स्वावधिकोत्कृष्टत्वप्रकारकज्ञानानुकूलव्यापार इत्यर्थः। द्वितीयाया विशेष्यताऽर्थः। वन्दनशब्दार्थः स्वावधिकोत्कृष्टत्वप्रकारकज्ञानानुकूलव्यापारस्याधेयतासम्बन्धेन द्वितीयार्थः विशेष्यतायामन्वयः। तथा च 'स्वावधिकोत्कृष्टत्वप्रकारकज्ञानानुकूलव्यापारनिष्ठविशेष्यता' उपदेशकर्तृनिष्ठविशेष्यताया निरूपकत्वसम्बन्धेन स्वावधिकोत्कृष्टत्वप्रकारकज्ञानानुकूलव्यापारैकदेशव्यापारेऽन्वयः। तथाचोपदेशकर्तृनिष्ठविशेष्यतानिरूपकस्वावधिकोत्कृष्टत्वप्रकारकज्ञानानुकूलव्यापारनिष्ठविशेष्यता" विधायेत्यत्र न्युपसर्गपूर्वक धाञ् धातुर्ल्यप्प्रत्ययश्च। न्युपसर्गपूर्वकधाञ् धातोराधेयत्वप्रकारकाहार्यज्ञानमर्थः। उपदेशकर्तृनिष्ठविशेष्यतानिरूपकस्वावधिकोत्कृष्टत्वप्रकारकज्ञानानुकूलव्यापारनिष्ठविशेष्यतायाः निरूपकत्वसम्बन्धेन न्युपसर्गपूर्वकधाञ्धात्वर्थ आधेयत्वप्रकारकाहार्यज्ञानैकदेशाहार्यज्ञानेऽन्वयः। बालानां सुखबोधायेत्यत्र।

बालानामित्यत्र बालशब्दः षष्ठी च। बालशब्दस्य ग्रहणधारणपटव इत्यर्थः। षष्ठ्याः समवायसम्बन्धावच्छिन्नाधेयत्वमर्थः। बालपदार्थः ग्रहणधारणपटूनां स्वनिष्ठाधिकरणतानिरूपितत्वसम्बन्धेन षष्ठ्यर्थसमवायसम्बन्धावच्छिन्नाधेयत्वेऽन्वयः। तथा च ग्रहणधारणपटुनिष्ठाधिकरणतानिरूपितसमवायसम्बन्धावच्छिन्नाधेयत्वमन्वयः। सुखबोधाय इत्यत्र सुखेन बोधः, सुखबोधः, तस्मै सुखबोधाय, अत्र सुखशब्दस्यानायासोऽर्थः। तृतीयाया जन्यत्वमर्थः। ग्रहणधारणपटुनिष्ठाधिकरणतानिरूपितसमवायसम्बन्धावच्छिन्नाधेयत्वस्याश्रयतासम्बन्धेन तृतीयार्थः, अनायासेऽन्वयः। अनायासस्य स्वनिष्ठजनकतानिरूपितत्वसम्बन्धेन तृतीयार्थजन्यत्वेऽन्वयः। ग्रहणधारणपटुनिष्ठाधिकरणतानिरूपितसमवायसम्बन्धावच्छिन्नाधेयत्वाश्रयानायासस्य स्वनिष्ठजनकतानिरूपितत्वसम्बन्धेन तादृशजन्यत्वस्याश्रयतासम्बन्धेन बुधधात्वर्थज्ञानेऽन्वयः। तथा च ग्रहणधारणपटुनिष्ठाधिकरणतानिरूपितसमवायसम्बन्धावच्छिन्नाधेयत्वाश्रयानायासनिष्ठजनकतानिरूपिततादृशजन्यत्वस्याश्रयतासम्बन्धेन बोधायेत्यत्र बुधधात्वर्थज्ञानेऽन्वयः। तथा च ग्रहणधारणपटुनिष्ठाधिकरणतानिरूपितसमवायसम्बन्धावच्छिन्नाधेयत्वाश्रयानायासनिष्ठजनकतानिरूपितजन्यत्वाश्रयज्ञानम्। ग्रहणधारणपटुनिष्ठाधिकरणतानिरूपितसमवायसम्बन्धावच्छिन्नाधेयत्वाश्रयानायासनिष्ठजनकतानिरूपितजन्यत्वाश्रयज्ञानस्याधेयतासम्बन्धेन बोधायेत्यत्र चतुर्थ्यर्थोद्देश्यतायामन्वयः। तथा च ग्रहणधारणपटुनिष्ठाधिकरणतानिरूपितसमवायसम्बन्धावच्छिन्नाधेयत्वाश्रयानायासनिष्ठजनकतानिरूपितजन्यत्वाश्रयज्ञाननिष्ठोद्देश्यताया निरूपकत्वसम्बन्धेन 'कृञ्' धात्वर्थकृतावन्वयः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा च ग्रहणधारणपटुनिष्ठाधिकरणतानिरूपितसमवा[illegible]च्छिन्नाधेयत[illegible]रेणु[illegible]रामन्त्रणा जनकतानिरूपितजन्यताश्रयज्ञाननिष्ठोद्देश्यतानिरूपिका कृतिः। [illegible]

मयेत्यत्रास्मच्छब्दस्तृतीया च। अस्मच्छब्दस्यान्नंभट्टे[illegible]तृतीयायास्समवा[illegible]सम्बन्धावच्छिन्ना धेयत्वमर्थः। अस्मच्छब्दार्थोऽन्नंभट्टस्य स्वनिष्ठाधिकरणतानिरूपितत्वसम्बन्धेन तृतीयार्थस्समवायसम्बन्धावच्छिन्नाधेयत्वेऽन्वयः। तादृशाधेयत्वस्याश्रयतासम्बन्धेन 'क्रियत' इत्यत्र कृतावन्वयः। 'क्रि[illegible]' इत्यत्र 'कृ' धातोराख्यातप्रत्ययस्य कृतिरर्थः। आख्यातप्रत्ययस्य विषयत्वमर्थः। कृतेर्निरूपितत्वसम्बन्धे[illegible]प्रत्ययार्थ-विषयत्वेऽन्वयः। तादृशविषयत्वस्याश्रयतासम्बन्धेन तर्कसङ्ग्रहेऽन्वयः। तथा च समस्तप्रपञ्च[illegible]निष्ठनियम्यतानिरूपितनियामकतावन्निष्ठविशेष्यतानिरूपकमनोनिष्ठाधिकरणतानिरूपिताधेयत्वप्रकारकाहार्यज्ञाननिष्ठप्रतियोगिता-निरूपकध्वंसाधिकरणकालवृत्तित्वाश्रयोपदेशकर्तृनिष्ठविशेष्यतानिरूपकस्वावधिकोत्कृष्टप्रकारकज्ञानानुकूलव्याप[illegible] निष्ठविषयतानिरूपकाधेयत्वप्रकारक आहार्यज्ञाननिष्ठप्रतियोगितानिरूपकध्वंसाधिकरणकालवृतित्वा[illegible]धारणपटुनिष्ठाधिकरणतानिरूपितसमवायसम्बन्धावच्छिन्नाधेयत्वाश्रयानायासनिष्ठजनकतानिरूपित[illegible]ज्ञाननिष्ठोद्देश्यतानिरूपकः, अन्नंभट्टनिष्ठोधिकरणतानिरूपितसमवायसम्बन्धावच्छिन्नाधेयत्वाश्रयकृति[illegible]रूपित-विषयत्वाश्रयस्तर्कसङ्ग्रहः। अत एव तर्क्यन्ते प्रतिपाद्यन्त इति तर्काः द्रव्यादिसप्तपदार्थाः, तर्काणां सङ्ग्रहः इति तर्कसङ्ग्रहः = पदार्थसंग्रह इत्यर्थः।

अनया दिशा पर्वतीयगुरुचरणानां प्रातःस्मरणीयपद्मप्रसादभट्टराईमहाभागानां सविधे यच्छ्रुतं पठितं तत्सर्वं यथावदेव 'त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पये' इति।

नमो नमः श्रीगुरुपादुकाभ्यः

—पं. काशीनाथशर्मा

सर्वशास्त्रसारदर्शनकर्माग्रगण्य-विद्यावाचस्पति-शिष्यप्रशिष्यसंतानविस्तारितकीर्ति-श्रीभट्टगौतम[illegible]परावतारभूत–काशिकविद्वन्मूर्धन्य–नेपालाभिजनानां महामहिमवतां परमपूज्यास्मद्गुरुवर–प्रातःस्मरणीयश्रीपद्मप्रसाद-भट्टराईपादानां पवित्रचरणपादुकाभ्यो नमो नमः। नमस्कर्त्ता चाहमस्मि तच्चरणान्तिकमुषित्वा त[illegible]भ्यो बहुभिर्वर्षैर्बहूनां न्यायादिविषयकग्रन्थानामध्ययनकर्त्ता काशीनाथः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

...ण्डतः पद्मप्रसादः

—[1]श्री सूर्यविक्रमज्ञवाली

•

हिन्दूनां प्रसिद्धं धार्मिकं तीर्थस्थानं काशीक्षेत्रं नेपालस्थान् भारतस्य विविधेषु भागेष्ववस्थितान् हिन्दुधर्मावलम्बिनश्च सदैवाकर्षति। जना जीवनस्य पूर्वार्धे विद्याध्ययनार्थं काश्यां गच्छन्ति जीवनस्योत्तरार्द्धेऽपि ...अथवा जीवनं विसृज्य मुक्तिं लभन्ते। अत एव विविधानां मातृभाषाणां प्रयोक्ता हिन्दूनां विविधः समुदायः वा... विविधेष्वेषु स्थानेषु निवसति। पञ्चगङ्गाघट्टं परितः पुरातनकालादेव नेपालिभाषिणः काश्यां निवसन्तो दरीदृश्यन्ते प्रा...

मम बाल्यावस्थाया यौवनस्य च कश्चित् कालः काश्यामेव व्यतीतः, अतः काश्याः प्राचीनजीवन-पद्धतेः कश्चिदनुभवोऽस्ति मम हृदये। काशीवासिनामन्येषां जनानामपेक्षया नेपालिनां सामाजिकी अवस्था समुन्नता नासीत् तदानीम्। प्राचीनविद्यायां निरता नेपालिन आधुनिकज्ञानविषये धनार्जनविषये च समुन्नता नासन्। अतः आङ्गलविद्यालयेषु पठन्तो वयं नेपालिनवयुवकाः अस्यां स्थितौ खिन्ना एव किन्तु नासीत् तत्र कोऽपि खेदस्यापाकरणोपायः।

यदि यदा कदा कथमपि नेपालिभाषिणां वैशिष्ट्यं ज्ञातं भवेत् तदा वयं गौरवान्विता भवेम। स्व० पं० पद्मप्रसादभट्टराईमहोदयस्य विद्वत्तावशात् काश्यां ख्यातिरासीत्। अत एव देशभक्ता नेपालियुवका गौरवान्विताः सन्ति। कदाचित् पं० पद्मप्रसादमहोदया दुग्धविनायके एकस्मिन् गृहे न्यवसन्। वयमपि तस्मिन्नेव क्षेत्रे आस्म, अतः प्रतिदिनं बहुवारं तत्र गमनागमनं स्वाभाविकमासीत्। पं० पद्मप्रसादमहोदयस्य गृहं द्वौ बङ्गवासिनौ युवानौ प्रायः प्रतिदिनं गच्छन्तौ दृष्टौ। तौ युवकौ तत्र प्रतिदिनं पठनार्थं गतवन्ताविति सम्यग् ज्ञायते स्म। विद्यायाः केन्द्रभूते काशीक्षेत्रे नेपालीपण्डितस्य सान्निध्ये बङ्गवासिनो युवकाः पठितुमागच्छन्तीति ज्ञात्वा वयं गौरवान्विताः। अत्रापि नेपालिनो विद्वांसस्सर्वैराराध्यन्त इति हर्षस्य विषयः। काश्या विद्वत्समाजे पण्डितपद्मप्रसादभट्टराईमहोदयाः समादृता आसन्। काश्याः महापण्डितेषु पद्मप्रसादस्य गणना आसीत्। काशीस्थानां वरिष्ठपण्डितानां सभासु भट्टराईमहोदया आमन्त्रिता आसन् इति ज्ञात्वा वयं हर्षोत्फुल्ला गौरवान्विताश्च। कालान्तरे पं० पद्मप्रसादभट्टराईमहोदयाः यशस्विनः सञ्जाता इति तु सर्वविदितम्।

---

१. नेपालीमूलतोऽनुवादका—डा० डिल्लीराम-तिमसीनाः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुरुवराणां श्रीपद्मप्रसादभट्टारक[illegible]न स[illegible]

—[illegible]वासुदेवत्रिपाठी

मया २०१५ तमविक्रमाब्दात् २०२१ तमविक्रमाब्दपर्यन्तं काष्ठमण्डपस्थिते ने[illegible]राजकीयसंस्कृत-महाविद्यालये, गुरुवरश्रीपद्मप्रसादशर्मणां प्रधानाचार्यत्वे नव्यव्याकरणशास्त्रमवलम्ब्य संस्कृतस्योच्च-शिक्षा प्राप्ता। भट्टराईसमुपाह्वया अप्येते महाविद्यालयीयविज्ञप्तिषु बहुधा 'भट्टारक' इत्युपाह्वयञ्च प्रयुञ्जते[illegible]। 'भट्टराई' पदं संस्कृत्य तैर्विहितोऽयं प्रियः प्रयोगः रमणीय इति तदास्माकं प्रतीतिरासीत्। राजकीय[illegible] निरता अप्येते सायं प्रातरपि स्वगृहे छात्राणां पाठनं विदधानाः प्राचीनां विद्वत्परिपाटीं नू[illegible]श्रयन्। तेषां निवासस्थानमपि अहोरात्रमेव विद्याशालेव छात्रकुलाकुलितमभूत्। अथापि यथासमयमेते [illegible]ालय-मवाप्याध्यापनप्रवृत्ता दृश्यन्ते स्म। विविधैर्महाविद्यालयव्यवस्थाकार्यैः शिक्षामन्त्रालयकार्यप्रसङ्गैस्त्रिभुवन-विश्वविद्यालयनिर्देशनपालनादिकर्मभिश्चैतेषां समयो नितरां नियमितोऽभूदथापि यथासमयमेव सर्वत्र प्राप्ता अभूवन्' न मनागपि नियतकालातिक्रमणमेतैः क्रियमाणमनुभूयते स्म। इदानीन्तनमहाविद्यालयादौ प्रधानाचार्यत्वन्नाम नूनं विविधकार्यभारभरितं भवतीति सर्वविदितम्। अपि च सर्वोत्कृष्टवैदुष्यवत्तयाऽपि राजकीयं सामान्यजन-सम्बन्धि, सामाजिकञ्च कार्यजातं समुद्दिश्य ते भृशं बहुरूपतया बहुधोपतिष्ठन्ते स्म, एवं सत्यपि नियतं छात्रेभ्यो विद्यादानं निर्बाधतया प्राचालयन्निति तैरेवैतत् शक्यमिति मन्ये। सर्वकर्मसु विद्या-दानमेव परमोत्कृष्टं कर्मेति दृढा धारणैव तेषां सर्वदैव विद्यादानप्रयोजिकेति मन्ये। प्रतिवत्सरं शिक्षकाणां कृते स्वगृहकार्यसंपादनायोपयोक्तुं केषाञ्चन दिनानामवसरो दीयते संस्थया। अध्यापनमेव जीवनं मन्यमाना इमे तादृशमप्यवसरं तृणीकृत्य छात्राध्यापनैककार्याः सदाऽभूवन्निति नूनमस्मान् तथैव व्यवहर्त्तुं प्रैरयन्निव किमपि शरीरास्वास्थ्यमुपगता अपि कदापि स्वास्थ्यलाभार्थमुपयोज्यमवसरविशेषं नैवापेक्षन्ते स्म।

सामान्यत एषां प्रकृतिर्गभीरा मनोहरा चाभूत्। प्रायो नापि कटुर्नाप्यतिमधुरस्तेषां स्वभावः सर्वैरनु-भूतः। परं यदा शास्त्रविचारसागरे, ते गभीरतया निमज्जन्ति स्म तदा सम्पूर्णं मुखमण्डलमपरिमितैः प्रज्ञालोकैः प्रद्योतितमिवातिप्रसन्नदर्शनं विलोक्यते स्म। विद्याप्रदानकाले तत्रभवतां समाधिसदृशी दशा, परमप्रसन्ना आकृतिर्निरन्तर-प्रवाहशील-ज्ञाननिर्झरा वाग्धारा च प्रबुद्धशिष्यचेतसामज्ञानान्धकारं प्रक्षाल्य विशद-प्रकाश-दाने नूनं समर्था आसीत्। मदीयैः कैश्चिदन्तरङ्गमित्रैरेतेभ्यो नव्यन्यायविषयमधीतवद्भिर्मयैवं श्रुतम् "गुरोः शिक्षणविशेषतां स्मारं स्मारमद्यावधि परं प्रसीदति मनोऽस्माक"मिति।

मयाऽपि नव्यव्याकरणाचार्यपरीक्षान्तिमवर्षे-एभ्य एवाध्ययनावसरः सौभाग्याल्लब्धः। व्युत्पत्ति-वादनामकप्रौढो न्यायग्रन्थो मयाऽधीतः। अत्राध्ययने गुरूणामेषां गुरुतरं पाण्डित्यं मनोहरञ्चाध्यापनविधिं साक्षादनुभूतवानहम्। मदीयस्य समग्रस्याध्ययनस्य सर्वाधिकसुखदं सर्वाधिकप्रकाशमयञ्च पर्व व्युत्पत्ति-वादविषये श्रीपद्मप्रसादमहाभागसकाशादध्ययनस्य गौरवमय एकसत्रावधिकः काल एवेति मे दृढा धारणा।

मयाऽद्यावधि प्रणतेषु गुरुचरणेषु श्रीपद्मप्रसादगुरुचरणानेव विशेषत उपकारकान् मन्ये, मदीया ज्ञानधारा च तदीयसंसर्गेण नूनं पावितेत्यहं मन्ये।

विद्वद्वरेण्याः पद्मप्रसादभट्टारका लेखनापेक्षयाऽध्यापनमेव श्रेयो मन्यन्ते स्म। गुरुशिष्याभ्या-मध्यापनाध्ययनरूपेणैव ज्ञानधारा प्रवाहणीया, अयमेव ज्ञानसंरक्षणस्य सर्वोत्तम उपाय इति तेषां मतमासीत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

...न तत्तच्छात्राणां ... शक्य ... राचित् "कर्त्तव्यनिर्देशनम्" इति नाम्ना चतुरः श्लोकान् ... संस्कृतच्छात्रसङ्घेन प्रकाश्यमानस्य "जयतु संस्कृत;" ... मासिकपत्र ... ष्टमाङ्के (२० सम्पूर्णाङ्के) ते श्लोकाः प्रकाशिताः। ... नमः—

"कर्तव्य-निर्देशनम्"

वैदेशं धर्मं रक्षत राजानं जन्मभूमिश्च सन्ततिम्।
एतेषां रक्षणान्नूनं कर्त्तव्यं हि समाप्यते ॥ १ ॥

अन्तःकरणसंशुद्धेर्ब्रह्मनिष्ठस्य देशना-
मननोपासनाभिश्च ज्ञेयं किञ्चिन्न शिष्यते ॥ २ ॥

कर्त्तव्यज्ञेयावसितेर्नान्यः कश्चन दृश्यते।
एतावदेव संसार-यात्रायाः फलमुच्यते ॥ ३ ॥

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।
इत्यर्जुनाय गीतायां भगवान् समुपादिशत्" ॥ ४ ॥

× × ×

ते स्वचरितचर्चानिःस्पृहा अभूवन्। अस्माभिः सततं कृतेऽप्यनुरोधे स्वजीवनविषये किञ्चिदेवोक्त्वा विरमन्ति स्म। तथापि बहुशः प्रयतमानैरस्माभिः तैः सह एकोऽन्तर्वार्ताकरणस्यावसरः कथञ्चिल्लब्धः, तदनुमतेरन्नेको विद्वत्परिचयात्मको लेखश्च विरचितः। स लेखस्तदानीन्तनस्य "जयतु संस्कृत" मितिनाम्नः संस्कृतपत्रस्य तृतीयवर्षीयप्रथम-द्वितीयसंयुक्ताङ्के २७–२९ पृष्ठेषु प्रकाशितः, गुरुवराणां पावनस्मृतौ तं लेखमत्र समुद्धृत्य विरमामि।

हिमधवलहिमालयेन, ध्वनितचतुर्दिगन्तैः निर्झरैः, श्यामायमानैः वनैः, सस्यश्यामलैः क्षेत्रैः, निर्मलजलतर्पितजनपिपासाभिः स्रोतस्वतीभ्यश्च सुशोभ्यमाने नेपाले पूर्वस्मिन् द्वितीये पर्वतप्रान्ते सालुसामलीस्थाननामके ग्रामे १९५६ वैक्रमाब्दे वैशाखशुक्लद्वादश्यां भट्टराईमहोदयस्य जन्मासीत्। मातापित्रोः सुखमये उत्सङ्गे क्रीडन् स्वकीयं शैशवमतिवाह्य रानी-पोखरीपाठशालायां १९६८ वर्षतः स्वकीयं संस्कृताध्ययनं भट्टराईमहोदयः प्रारभत। १९७२–१९७३ वर्षयोः साहित्यव्याकरणमध्यमपरीक्षे उत्तीर्य रानीपोखरीसंस्कृतच्छात्रावासं त्यक्त्वा च तत्रभवान् वाराणसीं ययौ। विदुषां नगरी वाराणसी एव तत्रभवतोऽपि अध्ययनस्थानं पश्चात् स्वविद्वत्तया लोकानुरञ्जनेन च पवित्रितं पीठञ्चाभवत्।

१९७४ तमे वर्षे न्यायमध्यमा मुत्तीर्य क्रमेण १९८० तमे वर्षे तत्रभवान् न्यायाचार्यपरीक्षोत्तीर्णोऽभवत्। तदनन्तरं त्रिवर्षपर्यन्तं दार्शनिकं विशेषाध्ययनं कृत्वा तत्रभवान् १९८३ वैक्रमाब्दे पोष्टाचार्योपाधिं च लब्धवान्।

इत्थं भट्टराईमहोदयस्य छात्रजीवनं समाप्तमभूत्। विविधच्छात्रवृत्त्यादिद्वारा तत्रभवतः छात्रजीवनम् आर्थिकदृष्ट्या दुःखावहं नासीत्। म० म० वृद्धताराचरणभट्टाचार्य एकः गुरुवरः आसीत्तत्रभवतः। तत्रभवान् स्वल्पैरेव वर्षैः बनारसक्वीन्सकालेजाधिगतायाः श्रेष्ठतमाया उपलब्धेः मूर्तं स्वरूपं सञ्जातवान्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्ययनसमाप्तेरनन्तरमेव भट्टराईमहोदयः अ[illegible] ध[illegible] गोयनकासंस्कृतकालेजापारनाथसंस्कृतकालेजादिसंस्थासु अभवा[illegible] दरमामन्त्र शालिस्वप्रतिभाविद्वत्तादिद्वारा कृतार्थयन् असंख्यान् गी[illegible] मास। ज्ञानपिपासां शमयन् भट्टराईमहोदयः समग्रसंस्कृतजगति स्व[illegible]

२००९ वैक्रमाब्दे नेपालसर्वकारस्य विशेषामन्त्रणे चिरश्रद्धेयामपि नगरी [illegible] त्यक्त्वा स्वदेश-मागच्छत्, नवसंस्थापितस्य नेपाल-राजकीय-संस्कृतमहाविद्यालयस्य उपप्रधानाचार्यः [illegible] स्वराष्ट्रे एव स्वज्ञानानन्तज्योतिषा परःशतानां छात्राणां हृदयतमस अपाकरणव्रती अति[illegible]च । अधुना वि[illegible]तुर्वर्षतः तस्यैव नेपालस्य सर्वोत्तमस्य संस्कृतमहाविद्यालयस्य प्रधानाचार्यो वर्तते । २०११ तः नेपालस्य संस्कृतपरीक्षाणां [illegible]ध्यक्षो वर्तते । भट्टराईमहोदयस्य पञ्च विवाहा अभूवन्, तथा अधुना पुत्राः पुत्र्यश्च सन्ति। तत्रभवतः पा[illegible] वारिकं जीवनं सर्वदा ससुखमेव अभूत्। भट्टराईमहोदयः संस्कृतं नेपालीं हिन्दींबङ्गालीं[illegible] जानाति। अधुना त्रि० वि० महाविद्यालयेऽपि प्राध्यापकरूपेण कार्यं करोति ।

विद्यानगरी वाराणसी भट्टराईमहोदयस्य विकासशीलस्य वैदुष्यपूर्णव्यक्तित्वस्य कृते नितरामुपयुक्ता भूमिः आसीत्। आस्तिकनास्तिकसर्वविधदर्शनपारावारपारीणः भट्टराईमहोदयः अवश्यमेव संस्कृतमातुः अनन्यतमतिलकायते। स्वल्पैरेव वर्षैः भट्टराईमहोदयस्तत्र असाधारणं व्यक्तित्वम् अभजत्। वाराणसेयसंस्कृत-क्षेत्रमेव, यत एव सर्वं संस्कृतजगत् जागरितं भवति, भट्टराईमहोदयं प्राप्य कृतार्थमभूत्। प्रश्नपत्रनिर्धारणं शास्त्रार्थव्यवस्था पाठ्यक्रमनिर्धारणं सांस्कृतिककार्यक्रमः विवादास्पदविषयनिर्धारणमुत्तरपुस्तकपरीक्षणम् इत्यादि-कस्य वाराणसेयस्य सर्वविधस्य शैक्षिकसंपादनीयकार्यस्य संपादनम्। तत्र अध्यक्षता च भट्टराईमहोदयस्य सर्वसंमतम् अनिवार्यं कर्तव्यम् आसीत्। संक्षिप्य तत्रभवतः वाराणसेयजीवनविषये तत्रभवत एव एकतमस्य सुयोग्यशिष्यस्य प्रा० हरिदेवमिश्रस्य शब्देषु कथयितुं शक्यते-तदानीन्तन एतादृशः कोऽपि वाराणसेयः कार्यक्रमः न संभवति स्म यत्र गुरोः प्रमुखकर्तृत्वं न भवति स्म ।

गुरुवरस्य कतिपयाः शिष्या एव अधुना देशस्य विविधभागेषु शिक्षाप्रदीपं ज्वालयन्तः सन्ति। तेषां मुखेभ्यः श्रूयते अधुनापि ज्ञायते च यत् पठनस्य उद्देश्यं न परीक्षापारणं किन्तु ज्ञानम्, इति व्यवहारेऽपि समनुविदधतः भट्टराईमहोदयस्य समक्षं कोपि अनुनयः परीक्षाविषये न संभवति स्म ।

गुरुवरस्य व्याकरणविषयकः अनुभवः वैयाकरणधुरन्धरेभ्योपि अधिकतमः अस्ति । साहित्येपि प्रशंसनीयम् आधिपत्यं वर्तते । तत्र वैशिष्ट्यमन्विष्यते चेत् न्यायवेदान्तौ तु गुरोः कृते हस्तामलकतुल्यौ वर्तेते ।

भट्टराईमहोदयः अतीव मितभाषी वर्तते । अद्य वयं यावन्तं गुरोर्वाग्व्यवहारं पश्यामः, श्रूयते एष पूर्वापेक्षाया बहुगुणं प्रवर्धितः ।

भट्टराईमहोदयस्य विचारोस्ति संस्कृतं विना न कापि भाषा जीवति नापि भवति पूर्णा । यतः भाषा-विज्ञानशास्त्रम् आङ्ग्लानां संस्कृताध्ययनस्यैव फलम्। तत्रभवतो विचारोऽस्ति अध्ययनस्य लक्ष्यं ज्ञानम् । ज्ञानं संस्कृतभाषायां प्रचुरं वर्तते । तथापि संस्कृतज्ञान् आङ्ग्लभाषाज्ञा अधःकर्तुं बहुशः प्रयतमानाः सन्ति । अतः तेषां यथार्थोत्तराय आङ्ग्लभाषाज्ञानं सामग्रिकरूपेण संस्कृतज्ञानां कृतेपि अनिवार्यत्वेन आपतितमस्ति, यद्यपि वस्तुतः एतद् आवश्यकं नासीत् ।

संस्कृतोत्थानार्थं संस्कृतज्ञानां कर्तव्यं भट्टराईमहोदयः विचारयति अन्तःकरणशोधनम्। तस्य उपायः कदाचारपरिहारपूर्वकं सदाचारानुष्ठानम्। तथैव स्नातकस्य छात्रस्य वा पुरः जीविकासमस्याऽभावश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

...विमुक्तये विद्या अस्ति। एवं संस्कृताश्रितायाः राष्ट्रियसंस्कृतेः ...गुरुवरो मन्यते।

...विहित एव धर्मः, आधुनिकधार्मिकविवादस्य हेतुः धार्मि-... सर्वधर्मसंमेलनादितः धार्मिकसहिष्णुता च आनेतुं शक्यते" इति। ...कस्य तत्त्वस्य ...

...विवाहस्य विषये भट्टराईमहोदयस्य कथनमस्ति–विवाहो नाम सामाजिकं कार्यम्। तत्र ...कालः कन्याया द्वादशवर्षपर्यन्तमेव भवति। अद्य समाजे आगता भ्रान्तिस्तु विवाहगर्भाधान-... विस्मृत्या। यतः गर्भाधानकालस्तु प्राप्ते यौवने एव महर्षिभिः अनुमतः।

विधवायाः पुनर्विवाहविषये भट्टराईमहोदयः कथयति-विवाहः कन्याया वरं प्रति दानमेव। विवाहिता ...अवश्यं परसंपत्तिः भवति। अन्यसंस्कारवत् विवाहसंस्कारोऽपि नार्याः न हि आवर्तयितुं शक्यते–इति हेतोः ...

...ट्टराईमहोदयः कथयति–वर्तमानान्ताराष्ट्रियविषमपरिस्थितिनिरोधाय विश्वबन्धुत्वभावना मानव-मात्रे आवश्यकी। सा च 'आत्मा एक एव' इति भावनामूला। अत एव विश्वसमस्यानां मैत्रीपूर्णसमाधानार्थं वेदान्तविचारप्रादुर्भावः सर्वेषु आवश्यकः।

भट्टराईमहोदयः वर्णाश्रमव्यवस्थानुकूलं जीवनं कामयते। अत्रभवतः सर्वप्रियो विषयः ब्रह्मचिन्तनमस्ति।

भट्टराईमहोदयस्य विशेषोत्कटोऽभिलाषोऽस्ति–देशे न्यूना अपि अष्ट दश वा स्वसदृशा विद्वांस निर्मिताः स्युः। अत्रभवान् तदर्थं सर्वतोभावेन प्रयतमानश्च अस्ति। एषैव स्वराष्ट्रियच्छात्रप्रीतिः अत्रभवन्तं स्वदेशमानयामास इति सत्यम्।

स्वेच्छानुसारमेव अत्रभवता व्यावहारिके जीवने प्रविष्टमासीत्। 'मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः' इति कथनानुसारं स्वकीयसत्यपरिश्रमतो लब्धैरेव धनैः स्वकीयं जीवनं यापयतः सन्तोषामृततृप्तस्य भट्टराईमहोदयस्य जीवनं कदापि चिन्तनीयं नासीत् न वर्तते च। लक्ष्म्याः सरस्वत्याश्च विरोधभावस्य परिकल्पना नात्र सार्था दृश्यते।

भट्टराईमहोदयस्य व्यक्तित्वम् अतीव स्वाभिमानसहितं वर्तते, यत् संस्कृतविदुषां स्वाभाविकं भूषणम्। वेषेण भोजनेन विद्वत्तया स्वभावेन च सरलो महर्षिः भट्टराईमहोदयः सत्यं, 'सरलं जीवनम् उच्चैः विचारः' इत्युक्तेः सुस्पष्टं लक्ष्यम्।

आधुनिकं प्रधानाचार्यमहोदयस्य पुर उपस्थितं वायुमण्डलं गम्भीरतया आपातालं शास्त्रोदधौ निमज्जितुं वाञ्छतः ...स्य कृते अवश्यं प्रतिकूलं वर्तते। एतादृशविदुषां प्रतिष्ठा–स्थानं सत्यं सर्वविधाऽपरतन्त्रा विदुषां नगरी एव संभवति।

श्रूयते स्पष्टतः दृश्यते च व्यावहारिकं कौशलम्, मिलनसारता च भट्टराइमहोदये न दृश्यते। एतत् निश्चयेन जनसाधारणात् कदाचिद् भट्टराईमहोदयं विमुखं कारयत्यपि। परं 'क्व नु पुनः सर्वत्र सर्वे गुणाः' इत्यनुसारं सन्तोषानुभवः आवश्यकः। वयं मन्यामहे–राष्ट्रेण जनतया सर्वकारेण च सर्वैः अत्रभवतः अमरविद्वत्तायाः ओजस्विपाण्डित्यस्य नवनवोन्मेषशालिन्याः प्रतिभायाश्च समुचितसमादरः अवश्यं कर्तव्यः। कामयामहे च वयम्–अत्रभवतः सञ्जीवनं ससुखं शान्त्या सह कल्पशतं नेपाले विभातु, नेपालस्य संस्कृत-छात्रजगत्, विद्वज्जगच्चात्रभवतो विद्वत्तायाः सुखदच्छायायामुत्तरोत्तरं च प्रगच्छतु इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किञ्चित् स्म

धर
दरमामन्त्र
मास।
रलीधरमिश्र
यक्त्वा स्व
वराष्ट्र
तुवे

"आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती ।
एता विद्याश्चतस्रश्च लोकसंस्थितिहेतवः" ।।

इति न्यायमञ्जर्याख्यायां न्यायसूत्रवृत्तौ प्रथमसूत्रावतरणिकायां लिखितं वर्तते। [illegible] नाम न्यायशास्त्रम्। त्रयी ऋग्यजुःसामानि। यद्यपि वेदाश्चत्वारस्तथापि अथर्ववेदस्य ऋग्वेदे [illegible] अत एव आधुनिकाः वदन्ति अथर्ववेदस्य रचना पश्चाज्जातेति। अर्थानर्थविज्ञानं वार्ता। दण्डनीतिः नयानयविज्ञानम्। तदुक्तम् कामन्दकीये—

"आन्वीक्षिक्यात्मविज्ञानं धर्माधर्मौ त्रयीस्थितौ ।
अर्थानर्थौ च वार्तायां दण्डनीतौ नयानयौ" इति ।।

तत्र प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणम्—अन्वीक्षाऽनुमानमिति तत्प्रतिपादिका विद्या आन्वीक्षिकी। यद्यपि

"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश" ।। इत्यपि लिखितम्।

तथापि चतुर्दशानामपि चतसृषु एव गतार्थतया न काचिद्विप्रतिपत्तिः। अथवा मतान्तरमेतत्। मोक्षधर्मे महाभारते—तत्रोपनिषदं तात परिशेषं तु पार्थिव।

मथ्नामि मनसा तात दृष्ट्वा चान्वीक्षिकीं पराम्" इति ।।

अन्ये च बहवो विद्वांस आचार्या आत्मविद्यामेवान्वीक्षिकीमाहुः। यथा श्रीमद्भागवते १ स्कन्धे ३ अध्याये १०–११ श्लोकौ:—

"पञ्चमः कपिलो नाम सिद्धेशः कालविप्लुतम् ।
प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयम् ।।
षष्ठे अत्रेरपत्यत्वं वृतः प्राप्तोऽनसूयया ।
आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान्" ।।

न्यायदर्शनभाष्ये "कः पुनरयं न्यायः ? प्रमाणैरर्थपरीक्षणं न्यायः" इत्युक्तम्। अत एव न्यायसम्प्रदायेऽनुमानखण्ड एव न्याय इति आन्वीक्षिकी इत्युच्यते। मयापि त्वित्थमनुमीयते—अन्वीक्षणं नाम प्रत्यक्षानुमानाभ्यां हेतोरीक्षणं तदनु साध्यस्येक्षणम् अन्वीक्षा तत्प्रतिपादिका विद्या आन्वीक्षिकी अत एव धर्माधर्मज्ञानज्ञापकस्य वेदस्य महदुपजीव्यत्वं न्यायशास्त्रस्यैव। तदुक्तम्—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

...शक्य... सधर्मं वेद नेतरः" ।
...संख्या... तर्कश्चक्षुरपश्यताम् ।
...पमात्राद्धि वाक्यार्थः केवलान्नावतिष्ठते" ॥

...मितिविषयीक्रियते पदार्थ इति तर्कः। अतस्तर्को न्यायशास्त्रम् इत्यपरपर्यायः। तस्य न्या... प्रादेशे प्रसारौ संवर्धनञ्च भारतवर्ष एव। तत्रापि बाहुल्येन न्यायशास्त्रस्य विद्वांसो ग्रन्थ-... मिथिलावास्तव्या वङ्गदेशीयाश्च परिलक्ष्यन्ते। तत्र सर्वत आधिक्येन प्रसिद्धो गङ्गेशोपाध्यायकृतः त... चिन्तामणिरेव। यस्योपरि मथुरानाथतर्कवागीशकृता माथुरी, जगदीशभट्टाचार्यकृता जागदीशी ...चार्यकृता गादाधरी दीधितिरित्यादयो बह्व्यष्टीकाः समुपलभ्यन्ते।

...कृतेऽपास्त शस्य न्यायशास्त्रे वैचक्षण्येन प्रशंसयैव काशीस्थराजकीयसंस्कृतमहाविद्यालये न्याय-शास्त्रस्य प्रधानाध्यापकाः श्रीमन्तः कैलाशचन्द्रभट्टाचार्या एव नियुक्ता आसन्। तत्पदानुरूपमेव तेषां वैदुष्यमप्यासीत्। तदनु तेषामेव शिष्याः श्रीमहामहोपाध्याया वामाचरणभट्टाचार्या नियुक्ताः। तेषामपि तादृशमेव वैदुष्यं विज्ञाय सहर्षमधिकारिभिः स्वीकृताः।

तत्र कैलाशचन्द्रभट्टाचार्या मम दृष्टिपथमतीताः, मम बाल्यात्पूर्वमेव सायुज्यं प्राप्ताः। श्रीवामा-चरणमहोदयास्तु मम पठनकालेऽपि अध्यापका आसन्।

ते अतीव सौम्यमूर्तयः धर्मतत्पराः ब्राह्मणमहासंमेलनस्य प्रवर्तकाः न्यायशास्त्रस्य प्रकाण्डविद्वांसः, तेषां पाण्डित्यं पठनपाठनशैली च परमोत्कृष्टतामाटीकते स्म।

तेषामेवान्ते वसन्तो बहवो विद्वांसः काशीस्थाः न्यायशास्त्रे परमां ख्यातिं जग्मुः।

तेष्वत्र—१ पण्डितराजा राजेश्वरशास्त्री द्रविडाः। २ लघुवामाचरणभट्टाचार्याः। ३ पं० शिवदत्त-शर्माणो गौडाः। ४ श्रीरामशास्त्रि भण्डारिणः। ५ दुण्ढिराजशास्त्री। ६ पद्मप्रसादजी भट्टराईः। ७ एकस्तेषा-मेव पुत्रः यस्य नामेदानीं न स्मर्यते। ८ गिरीशदत्त शुक्लश्च।

अनेके केचन विद्वांसः इतोऽधीत्य बहिर्गता आसन्। मम पठनकाल एवाध्यापनरताः शिवसायुज्यं प्राप्तवन्तः। तेषां पाठनशैली मया श्रुताऽसीत्। ये खलु स्तोकमपि न्यायशास्त्रं तेभ्योऽधीतवन्तः ते महाव्यु-त्पन्नाः प्रकाण्डपण्डिता जाता नात्र शङ्कालेशः। एतादृशी व्युत्पत्तिविधायिनी पठनपाठनप्रणाली इदानीं ...श्रवणपथमपि नायाति।

...ष्वेव प्रसिद्धेषु काशीस्थविद्वत्सु श्रीपद्मप्रसादभट्टराईमहोदयानामपि नितरां प्रसिद्धिरासीत्। न्यायशास्त्रे चैतेषां पाण्डित्यं महदद्भुतम्। पठनपाठनशैली चात्यन्तं हृदयमर्मस्पर्शकारिणी। पूर्वमेते मारवाडी-संस्कृतमहाविद्यालये न्यायशास्त्राध्यापकपदे नियुक्ताः कतिचन वर्षाणि अध्यापयन्। पश्चाच्च संन्यासि-संस्कृतमहाविद्यालये वेदान्तशास्त्रेऽध्यापकाः सन्तो बहुवर्षाणि अध्यापनं चक्रुः। एतावत्कालपर्यन्तं नामैव मया श्रुतमासीत्।

व्याकरणशास्त्रमधीयानोऽहं मम सतीर्थ्यश्चानन्तशास्त्री घारेकरः शास्त्रिप्रथमखण्डत एव परम-पूज्यपादानां राजकीयसंस्कृतमहाविद्यालयस्य व्याकरणशास्त्राध्यापकानां गणपतिशास्त्रिमोकाटे महोदयानां सविधे सहैव पोष्टाचार्य द्वितीयवर्षं यावत् नैरन्तर्येण पठनमकार्षम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ते च गुरवो महामहोपाध्यायदामोदरशास्त्रिण ... दरमामन्त्र्य ... व्याकरणमर्मज्ञा आसन्। येषां सविधे अधीत्य ... प्राचार्या आसन्। आचार्यपरीक्षाया अन्तिमे वर्षे ... मासे। ... रव समीप ... प्रथमाकारकस्य व्युत्पत्तिवादस्य पाठः किञ्चिदेव पूर्वं जातः। श्रीभट्टराईमह ... यस्यक्त्वा स्व ... कस्मिंश्चिद् भवने निवासस्थानमासीत्। तस्यैव पार्श्वे नातिदूरे घाणेकरमहोदयस्य ... स्वपितृव्यभवने आसीत्। इदानीं भट्टराईमहोदयानां भवनस्य स्मृतिर्नास्ति। त... नोक्तं यदस्मत्सविधे एव भट्टराईमहोदयानां स्थानमस्ति। तेषां सविध एव द्वितीयवर्षे ... यदि भवते रोचते तदा तत्रैव कुर्याव इति।

मयाऽपि सुष्ठुतया स्थिरीकृतं मनसि स्वीकृतञ्च। तत आरभ्य तेषामेव गुरुवर्याणां गृहे ... कारकम् अधीतम्। परीक्षानन्तरं पोष्टाचार्यकक्षायां प्रविश्य वर्षद्वयं यावत् माथुरीपञ्चलक्षण... पञ्चलक्षणी, सिद्धान्तलक्षणम्, शक्तिवादस्य सामान्यकाण्डम्, अवच्छेदकत्वनिरुक्तिः कश्चिद्भाग... आमन्ते-वासितामेत्याधीताः।

तत्पश्चात् श्रीघाणेकरमहोदयाः ग्वालियरराजकीयसंस्कृतमहाविद्यालये उपप्रधानाध्यापकपदे नियुक्ता-स्तत्रैव गताः। अहमपि रायबरेलीसंस्कृतमहाविद्यालये उपप्रधानाचार्यपदे नियुक्तस्तत्रैव गतः।

वर्षत्रयेण यथासमयं न्यायशास्त्रस्याध्ययनं भट्टराईमहोदयानां कृपया जातम्।

तेषामध्यापनविषये किं वर्णयामः। अतीव सारल्येन प्रेम्णा हृदयग्राहिण्या रीत्या च तेषामध्यापनेन वोभूय्यते।

अहमपि कालक्रमेण वर्षचतुष्टयानन्तरं स्वीये मण्डले पाठशालायां नियुक्तो राजकीयसंस्कृतमहा-विद्यालये हाराणचन्द्रभट्टाचार्यमहोदयानां स्थाने नियुक्तः पुनरपि वाराणसीं प्राप्तः।

तेऽपि महोदयाः नेपालराजैः स्वीये संस्कृतमहाविद्यालये प्रधानाध्यापकपदे नियुक्ताः ससंमानं स्वदेशप्रेम्णा काशीं परित्यज्यापि स्वदेशं गताः। नेपाले काश्यां च जाते विश्वविद्यालये नेपाले विश्वविद्यालये पाठनव्यवस्थायाः किञ्चनकालपर्यन्तं राजकीयमहाविद्यालयत एव श्रीभट्टराईमहोदयाः परीक्षाकार्यं सञ्चालयांचक्रुः।

मयापि प्रश्नपत्रादिसंशोधनकार्ये साहाय्यसंप्रदानाय तत्र गमनं विहितं गुरुवर्याणां दर्शनञ्च जातं परन्तु कियत्कालानन्तरे ते अर्द्धाङ्गवातेन पीडिताः गृहे एवासन्। तदानीमपि राजकीयसाहाय्यं तेभ्यो महाराजेन प्रादायि।

गृहेऽपि तेषां दर्शनं कृतवानासम्। पश्चाच्छ्रुतं यत्तेषां कैलासवासो जातः।

शरीरे नश्वरेऽपि तेषां स्मरणं यावज्जीवं स्थास्यत्येव। तदेव स्मरणं तेषां चरणकमलयोः समर्पयन् विरमामि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

[illegible]र्यस्य स जीवति

लेखकः-बाबुरामपौडेलः

•

स्व[illegible]ः श्रीगुरुः पद्मप्रसादभट्टराईमहोदयो नेपालदेशस्य विद्वद्रत्नमासीत्। तदाहमन्वभवं [illegible]भवतः प्रगाढपाण्डित्यं यदा काष्ठमण्डपे वाल्मीकिसंस्कृतमहाविद्यालये स छात्रान् पाठयन्नासीत्। यद्यपि [illegible]वः संस्कृतभाषाविशेषज्ञमनीषिणः समुत्पन्ना नेपालदेशे, तथापि विशेषरूपेण विद्वज्जनगणनायां त्रिचतुरा [illegible] विद्वांसः क[illegible]ष्ठिकामध्यतिष्ठन्। तेषु व्याकरणक्षेत्रे पं० दधिरामपौडेलः पं० टेकनाथपौडेलश्चेति। संस्कृत[illegible]पालीसाहित्ययोर्भाण्डागारविवर्धने पण्डितराजः सोमनाथ सिग्द्देलः, न्यायवैशेषिकदर्शनयोः पद्मप्रसाद-भट्टराईमहोदयश्चेति। एते सर्वेऽपि विद्वांसः सरस्वत्याः प्रसादस्वरूपा येषां शिष्याः प्रशिष्याश्च स्वकीयक्षेत्रे पाण्डित्यं परिरक्षन्तोऽधिराज्ये तत्र तत्र समुपलभ्यन्ते, नेपालदेशस्य महद्गौरवमेतत्। परन्तु वयं दुःखमनुभवामः, यत् सोमनाथसिग्द्देलं विहाय अन्यैर्विद्वद्भिर्लेखनक्षेत्रे उदासीनताऽवलम्बिता। पद्मप्रसादमहोदयोऽपि तेषामेकतमोऽभवत्। मम पूज्यपादे नैष दोषारोपः। नाऽहं वाञ्छामि पूज्यपादेषु किञ्चिदपि कर्दमाक्षेपो भवेदिति।

स्मरामि यदाऽहं संस्कृतच्छात्रसङ्घ (नेपाल) स्य सभापतिपद आसम्, मम च वरिष्ठमित्राणि— केशवदीपकः, प्रा. वासुदेवत्रिपाठी (नेपालिविभागाध्यक्षः त्रि. वि. वि.), प्रा. ठाकुरपराजुलीः (त्रि. वि. वि.) इत्यादयो बहव आसन्, तदाऽस्माभिः "जयतु संस्कृतम्" इति मासिकपत्रिकाप्रकाशिताऽऽसीत्। २०१६ वैक्रमाब्दे काष्ठमण्डपे तस्यां पत्रिकायां प्रकाशनायाऽस्माभिः प्रार्थितः स महानुभावो मनोरमान् लेखान् दत्तवान्। अधुना स्मृतिपथं नैव आयान्ति यत् कतिषु अङ्केषु ते लेखाः प्रकाशिताः। परन्तु सत्यमेतत्-अतीव-पाण्डित्यपूर्णा लेखा अस्माभिः प्राप्ताः। तस्यां पत्रिकायां मुद्रिताश्च। न शक्नोमि वक्तुं छात्त्रावस्थायां [illegible]मानतया तस्य लेखस्य उच्चता श्रेष्ठता च कियत्यासीत्। परं जानामि ताँल्लेखान् तदानीन्तना विद्वांसः [illegible]श्च मुक्तकण्ठं प्राशंसन्। यथा तथा वा भवतु तत्रभवतो देववाण्यां लेखनशैली अतीव समीचीनासीत्। यथा कादम्बर्या लेखकस्य बाणभट्टस्य। नेपालिभाषायां देववाण्यां वा तत्रभवत्प्रणीतानि अधिकाधिकानि पुस्तकानि चेत् प्राप्स्यामस्तदा वयं सौभाग्यशालिनोऽभविष्याम।

किमपि स्यात्, सत्यपि लोकोत्तरसामर्थ्ये ग्रन्थलेखनादौ तत्रभवता यद् दारिद्र्यम्, औदासीन्यं वा [illegible]कृतं तत्र रुचीनां वैचित्र्यमेव महत्प्रमाणं प्रतिभाति। मत्कथनस्य एषोऽभिप्रायः कदापि नास्ति यत् गुरुणा किमपि न कृतम्। ये तु गुरुणा अस्मभ्यं प्रदत्ता निबन्धा इतस्ततो विकीर्णाः सन्ति तेऽतीव महत्वपूर्णाः, अनन्तरवर्तिनां सुधियां कृते मार्गदर्शका एव।

अपरञ्च तत्कालिकानां छात्राणां कृते गुरुणा किं विहितम्? धार्मिकक्षेत्रे गुरुणा किं किं सम्पादितम्? इति जिज्ञासमानान् प्रति किमपि स्वमतम् उपस्थापयितुं कामये। अहं २०१४ वैक्रमाब्दतः २०१८ वैक्रमाब्दपर्यन्तं संस्कृतमहाविद्यालये काष्ठमण्डपीये सिद्धान्तज्योतिषमवलम्ब्य अधीयानः प्रा.नयराजपन्त-प्रा.तोयनाथपाण्डेययोश्च छात्त्र आसम्। भट्टराईमहोदयात्तु अध्ययनस्याऽवसरो मया नैव उपलब्धः, तथापि संस्कृतच्छात्रसङ्घस्य नेतृत्वे आसीनत्वाद् विभिन्नासु च्छात्रसमस्यासु सहाध्यायिभिर्गुरुभिश्चाऽपि मम सम्पर्कः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रायेण प्रत्यहं भवति स्म। अस्मिन्नवधौ २०१७ वैक्रम[illegible] दरमामन्त्रे तात्कालिकदलगतसर्वकारेण अस्माकं संस्कृतच्छात्रसंघसं[illegible] छात्रैरध्ययनं विहाय विवादः प्रारब्धः। अन्ततो गत्वा मुष्टीमु[illegible] मास। उपर्युच्चारित संस्थाविभाजननीतेरस्माभिर्विरोधः प्रदर्शितः। दलगतसर्वकारे[illegible] नामानो वासुदेवठाकुररेवतीरमणकृष्णाधिकारिप्रभृतयश्छात्राश्छात्रावासतो नि[illegible]श्यक्त्वा पिच्छात्रसङ्घस्य आन्दोलनं वर्धमानमेव आसीत्। तदान्दोलनोपशमनाय च दलग[illegible]राष्ट्र गुरोः पद्मप्रसादस्य अध्यक्षतायां समितिरेका निर्मिता। तस्यां समितौ पं० गङ्गाधरपराजुलो[illegible] ध्यायौ च आस्ताम्। तदा गुरुः संस्कृतमहाविद्यालयस्य प्रधानाचार्यपदे विलसति स्म। अस्मासु आन्दोल कारिषु च्छात्रेषु "गुरुः क्रुद्धो वर्तते, तत्रभवतो न्यायं नैव प्राप्स्यामः" इति धारणा आसीत्। परन्तु वस्तु स्थितिर्भिन्ना समजनि। वयमध्यक्षेण गुरुणाऽऽहूताः। "गुरुः किं कथयिष्यति? अस्मान् सक्रोधदृष्ट्या द्रक्ष्यति? अवश्यमेव वाग्बाणानस्मासु प्रहरिष्यति" इति वितर्कवलिता गुरोः समीपे कथञ्चिदुपस्थिताः। तदा गुरोरग्रे वयं कम्पमाना आस्म। परन्तु गुरुणा वात्सल्यपूर्णस्वरेण वयं संबोधिताः सन्तः चकिताः सञ्जाताः। तदैव अस्माभिरनुभूतं विलक्षणं महीयस्त्वम्, असाधारणं शिष्यवात्सल्यं च गुरुवरस्य। तस्यामवस्थायां छात्रावासनिवाससौभाग्याद् अध्ययनविधेश्च वयं वञ्चिताः सन्तो नितान्तं खिन्ना अभूम। गुरोः स्नेहेन ममतया च सर्वकारसमक्षे प्रेषणीयं प्रतिवेदनमस्मादृशानां छात्राणामनुकूलमभवत् इति वयं पुनश्छात्रावासं प्रविष्टा अध्ययनरताश्च अभूम।

सरलया दृष्ट्या अवलोकने गुरुः आपाततोऽतिकठोर इव प्रतिभाति स्म। परं तथ्यमेतन्नासीत्। किन्तु गुरोर्हृदयं कोमलमासीत्। उत्तररामचरिते भवभूतिना उल्लिखितमस्ति "मृदूनि कुसुमादपि" इति सत्यमेतद् गुरोर्हृदयं कुसुमादपि कोमलम् अस्माभिरनुभूतम्।

एवं विद्यया सद्बुध्या गुरुणा च्छात्राणां मनांसि गिलितानि। अहमभिजानामि यदा गुरुर्महाविद्यालयस्य प्रधानाचार्यपदे, संस्कृतच्छात्रावासस्य सुपरिवेक्षकपदे च सुशोभते स्म तदा महाविद्यालयस्य प्रशासनम्, छात्रावासस्य सुपरीक्षणं छात्राणां च नियमेन अध्यापनम् इत्यादि कार्यं गुरोः कृते अस्माकं दृष्ट्या महान् भार इव प्रतिभाति स्म। तथापि गुरुणा हेलयैव तानि तानि सर्वाणि कठिनतराणि कार्याणि सफलीकृतानि।

"छात्रा अध्ययनाद् विचलिता न भवेयुः, तेषामनुशासनविषये च न्यूनता न जायताम्" इति मत्वा गुरुः कृत्रिमं क्रोधं प्रदर्शयति स्म। अन्तःकरणेन च छात्रेष्वतीव स्निह्यति स्म। यदा विद्यार्थिनो विद्यालयस्याऽवकाशसमये छात्रावासतोऽपि अवकाशं गृहीत्वा गृहं प्रति गच्छन्ति स्म तदा केनाऽपि समुचितकारणेन केचित् विद्यार्थिनः नियतसमये छात्रावासे विद्यालये वा नैव प्रत्यावर्तितुं शक्नुवन्ति स्म तेषां कृते नियमानुसारेण च्छात्रावासतो निःसारणरूपे प्रायश्चित्ते विद्यमानेऽपि गुरुणा नैव निःसारिताः। अस्मिन् गुरोर्दया स्नेहश्च कारणम्। अतः गुरोः कोमलान्तःकरणताविषयेऽपि च्छात्राणां मनसि गभीराऽऽस्था वर्तत एव।

यद्यपि मम अध्ययनस्य विषयो दर्शनं नाऽऽसीत्, अत एव तत्रभवतो विद्याध्ययनसौभाग्याद् वञ्चितः। तथापि अहं तदा बहुशोऽपश्यं यद् दर्शनसाहित्यविषयाध्यायिनां छात्राणां कृते गुरुः प्रातःकालादेव अध्यापने तत्परोऽभवत्। दिनेषु प्रधानाचार्यत्वेन सभासम्मेलनादिषु उपस्थातुमावश्यकत्वात् अध्यापनाय स समयं नैव प्राप्नोति स्म। अन्तेवासिनां कृते प्रातःकालिकं भोजनमपि त्यक्त्वा रात्रौ एकवारमेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

...तत्त्वच्छात्राः ... शक्य ... आचार्यपद्मप्रसादमहोदयो न केवलं दर्शनसाहित्यशास्त्रयोरेव ... संख्याः ... आसीत्। अहं स्मरामि देशस्य विभिन्नप्रदेशात् आचारविषये ... प्राप्तुं जनाः समागच्छन्ति स्म गुरोः सकाशम्। तत्रभवता सह शास्त्रार्थं ... निःशङ्कलेशं प्रत्यावर्तन्ते स्म, ना यत्रत्या एव काष्ठमण्डपेऽपि ... विषये आचारे धार्मिकविषये च तत्रभवतो वचनानि प्रामाणिकानि मन्यन्ते स्म।

... देशस्य संविधाने नेपालदेशस्य हिन्दूराष्ट्रत्वघोषणाद् गुरुः अतीव प्रसन्न आसीत्। ...धर्मस्य अधिकाधिकप्रचारार्थं धर्मरक्षा-महामण्डल नाम्नी संस्था संस्थापिताऽऽसीत्। तस्यां संस्थायां नेपालदेशस्य लब्धयशसः प्रतिष्ठिताश्च विद्वांसः पदानि अलङ्कुर्वन्ति स्म। तेषु गुरुर्गुरुतमो भूत्वा सभापतिपदं व्यभूषयत्। तस्यामवस्थायां गुरुः धार्मिकक्षेत्रेऽपि भागं गृहीत्वा सक्रियकार्यकर्तृत्वमात्मनः प्राख्यापयत्। अनेन प्रकारेण गुरुणा तत्र तत्र स्वकीया बहुमुखी प्रतिभा जनसमक्षं समुद्घाटिता। अहं तु छात्रत्वेन चतुष्पञ्चवर्षाण्येव तत्रभवतः सम्पर्केऽभवम्। परञ्च यैर्विद्वद्भिर्गुरोरध्ययनस्य स्ववसरो लब्धः ते परमभाग्यशालिनः सन्ति। यथासम्भवं त एव गुरोर्विलक्षणप्रतिभाविषये अत्यधिकं ज्ञातारः स्युः। अतोऽधिकं गुरोर्विषये लेखनाय तेष्वेव विश्वासमात्मनः स्थापयामि।

उपर्युक्तानुसारेण गुरुणा अस्माकं कृते स्वकीयदृष्टिकोणं विभिन्नेषु लेखेषु दत्वा महान् उद्धारः कृतः। अस्माकं सामाजिक-धार्मिकक्षेत्रयोश्च गुरोर्महद् योगदानं वर्तते इति निश्चितमेतत्। अहं मन्ये यथोक्तेभ्योऽप्यधिकतरा गुरोः पद्मप्रसादस्य दया, क्षमा, सौशील्यं, शिष्यवात्सल्यं सर्वत्र समस्नेहभावश्चेत्यादयो गुणा विद्यमाना आसन्। यस्य ममतया सहस्रशो विद्यार्थिनः वैदुष्यपदानि प्राप्तवन्तः। यस्य च कोमलहृदयत्वेन कारणेन बहूनां छात्राणामुपकारोऽभूत्। मम विचारे गुरुः स्थूलरूपेण नैवास्मिन् भौतिकसंसारेऽस्माभिर्द्रष्टुं शक्यते तथापि सूक्ष्मतरामत्यतिविशालां कीर्तिमूर्तिं भजन्तः सहस्रशः सन्ति विद्वांसः। अतः गुरुः पद्मप्रसादभट्टराईमहोदयः कीर्तिमूर्त्याऽद्यापि जीवति पुण्यभूमौ आर्यावर्ते इति सत्यमुक्तं प्राचीनैः कविभिः—

"कीर्तिर्यस्य स जीवति" इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीपद्मप्रसाद-

तत्रभवतां सुगृहीतनामधेयानां माननीयानां श्रीमतां पद्मप्रसादभट्टराईचरण[illegible] संस्म[illegible] किमपि वक्तुकामोऽहमत्र निजवक्तव्यविषयमुपस्थापयामि ।

मम पितुः वृद्धवामाचरणभट्टचार्यपादस्य विद्याव्यसनिन इमे छात्रा आसन्—श्री राजेश्वरशास्त्रि-द्रविडः, श्रीवामाचरणभट्टाचार्यः, श्रीपद्मप्रसादभट्टराईः, श्रीशिवदत्तमिश्रः, श्रीसूर्यनारायणशुक्लः, श्रीविभूति-भूषणभट्टाचार्यश्चेति । एते काशिकनैयायिकमण्डले प्रसिद्धा आसन् । वयमेभिः सार्धं चिरपरिचिता नाना शास्त्रीयं ज्ञानं समये समयेऽधिगतवन्तः । अध्ययन तु श्रीशिवदत्तमिश्रपादानासन्तेवसता मया कृतम् । श्रीपद्मप्रसादभट्टराईमहोदयः मदीयबाल्यावस्थाया आरभ्य दीर्घकालं परिचित आसीत् । प्रतिवर्षं भट्टराई-महोदयो गुरुपूर्णिमादिवसे सरस्वतीपूजादिवसे च अस्माकं गृहे आगच्छति स्म । तत्र च समागतानां पूर्वोक्तानां श्रीराजेश्वरशास्त्रिप्रभृतीनां पारस्परिकः शास्त्रीयालापो भवति स्म । तत्रोपविष्टैरस्माभिरपि तेषां शास्त्रीयालापस्यांशतो ग्रहणं क्रियते स्म । एवं यावत्कालं भट्टराईमहोदयः काश्यां निवसन्नासीत् तावद-स्माकं भट्टराईमहोदयेन सह सुमहान् सारस्वतसम्पर्कोऽविच्छिन्न आसीत् । बहुवारमहं श्रीभट्टराईमहोदयस्य काशिकावासस्थले गतवान्, तदीयमकृत्रिमं मयि स्नेहमिदानीमपि स्मरामि । भट्टराईमहोदयः शास्त्रीयमर्मज्ञो विद्वान् आसीत् । मूढमतयोऽपिच्छात्रास्तदीयाध्यापननैपुण्येन शास्त्रीयं चातुर्यमधिगच्छन्ति स्म इति । अस्माभिस्तदीयछात्रमुखादेव बहुशः श्रुतम् । श्रीभट्टराईमहोदयः प्रगाढशास्त्रीयचिन्ताशील आसीत् । तन्निर्मित परीक्षाप्रश्नपत्रदर्शनेनैव काशिकनैयायिका अवगच्छन्ति स्म–यदिदं प्रश्नपत्रं श्रीभट्टराईविरचितमस्तीति एवं तदीयप्रश्ने किमपि वैशिष्ट्यं नवीना वा काचित् चिन्ताधारा दृश्यते स्म । भट्टराईमहोदयानामनेके छात्रा आसन्, मम छात्रावस्थायां तैः सह परिचय आसीत् इदानीं तेषु कः कुत्र निवसतीति न ज्ञायते । [illegible] प्रान्ते सर्वकारीयसेवां स्वीकृत्य द्वारबंगदेशं गतस्य मे ताराकान्तझामहोदयेन सह परिचयोऽभूत् । तन्मुखादेवावगतं मया यत् स भट्टराईमहोदयस्यान्तेवास्यासीदिति । ताराकान्तझामहोदयः बिहारराज्य-सर्वकारीयसंस्कृतविद्यालये प्रधानाध्यापकपदमलंकुर्वाण इदानीं सेवानिवृत्तोऽभवत् । भट्टराईमहोदयो न केवलं दर्शनशास्त्रे निष्णात आसीत् । अपि तु विषयान्तरेऽपि तदीया मतिः सुनिपुणाऽसीत् । नेपालदेशे शालग्रामशिला लभ्यते इति तद्विषये विशेषं जिज्ञासमानोऽहमेकदा भट्टराईमहोदयस्यावासं गतः । तेनाहं शालग्रामशिलाचक्रविषये बहुधा उपदिष्टोऽभवम् ।

दीर्घकालं वाराणस्यां छात्रेभ्यो विद्यावितरणं कृत्वा लब्ध्वा च प्रभूतां कीर्तिमन्ते भट्टराईमहोदयः-स्वदेशे विद्यादानार्थं गतवानासीत् । तत्रैव निवसता भट्टराईमहोदयेनाहं बहुधोपकृतोऽभवम् । यत्र यत्र भट्टराईमहोदयस्याधिकार आसीत् तत्र तत्र परीक्षाकार्ये परीक्षकरूपेण ममापि तत्र नियुक्तिर्भवति स्म । विद्याव्यसनी भट्टराईमहोदयः सदा शास्त्रचिन्तापरायण आसीत् । यदा कदाचिद् वाराणस्यामस्माकं गृहे मम पितृव्यमहोदयस्य निकटे समुपविश्य निबन्धं स्वलिखितं तं श्रावयति स्म । श्रीराजेश्वरशास्त्रिद्राविडमहोदयस्य सारस्वत-समाजे भट्टराईमहोदयस्य विशिष्टं सम्मानमासीत् । शास्त्रिचरणाधिष्ठिते सांगवेदविद्यालये प्रतिवर्षं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

[illegible]। काश्यां विद्यादानेन निजपाण्डित्यप्रकर्षेण च नितरां [illegible] संख्याव[illegible]। स्वदेशाद् बहिस्तदीयं यादृशं सम्मानमासीत् तद्दर्शनेन [illegible]तः। [illegible] एव समुचितपदे तं संस्थाप्य यथोचितं पण्डितप्रवरस्य स्वदेशं प्रत्या[illegible] तवन्त इति। वस्तुतस्तु स्वदेशवासिभिः कृतं यत् सम्मानं, तदपेक्षया वैदेशिकैः [illegible]नामधिकगौरवावहं भवति, स्वदेशवासिभिः कृते सम्माने सम्बन्धनिबन्धनः पक्षपातः [illegible], वैदे[illegible]कृतसम्मानन्तु गुणैकनिबन्धनं भवति। एवं वाराणस्यां सर्वभारतीयानां विदुषां समाजे [illegible]ट्टराईमहोदयो यद् अङ्गुलिपर्वगणनीयेषु मुख्येषु पण्डितजनेषु विशिष्टं स्थानमधिगतवानासीत्, तत्र केवलं तदीयः सुमहान् विद्वत्तागुणः कारणं विद्यते इत्यत्र न कस्यापि सन्देहलेशोऽपि विद्यते।

सोऽयं पण्डितप्रवरोऽशेषगुणगणभाजनं श्रीपद्मप्रसादभट्टराईमहोदयः सततमस्माभिः संस्मरणीयोऽस्ति, येन महाजनपथे गमनप्रवर्त्तनमस्माकं भवेदिति शम्।

भारत-नेपाल-राष्ट्रयोर्गौरव-संवर्द्धकानां श्रीपद्मप्रसादानां संस्मरणम्

—डॉ० पी० एन्० पट्टाभिरामशास्त्री

नेपालाभिजनानां विपश्चिदपश्चिमानां श्रीपद्मप्रसाद-महाभागानां चिरस्मरणाय तदनुयायिभिरभिनन्दनग्रन्थः प्रकाशयिष्यत इति निशम्याहं प्रसन्नचेता अभवम्। न्याय-वेदान्त साङ्ख्ययोग-धर्मशास्त्रादिष्वप्रतिहतं तलस्पर्शि पाण्डित्यमावहन्तस्ते काशिकपण्डितमण्डल्या भूषणायमाना व्यराजन्त। तेषां जीवनं सततमध्ययनाध्यापनव्यापार एव व्यतीतम्। 'अधीतमध्यापितमर्जितं यशस्तैः'। सत्यमेव ते त्यागमूर्तयोऽभवन्। इतरदुरवापेन वैदुष्येणानितरसाधारणेन वाक्पाटवेन सह विनयातिशयस्तान् समलङ्करोति स्म। छात्रेषु तेषां वात्सल्यमतिस्पृहणीयमभवत्। तत्र तत्र पण्डितसभासु तेषां पदार्थोपपादनशैली विद्वन्मनांस्यावर्जयति स्म। एतादृशैर्विद्वद्रत्नैरेव भारतराष्ट्रस्य नेपालराष्ट्रस्य च गौरवमवर्द्धतेति कथनं नात्युक्तयें स्यादिति सम्भावयामि। इतः प्रायो द्वादशत्रयोदशवर्षेभ्यः प्राक् (वर्षसंख्यां न स्मरामि) त्रिभुवनविश्वविद्यालयीयपरीक्षाकार्यवशेन न्यायाचार्यैर्मित्रमणिभिः श्रीहरिरामशुक्लैस्सह काष्ठमण्डपं गतोऽहं पण्डितप्रवरान् श्रीपद्मप्रसादान् महतामयेन समाक्रान्तान् शय्यायां स्थितानद्राक्षम्। रुग्णा अपि सततं शास्त्रचिन्तनपरा एवासन्। मनसा वाचा कर्मणा च ते सदैवैकरूपा एवावर्तन्त। एतादृशानां विद्वद्वरेण्यानां पुण्यश्लोकानां षट्कर्मनिरतानां स्मरणं महाघौघनिवारणाय स्यादिति तान् स्मरामि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पद्मप्रसाद उरुगीतपद·

कविरत्नं कृष्णप्रसाद·

सर्वतन्त्रस्वतन्त्रराष्ट्रनेपालभालतिलकभूतायाः काष्ठमण्डपराजधान्याः किञ्चित् पू·· "रा·· इति सुप्रसिद्धस्थाने लब्धजन्मा स्वनामधन्योऽयं 'भट्टराई' त्युपनामा पद्मप्रसादो विपश्चिद् आसीद्। स्वबाल्यकालादेव विलक्षणो विचक्षणप्रतिभासम्पन्नो बालकः। अप्राप्तवयसश्चाप्यस्य दृष्ट्वैव तादृशीमसदृशीं प्रतिभां प्रेरयामासुरमुं तत्सद्गुणविमुग्धाः स्निग्धास्तत्रत्याः स्वजना अपि तत्पितृभ्यां समं सम्यक्तया विज्ञातुं पठितुञ्च प्राच्यसंस्कृति-संस्कृतां परां विद्याम्।

ततोऽसौ संप्राप्तप्रेरणः स्वगुरुभिः सुकृतसद्व्यवस्थः समये प्रवर्धमाने जानकीजानेः सन्नामस्मरण-पूर्वकं गिरिराजसुपुत्रीजानेः कृतत्रिपुरासुरहानेर्भगवतो विश्वनाथस्याऽनाथनाथस्याऽशरणशरण्यस्यानन्दकाननाऽपरपर्यायं काशीनगरं समागत्य सुगमीकृतनिवासाऽशनवसनप्रबन्धः स्वगुरुभ्यः सम्प्राप्तां तत्कालोचितां बहुविधविद्याविद्योतितान्तःकरणां सत्प्रतिभां स्वात्मनि संस्थापयामास।

तदनन्तरमसौ पठित्वा सर्वप्रथममन्यद्ग्रन्थजातं स्वलक्ष्यप्राप्तिसहायभूतं पपाठ न्यायविद्यां नव्य-प्राचीननाम्नीमुभयरूपां बहुविधरीति नीति-स्थितिनिदर्शिकाम्। यस्यां सम्प्राप्तसुललितगतिरुपलब्धसु-विशदमतिः पुनरपि विशुद्धतमां तां विधित्सुश्चकारानन्यगामिव सतताभ्यासरूपेणान्यतो विषयवस्तुभ्यः सम्प्राप्तवैराग्यवशेन च प्रतीक्ष्यचरणेषु स्वगुरूपूपस्थाप्य बहुरूपांश्चर्चापरिचर्चात्मकान् युक्तिमत्तर्कवितर्कोपस्थापननिवहान्। समाससाद चेत्थमसावलब्धपद्मप्रसादो भट्टराईपद्मप्रसादश्चतुर्दशशास्त्रावगाहनकौशलं तत्सारसर्वस्वं च सुमहता परिश्रमेण गुरुवराणामकम्पानुकम्पानुगताशीर्वचनैश्च सत्पात्रत्वानुरूपाभिस्तत्काला-चिताभिः स्वसत्कृतपरिचर्याभिः।

किमु वक्तव्यमहो! ततस्त्वसौ चतुःषष्टिदिवसैरधिगतचतुःषष्टिकलो भगवान् वसुदेवनन्दनो नन्दनन्दन इव विरराज वाराणसेयविद्वज्जनसंसदमप्रतिमामपि सप्रतिमामिवाऽऽत्मना विरचयन् सदस्यगणेषु विद्योतमानः स्वयैव प्रतिदिनं प्रतिक्षणञ्च परिवृद्धया वैदुष्यातिशयमितया सुप्रतिभया शरीररुचैव सभ्यानां तर्ककर्कशहृदयानां दुरूहान्वीक्षिकीपरिमूढानां सर्वथा विभ्रान्तमपि मानसमखर्वगर्वापहतान्तःकरणं समुच्छ तत्सत्यतत्त्वार्थसिद्धान्तप्रकाशविद्योतितान्तस्तलं सम्पाद्य रात्रिन्दिवं बहुविधासु संस्कृतपाठशालासु च भ्रामं भ्रामं तत्रतत्रत्यान् शिष्यगणान्निरन्तरं विशेषेण न्यायशास्त्ररहस्यं शिक्षयन्नसौ ब नि हायनान्तराण्य तिवाहयामास काश्यामेव भगवतो विश्वनाथस्य प्रियतमायां नगर्याम्।

यदाऽस्माभिर्नेपालनिवासिभिरप्येतत्सर्वं व्यलोकि चर्मचक्षुर्भिर्यदा वा तत्कृत्यजातं विश्रुतं स्वकर्णकुहरैस्तदैव विमुग्धहृदया वयमपि तज्ज्ञानलाभार्थं समुत्सुकाः लोलुपाश्चाभूम। ततो भृशमेतस्य कृते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

[illegible] रागिभिस्तन्नेपालाह्वयने नैरन्तर्येण प्रार्थितमस्मद्राष्ट्रशासनं [illegible] लदेशिकविद्या सर्वोच्चतरा भूत्वापि प्रवासप्रियैव सञ्जातेति” [illegible] विद्यार्थिनिवहसत्क्रियां विधातुं राष्ट्रीयशासनेनाऽपि त्वरितं स्वदेशं प्रत्या[illegible] युक्त [illegible]सनानुरोधं समुचितं मन्यमानः स्वदेशराजधानीं प्रत्यावर्त्या- [illegible]श्वविद्यालयान्तर्गतं वाल्मीकिविद्यापीठाभिधेयं संस्कृतसंस्थानस्य समुचितं स्वस्थानम्।

[illegible] तत[illegible]मत्प्रतिवेशिरूपेणैवाऽत्र संतिष्ठमानेनाऽमुना संस्कृतप्रकाण्डविदुषा शिष्यनिवहेषु यादृशी [illegible]तरैरप्यननुभूताऽऽत्मकृपा संदर्शिता यथा वा ते पाठिताः स्वसदृशाः सम्पादितास्तत्सम्यक्तया वक्तुं लिखितुं वा यथार्थतो न पारयामो वयं स्वचर्मचक्षुर्भिर्निरीक्षमाणाः सन्तोऽपि। यदैव ते शिष्यनिवहाः स्वयमेव गुरुकल्पा भूत्वा शिष्याननेकानेव पाठयन्ति स्म स्वगुरोः सदृशं भद्रासनमधिरुह्य। इत्थमेवैतैर्विद्वच्छिरोमणिभिर्महापुरुषैर्यें नाम नेपालीया विद्वांसः प्रकाण्डपण्डिताः स्वसदृशाः सम्पादितास्तेषामपेक्षया भारतीया एव बहुसंख्ययाऽध्यापकपीठं शासकीयसन्मानोच्चतरपदञ्चालङ्कुर्वन्तोऽद्यापि भृशं विराजन्तेतमाम्। एतदेवैतेषामृषिकल्पानां वृद्धतमानाञ्च विद्यातपोभ्यां महामहनीयं महत्वं नेपालभारतयोर्मध्ये जरीजृम्भतेतरामिदानीमपि।

ततश्चान्तेऽसौ विद्याधानोऽस्मत्पूज्यचरणः सुपवित्रयशाः प्रस्तुतः पद्मप्रसादो नेपालराजेन महायज्ञसम्पादने आचार्यत्वग्रहणायालमभ्यर्थितोऽङ्गीकृत्यैव च तं यज्ञमपि सविधि प्रारम्भयामास। हन्त! असमाप्त एवाऽस्मिन् यज्ञमहोत्सवे मण्डपमध्य एव सहसा महीयसा दौर्भाग्येणासौ व्याहतः पक्षाघातव्याधिना। अयमेव सुमहादुःखहेतुः समजन्यस्माकं समेषां कृतेऽपि। तदनन्तरमष्टौ वर्षाणि यावत् तत्कष्टजातं सोढं सो[illegible] ब्रह्मपदं समवाप्तवानसौ विद्वच्छिरोमणिः पद्मप्रसादो भट्टराईः।

इत्थं स्मृतिशेषस्य चिरस्मृतौ तत्सद्गुणलुब्धैः विद्वद्भिः शीघ्रमेव प्रकाश्यमाने स्मृतिग्रन्थे तदनु[illegible]येव विलिखितः सश्रद्धं तच्चरणयोः समर्पितोऽयं लेखरूपः शुभास्थामयः श्रद्धाञ्जलिश्चिरं दीव्यता[illegible]शास्तेऽयं जनः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भट्टराईमहोदयानां सं...

पण्डितप्रवर-पद्मप्रसादभट्टराई-महोदया जगति सर्वविद्वत्–प्रसिद्ध–पण्डितप्रवरपुण्...र्ति वृद्ध... चरणभट्टाचार्याणां स्वनामधन्यशिष्योत्तमाः। अत एव श्रीकाशीसाङ्गवेदविद्यालयप्रधानाध्यक्षाणामस्मद्गुरुचरणानां श्रीपण्डितराजेत्यन्वर्थ–पुण्यनाम्नां विद्वद्घोषितविद्याकीर्तिनां श्रीराजेतीश्वरेतिसमस्तपदबोध्यद्राविडशास्त्रिचरणानां सतीर्ध्यत्वाद् गुरुबन्धव आसन्निति सर्वविदितम्। श्रीसाङ्गवेदविद्यालये एका विदुषां सभा प्रचलति श्रीगीर्बाणवाग्वर्धिनीति नाम्ना, या सर्वतो लोकैः क्रियमाणानां शास्त्रीय-लौकिकराजनीतिकादिविषयेषु प्रश्नानां समुत्तराणि प्रददाति, यत्र पण्डितराजाः सञ्चालकास्तत्काले आसन्। श्रीपण्डितप्रवरपद्मप्रसादन्यायाचार्य-भट्टराई-महोदयास्तत्र मध्यस्थसदस्या यदा तदा अध्यक्षस्थानेऽपि वृताः कार्यदर्शिनः सन्तो दृष्टाः। प्रायः समुपस्थिता एवाधिवेशनेषु विचारविमर्शेषु च सहभागिनोऽभवन्।

यदा कदाचित् अनुपस्थितेषु भट्टराई महोदयेषु कृतान् निर्णयान् प्रष्टृसकाशं प्रेषणात्पूर्वं श्रीपण्डितराजो भट्टराई महोदयं प्रदर्श्य तदनुमोदनापेक्षया अस्मदादिविद्यार्थिहस्ते दत्त्वा तत्सकाशं प्रेषयन्ति स्म, तदानीं दृष्टं विदग्ध-चरितं भट्टराईमहोदयानाम्। यथा—

"नानाशास्त्रार्थनिष्पन्ना मतिः स्याच्छ्रुतधारिणी।
संशयच्छेदनैः शिष्यहिताधानार्थदर्शनैः।
वर्ण्यते चित्तसन्तोषाद् विदग्धव्यवहारतः॥"

(भावप्रकाशनम् अधिकारः १, श्लोकः १५०)

इत्युक्तं लक्षणं श्रीभट्टराईमहोदयेषु बहुधा दृष्टमस्माभिः। किमधिकं वर्णयामः। एतावता श्रीपण्डितराजसभासमादृतं तदीयं विदग्धचरितं निश्चप्रचमिति।

१. पूर्वाश्रमनाम "हेब्बारशास्त्री" इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुभैषणा

—ज्योतिष्पीठाधीश्वरशङ्कराचार्यश्रीस्वामिशान्तानन्दसरस्वती

•

साम्प्रतिकसुरभारतीसमुपासकानां समेषां वैदुष्यावच्छिन्नचेतसां संस्कृत-संस्कृति-समुपासकानां सुविदितैवास्ति विद्वद्वरेण्यपद्मप्रसादस्य गौरवगाम्भीर्यस्य गिरा गूढाऽधिरूढता ।

अस्य महाभागस्य जन्मस्थलत्वेन निर्देशतामवाप्नोति ताम्रकौशिक्याः सन्निधौ स्थितं सामलोनामकं स्थानम् । यन्नेपालराज्ये सम्प्राप्तमस्ति । विपश्चितः पण्डितवरस्य प्रागध्ययनं मध्यमापर्यन्तं काष्ठमण्डप एव जातम् । ततः परं विद्याव्यसनी शास्त्रपिपासासक्तो विद्यापारङ्गतिप्राप्तीच्छया संस्कृतराजधान्यां वाराणस्यां समागत्य साक्षाच्छिवस्य प्रसादतः प्राप्तयाखिलविद्यया सूक्ष्मगतिरासीत् प्राचीने नव्ये च न्याये व्याकरणे वेदान्ते धर्मशास्त्रे च ।

गुरुभक्तिस्तु पण्डितवरस्य जीवने प्रतिपदमनुभवपथे समायाति स्म जनानाम् । कृतभूरिपरिश्रमार्जितविद्यारक्षणाय, वैदिक संस्कृतिपोषणाय, विद्याध्ययनशालिनां सुष्ठुबोधनाय च काश्यामध्यापनमङ्गी चकार ।

अध्यापनपरो विद्वद्वरोऽयं छात्राणां सम्यग्बोधनाय सततं पाठशालासमये पाठशालायामतः परं स्ववासस्थले च रात्रावेकादशवादनं यावत् नैपालिकान् भारतीयाँश्च च्छात्रान् सम्यक्प्रबोधयति चाध्यापयति स्म, व्याकरण साहित्य धर्मशास्त्र-वेदान्त-सांख्ययोगादिविषयान्, तथाऽपि न्यायदर्शनगत नव्य-प्राचीनभागे तस्यासीद् [illegible]विशिष्टाधिकारः ।

विशिष्टाचार्योपाधियुक्तः पद्मप्रसादः स्वोत्कृष्टपाण्डित्यकारणात् स्वदेशे विदेशे च विविधैः उपाधिभिः [illegible]भूषित आसीत् ।

अष्टोत्तरद्विसहस्रतमे वर्षे काश्यां विद्वत्सभया 'न्यायरत्न'पदेन सम्मानितः । पश्चाद्दर्शनालङ्कार-[illegible]वीमपि गृहीतवान् । नेपालगमनानन्तरं महाराजाधिराजमहेन्द्रेण ससम्मानमा य संस्कृतमहाविद्यालयस्य प्राध्यापकपदे स्थापितः । ततस्तु राजकीयसंस्कृतमहाविद्यालये पूर्वमुपप्रधानाचार्यपदं पश्चात् प्रधानाचार्यपद-मलङ्कृतम् । कालान्तरे त्रिभुवनविश्वविद्यालये संस्कृतस्य प्रथमं प्राध्यापकपदं गृहीतम् ।

इत्थं यावज्जीवनं संस्कृतनिष्ठवृत्त्या कालमयापयत् । जातस्य हि ध्रुवो मृत्युरिति रीत्या २०३० तम-वर्षस्य माघकृष्णप्रतिपदि, दिवसे द्विवादनसमये रामनामोच्चारणपुरस्सरं पशुपतिसन्निधौ स्वासून् विसृज्य शिवलोकमाप्तवान् ।

संस्कृतसंरक्षणकृतसर्वजीवननियोगस्य दिवङ्गतविद्वद्वरपद्मप्रसादस्य कीर्तिकौमुदी अवनितले चन्द्रवत् सर्वदा प्रकाशिता भवतु । स्मृतिग्रन्थ-प्रकाशकानां प्रति शुभकामनया सह आशीर्वचनमस्माकं यद् ग्रन्थोऽयं जनम[illegible] जनयतु इत्यलमतिविस्तरेण ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महनीयकी [illegible] दरमामन्त्र [illegible] मास। [illegible]

सृष्टेरादावखिलब्रह्माण्डनायकस्य निर्मितिरूपेण विराजमानोऽयन्नेपालदेशः। [illegible] देश [illegible] प्रविरलकाननकान्तारगिरिनदीतोयमूलोपत्यकाधित्यकादिभिः सुशोभितः। बहुविधौषधिगुल्मलताल [illegible] मकरन्दमाकन्दायिते देशे कामक्रोधमोहमात्सर्यप्रभृतिदोषानपाकृत्यान्तःकरणावच्छिन्नचैतन्यस्य जीवस्य कल्याणं भवितुमर्हतीति निखिलजीवानां शिवसङ्कल्पेन भूयांस ऋषिमुनयोऽत्रैव जनिं लेभिरे। अस्मिन्नेव हिमवत्खण्डे [1]किरातदेशनेपाले तपस्तेपिरे। अखिलभूमण्डले दोधूयमानकीर्तिकल्पस्य समग्रपुराणोपपुराणब्रह्मसूत्रमहाभारतप्रभृतिनिर्मातुः भगवतः कृष्णद्वैपायनापराभिधव्यासस्य जनिभूर्नेपाल एव नात्र विचिकित्सावसरः। महर्षि [2]पराशरेणापि तत्रैव तपो व्यधायि। पञ्चविंशतितत्वानां यथार्थज्ञानेन त्रिविध-दुःखात्यन्तनिवृत्ति समयप्रतिपादकस्य महर्षेः कपिलस्य सांख्यागमप्रवर्तकस्योद्भवभूमिः साम्प्रतिककपिल-वस्तुरिति निश्प्रपञ्चं गदितुं प्रभवामः। कालान्तरे तच्छाक्यसिंहस्य पितुः शुद्धोदनस्य राजधानीतीतिहास-विदां वराणां मतमस्ति। भगवतो मर्यादापुरुषोत्तमस्य रघुकुलतिलकस्य रामचन्द्रस्य कुलगुरुवसिष्ठ[3]स्यापि साधनप्रपञ्चबाधनभूमिरियमेवेति नात्र शङ्कापङ्ककलङ्कावसरः। शृङ्गेर्पीयमेव साधनास्थली। विदेहराजस्य जनकस्य कुलपुरोहितयाज्ञवल्क्यशतानन्दकहोलादीनां जनिभूर्नेपाल एव। वेदादारभ्य शतपथब्राह्मण-पुराणादीनां प्रादुर्भावो हिमवत्खण्डे जात इति तत्तद्ग्रन्थालोकनमात्रेणावगम्यते। महाज्योतिर्विदपि [illegible] [4]असितस्य जन्म काष्ठमण्डपस्य पूर्वस्यां दिशि गिरिशिखर आसीत्। तत एव तथागतस्य जनिमाकर्ण्य शुद्धोदनस्य कपिलवस्तुराजधानीमगात्। अनेनैव असितनामकेनर्षिणा शाक्यसिंहस्य भाविसम्राट्त्वं बुद्धत्वञ्चो[illegible] द्घोषितमासीत्। एवं रीत्या अग्निदत्तसुतस्य [5]ककुच्छन्दसो जन्म क्षेमावत्यां जातम्। तदानीन्तन 'क्षेमावती' नेपालराष्ट्रस्योपत्यकायां काप्यासीत्। सम्प्रति सा तन्नाम्ना न व्यवह्रियते। तस्याः इदानीम [illegible] धेयज्ञातमिति प्रतिभाति। क्षेमावत्या अपरं नाम 'नाभिका' इत्यभिधीयते। इदं बौद्धग्रन्थेषु [illegible]

१—अत्र विषये "वेदमा के छ ?" ग्रन्थस्य [पृ० सं० १६६ तः १७८ पर्यन्तं] द्रष्टव्यम्।

२—पारकोटान्यतीर्थञ्च वर्तते पुण्यदायकम्।
मांद्रिकाशुक्लगण्डक्योः सङ्गमे शङ्कराभिधम्॥
तपश्चकार तत्रैव पराशरमहामुनिः।
पराशरगुहा तत्र तपस्सिद्धिप्रदायिनी॥

जज्ञे मत्स्योदरी-पुत्रस्तत्र द्वीपे पराशरात्।
पुराणसंहिताकर्ता वेदशास्त्रप्रवर्तकः॥ [स्क० पु० हि० खं० दे० म० ५०]

३—वसिष्ठोऽपि महाबुद्धिश्चकार परमं तपः। [स्क० पु० हि० खं० दे० म० १ अ० २५]

४—[फाहियान परिशिष्ट पृ० सं० १०६]

५—[फाहियान परिशिष्ट पृ० सं० १०८]

[illegible] वा [illegible] तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

[illegible] शाक्य [illegible] र्षु द्वितीयो बुद्धः। एवञ्च यज्ञदत्तस्य पुत्रः "कनकमुनि'रपि [illegible] भवे [illegible] संख्या [illegible] अयमपि कुलीनाग्निहोत्रकर्मसम्पन्नो ब्राह्मणकुलभूषणमिति [illegible] न्तः। [illegible] बभूवेति। बुद्धवंशानुसारेणास्य 'परिनिर्वाण' पर्वतारामे स्वदेशं प्रत्या [illegible] र्वतारामः' धलागिरिमुक्तिनाथयोर्मध्यभागे वर्तते। सम्प्रति तु 'सैनामैने'तिनाम्ना [illegible] कस्यापि [illegible] चतुर्विंशतिबुद्धा बभूवुरिति तन्मतख्यातिः। तत्र भद्रकल्पनामककल्पे चत्वारो 'बुद्धा [illegible] अन्प्रव [illegible] न्त। तेषु प्रथमः काश्यपबुद्धो, द्वितीयः ककुच्छन्दः, तृतीयः कनकमुनिः, चतुर्थो मायादेवी-[illegible] शाक्यमुनिर्बुद्धः। येषु त्रयो नेपालीया विद्वांसो बभूवुः। शाक्यसिंहस्य प्रियतमशिष्य आनन्दोऽपि [illegible] र्यालस्थः। "सुभद्रा'ख्यः कश्चन त्रिदण्डी, बुद्धस्य परिनिर्वाणसमये कुशीनगरं समागतः। अन्ते च बुद्धसकाशात् भिक्षुवेषं गृहीत्वा १२० वर्षपर्यन्तञ्जीवन् परिनिर्वाणं गतः। अयमपि धुरन्धरशास्त्रमर्मज्ञ इति। एवञ्च मञ्जुश्र्यमिताभभिक्षु-शान्तिदेवपादप्रभृतयो मुनय ईशापूर्वस्था आचार्याः सुरराजनन्दन-काननाधरीकरणक्षमं समस्तविद्याकेन्द्रं नेपालमलङ्कृतवन्तः। अत्र भागचतुष्टयं विधातुं युक्तम्। प्रथमः किरातकालः। द्वितीयो लिच्छविकालः। तृतीयो मल्लकालः। चतुर्थः शाहकालः। तत्र प्रथमः किरातकालः, शाक्यमुनिबुद्धावतारसमये प्रायस्समाप्तः। लुम्बिनीनन्दनस्य बुद्धस्यावतारकाले किरातशासकेष्वन्तिमः 'थुकोहाङ्ग' नामकः शासक आसीत्। किरातकालिकवाङ्मयरचना तस्य किञ्चित्कालपूर्वमेवावसिता।

अत्र विशेषरूपेण शेमुषीजुषामवधेलिमोऽयं विषयः। पुरावृत्तविदां वराणां विशेषानुसन्धानेन गोपालवंशशासनानन्तर किरातशासनकाल इति विवेकशून्यप्रलापः प्रतिभाति। गोपालाभीरवंशशास-नात्पूर्वमेव किरातशासनमिति वयमुत्पश्यामः। यतो हि समस्तवैदिकवाङ्मयेषु तेषामुल्लेखः केनापि मति-वैभवशालिना शक्रेणाऽपि तिरोहितुं न शक्यते। एतस्य समीचीनविवेचनाऽन्यत्र भविष्यति।

समुररीक्रियमाणे विषये ईसवीयशतकात्पूर्वमेव किरातकालिकसमस्तविषयकसाहित्यनिर्माणावसिते [illegible] च ई० प्रथमशतकादितः प्रथममानदेवः स्वयमेव साहित्यकार इति तस्यैव 'नारायणस्तुति' ग्रन्थतो गम्यते। ततः शिवदेवांशुवर्मप्रभृतिलिच्छविशासनकालमल्लशासनकालशाहशासनकालेषु २३९ संख्याक-विविधविषयमवलम्ब्य ग्रन्थकर्तारो नेपाले बभूवुः। 'नेपालस्य संस्कृतसाहित्ये योगदानम्' इति नामकस्य [illegible] शोधप्रबन्धे सामान्यसङ्ग्रहो विद्यते। टीकारामखनालस्य शोधप्रबन्धस्य साक्ष्यनुसारेण [illegible] सं० ५४ तः ७४ पृष्ठपर्यन्तं २३९ विदुषां ग्रन्थानामुल्लेखोऽस्ति। शोधप्रबन्धस्य पृ० [illegible] १ तः ९१ पर्यन्तं २०३—ग्रन्थकाराणां सङ्ग्रहो दरीदृश्यते। ग्रन्थे बहुत्र कालव्यत्ययोऽपि स्वभावत एवागतः। प्रबन्धे निर्दिष्टग्रन्थाः प्रायशः काष्ठमण्डपराजकीयाभिलेखालयेषु सुरक्षिता इति। एवञ्च वैरोचन-कनकश्री मञ्जुघोष-नागार्जुन रत्नकीर्ति वागीश्वरकीर्ति-प्रभृतयः, संख्यावत्कुलतिलकायमाना वाणी-विलासप्रभृतयः विपश्चिदपश्चिमा ईसवीय-पञ्चमशताब्दीतो दशमशताब्दीपर्यन्तं राजानन्ति स्म नेपाले। इमे समेऽपि चित्रगवीकाखण्डलाः केवलं नेपाले भारते च प्रख्यातकीर्तय इति न वक्तुं शक्यते। अपितु प्रतिलब्धावसरलेशमात्रेण तत्तत्प्रसङ्गप्रचयमात्रेण लङ्का-बर्मा-चीन जापानप्रभृतिदेशानां गौरवपूर्णे तिहासेष्वपि रेखायिताः स्युः। तदानीं नेपालमागत्याऽधीतविद्यानां मध्ये काश्मीरप्रदेशस्य प्रसिद्धपण्डितः भिक्षुर्विमलश्रीभद्रः, तिब्बतदेशस्य प्रसिद्धयोगिलामापार्माः अन्ये चानेके प्रसिद्धाः। भारतनेपालयोस्तु

[फाहियान परिशिष्टं पृ० सं० १०८]
[illegible] " पृ० सं० ११७]
" पृ० सं० १२२]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्यायामविच्छिन्नसन्तानवितानपरम्परा गुरुशिष्यसम्प्रदाय... च ... खातावच्छिन्नतोयतरङ्गवदादानप्रदानसन्ततिपरम्परा न केना... यितु... दरमामन्त्र... सनासनसंस्कृतेश्च भिन्नत्वेऽपि निलिम्पवाणीसाधनायान्न भि... मास। प्रारब्धस्येतिहासस्य स्वारस्यमत्रैव निहितमस्ति। तथा च कालक्रमेण लेखक... मध्ये नेपालस्य लोकोत्तरप्रज्ञावत्त्ववैदुष्यतारतम्यक्रमो विच्छिन्न इव प्रतिभाति। तथापि... वधेलिमज्ञेलिमोऽयं विषयः। परञ्च तन्त्रागमपारावारीणस्य पं० प्रेमनिधिपन्तस्य नामधेयं लोके... शास्त्ररत्नाकरन्यायमीमांसावेदान्ताऽवताराणां पण्डितनीलदेवपन्तप्रेक्षावदग्रगण्यानां नाम के न जानते... शिष्यप्रशिष्या भारतनेपालभूमण्डले मण्डलायिता आसन्। महामहोपाध्यायपं०सुब्रह्मण्यशास्त्रिचर... (वि० सं० १८९४ तः १९७६) म० म० पं० चित्रधरमिश्रचरणाः शास्त्रार्थवावदूक म० म० 'सीतारामशास्त्रिणः बालसरस्वती–बालशास्त्रिप्रभृतयो येषामप्रतिमशेमुषीकविचित्रगवीकाः शिष्याः भारतभुवं बुभूषयामासुः। येषां प्रशिष्याश्चित्रधरमिश्रशिष्याः म० म० डा० गङ्गानाथझाप्रभृतयः सम्प्रत्यपि येषां कीर्तिकल्पलतां चतुर्दिक्षु विस्तारयन्ति। नीलदेवपन्तमहाभागानां सर्वतोऽधिकशिष्यपरम्परा बङ्गदेशे वर्तते। अत एव वेदान्तमीमांसा परम्परायां नीलदेवपन्तं प्रत्यधमर्णो वङ्गदेश इति लेखने नात्रात्युक्तिः। अनया दिशा नीलदेवमहाभागानां पुत्रपौत्राः समेऽपि वाचस्पतिजयदेवदिव्यदेवप्रभृतयोऽप्रतिमपण्डितप्रकाण्डा इति न विस्मर्तव्यम्।

म० म० हरिशर्मा मुनिः, (सन् १८५०,) म० म० राघवकविः, पण्डितराजरङ्गनाथः, वेददर्शनमर्मज्ञः पं० दिलूसिंहचामलिङ्गराईः, श्रीदल (दयाल) कटुञ्जाराईः, पुराणधर्मशास्त्रमर्मज्ञः, (द्वावपि किरातक्षत्रियौ सम्वुलीकमानवास्तव्यावास्ताम्)।

वाग्देवतावतारदार्शनिकसार्वभौमन्यायाचार्य्यन्यायरत्नपोष्टाचार्यपण्डित-प्रकाण्डश्रीपद्मप्रसादभट्टराईपादानां जनिभूर्नेपालः

त्रिभुवननिर्मातुः कलाप्रसादीभूताखिललोकशिरोरत्नायमाणस्य संवर्तकसंवर्धनपरिपूतस्य निखिल हेयप्रत्यनीककालिकालव्यालेक्षितमनुतनूजन्मनिर्व्याजीभूतस्याखिलब्रह्मसम्पत्साक्षीभूतस्य भवभय... जनमन्दारकामकोटिकल्पस्य दिगन्तविश्रान्तकीर्तिकल्पस्य षडैश्वर्य्याष्टमूर्तिकलाभवनस्याक... नेपाल... यस्य लोकवत्तुलीलेत्यादिसूत्रप्रतिपाद्यस्य तत्त्वमसीत्यादिसगुणनिर्गुणनिगमागमप्रतिपाद्यस्य ... जनिजानेः पशुपतिनाथस्य निल्यलीलाभूमिर्हिन्दूराष्ट्र[३] नेपालदेशः।

---

१ पंडितराजराजेश्वरशास्त्रिद्राविडमहाभागानां श्रीमुखादवगतमस्माभिः।

२. "पं० नीलदेव पन्तजी नेपाली पण्डित जो कि वेदान्त और मीमांसाके अद्वितीय विद्वान् थे। उन्हीं से वेदान्तशास्त्रका (म० म० सुब्रह्मण्यशास्त्रीजी) ने सम्पूर्ण अध्ययन किया। इनसे बङ्ग देशके प्रायः बहुत से लोग काशी आकर वेदान्तदर्शनशास्त्रका अध्ययन करने लगे। तभी से बङ्गालमें दर्शनशास्त्रका प्रचार शुरू हुआ। अतः बङ्गदेश उनके प्रति कृतज्ञ है। इनके पढ़ाए हुए छात्र बङ्ग देश में अनगिने है।" [सा० वे० वि० कार्यविवरण सं० १९८० से उद्धृत]।

३. हिन्दूशब्दविषये 'वेदमाके छ?' पुस्तकस्य पृ० नं० १७९ तः १९३ पर्यन्तं ... तं ... 'प्राचीनहिन्दूविज्ञान'स्य भूमिका कर्णेहत्य द्रष्टव्या।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्तच्छोभायां सम्पत् ... तात्मन एव विधिविनिर्मितविविधभोगसम्पत्परिप्लुतनेपालदेशस्यातीव ... संख्यातुं ... दूवाड् ... राशिः । प्रखरदिनकरकरालनिदाघकाले समुपजाताशान्तमनस ... त्रिवेणीपावनपुलिनमुपगम्य श्रुतिसुभगकलहंसकामिनीकलरवमनःरम ... समुदितगीतं श्रुत्वानन्दसन्दोहकणिकालेशः कस्य चेतो न मोमोत्ति। स्वदेशं प्रत्या... अवधीरितसुरसुन्दरीसौन्दर्यतापसमुखनिर्गतनिगममन्त्रानाकर्ण्य कस्य सचेतसो हृदयन्त्रा... कस्यापि ... नवयौवनसुलभोत्कलिकाकुलीक्रियमाणत्रर्णिकुलतिलकमानसजनितनवरसरुचिरवैदिकलौकिकनिखि... ण ... जनिभूरिति के न जानते ? चिरन्तनतापत्रयानलदन्दह्यमानमानवहृदयं शान्तयितुं विधात्रा कौशलो ... नैव प्रतिभाति। गृहिजनत्रैकालिकसन्ध्यावन्दनापरिचितपशुवदाचरणनिष्ठकुसुमायुधशरनिकरजर्जरित शरीरः कश्चनाज्ञो नायकति कामपि हृदयालयलीनां कोमलकमलिनीदललसितां घृताचीमेनकारम्भोर्वशीति लोत्तमासुकेशीमञ्जुघोषाद्यधरीकरणक्षमां लीलावतीं नायिकां स्वान्ते प्रतिपलञ्चिन्तयन् यादृशीं दशामनुभवति तादृशकामचरपुरुषकल्याणमार्गं निर्व्यजिनानुकम्पयितुन्निर्मितोऽयं हिन्दूराष्ट्रनेपालः। तस्मिन् समुत्पन्नानां प्रापञ्चिक-कुटुम्बभरणक्रयविक्रयादिव्यवहारचतुरशास्त्रीयशेमुषीसंस्कारविधुराणां नराणामुपकाराय पारमार्थिक-विचारचतुरशास्त्रीयसंस्कारवतां परीक्षकाग्रेसराणां संख्यावत्कुलधौरेयाणां सकलतीर्थसारासारविवेचनपाटू-पटानां श्रद्धेयश्रीपं०पद्मप्रसादभट्टराईमहाभागानां जनिरभूत्। तस्मिन्नेव मध्यकिरातदेशे नेपाले सं० १९५३ वै० शु० द्वादश्यां रामेछापमण्डलान्तर्गतानन्तपुण्यनिवहसन्दोहापूरिते 'शालुग्रामे' भूसुरभासुरकुलदीन-जनहितकरदीनानाथभट्टराईतनुजत्वेन श्रीमत्यां कृष्णमायादेव्यां स खलु किल सम्बभूव[२]। श्रीदीनानाथतात-पादानां श्रीमत्याः कृष्णमायादेव्याश्च नयनानन्दवर्धनः सुतोत्तमः विलक्षणकलाकुशलीभूष्णुर्बालो बालीलाञ्चकार । तदनुगुणगृहिजनोचितोपनयनकर्मपरिसमाप्त्यनन्तरं काष्ठमण्डपाधित्यकां

१. नेपालस्य प्राचीनत्वप्रख्यापने सुदृढतराणीमानि प्रमाणानि सन्तीत्यवधेलिमोऽयं विषयः, तत्र—
शिवपुराणम् [४।३।१।४।४।१९] वाराहपुराणम् [२१५।३९,–४१]
वायुपुराणम् [४५ ११५–१२६–२१५।४३–४४] स्कन्दपुराणं हि० ख० [९।१३।१८–२७]
देवीभागवतम् [७।११।] भागवतपुराणम् [११।८।१३।१२–१३]
...स्य अ० शा० [११।१,] महाभारतम्–शा० प० [३८।५–१७–२४–३२]
...संहिता [४।२२,] रामायणम् बा० का [६६।२–१३–१४, ७१।३]
...लतन्त्रम् [३।३६,]
...लिमेतावन्मात्रन्नात्र विषये लुम्बिनी, कपिलस्य जनिभूः कपिलवस्तुः इत्यादीन्यनुसन्धानात्मकानि प्रमाणान्यपि निम... शीलैरुरीकर्तव्यानि। तथैव नेपालस्य ह्वेनसङ्ग प्रभामित्र-शान्तरक्षित शीलमञ्जुश्री लिम्पिओ प्रभृतिभिः यात्रिकैः सामस्त्येनोल्लेखः कृतः। एवञ्च प्रागैतिहासिकसमयनिर्णयावसरे वंशावलीनामपि प्रामाण्यमभ्युपगम्यत एव। यथा किरात-कालिक त्रिपुरास्यराजमालावंशावली-राइट-कर्कपेट्रिक-सेनवंशावलीत्यादीनां प्रामाण्यत्वेनोरीक्रियमाणे न काचिद्वि-प्रतिपत्तिः। पाश्चात्यलेखकानां दृष्टिर्यद्यपि शोभना न वर्तते। तथापि भ्रमरहितांशग्रहणे का नो हानिः? मिष्टरमूर-हेमर्टन-पर्सीव्रल-हाक्सन डेनिवलप्रभृतीनां लेखद्वारा किमपि रहस्यमासाद्यत एव। जैनाचार्यभद्रबाहोः किरातदेशे वि० सं० १५४ प्रवेशे प्रमाणमुपलभ्यते। तस्य शिष्यः स्थलभद्रस्तु नेपालज आसीदिति। वस्तुतो 'हिमवन्तो महित्वा' इत्यादि वेदमन्त्रा एव प्रमाणम्। तस्मान्नेपालदेशस्य प्राचीनत्वे न सन्देहावसरः प्रसरतीति।

अत्र विशेषतः 'वेदमा के छ ?' पुस्तकस्य [पृ० सं० १५७ तः १६५] पर्यन्तं द्रष्टव्यम्।

२. ...समघट्टतः २०३२ संवत्सरे प्रकाशितपत्रिकायाः पृ० सं० ७ अनुसारेणाविर्भावः सं० १९५३ तथा ति... ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्युत्पित्सुच्छात्रत्वेन विभूषयमास। तत्र च 'मुखं व्याकरण'मिति दिशा प्रथ... ...तनापरपा... ...ां निखिलशब्दानुशासनकेसरिणां प्रातःस्मरणीयपुण्यश्लोकानामधिवाराणसि ... ...काश्मी... प्रथितयशसां पं० श्रीविष्णुहरिरिमालमहाभागानां सविधे व्याकरणमेवाधीत...दरमाम... प...काव्यव दिकसमुचितवित्तिसम्पत्तिरपि तत्रत्यसंख्यावद्भिश्चित्रगवीकैः सहात्मसात्समर्जनं। ...मक्षपादीयन्यायं विना सर्वत्रान्याय इति मनसि विचिन्त्यान्नपूर्णाजानिवृषकेतननिकेतनकाशीतलवाहिनी... ...। यद्यपि काष्ठमण्डपत एव समधीतविषमविषयं समीकृत्य व्याकरणमध्यमपरीक्षामुत्तीर्य काशी... तत्र च प्रथमं गौतमावताराणामतिसरलहृदयानां स्व०महामहोपाध्यायपूज्यवामाचरणभट्टाचार्य... मन्तेवसत्तया नव्यप्राचीननयकान्तारे पथिकायितः।

परं देशिकचरणवरिवस्यारतमनस्कोऽयं त्वरया न्यायद्वयस्यापि कण्ठीरवत्वमापन्नः। वेदान्तमन्तरा महतायासेनाधिगतन्यायशास्त्रं फल्गुरिति तदनन्तरं स्व० महामहोपाध्याय-लक्ष्मणशास्त्रि द्राविडपादानां सविधे वर्षत्रयपर्यन्तमद्वैतवेदान्तशास्त्रस्य श्रद्धावनतेनाध्ययनं सम्पादितम्। क्रमशः समुपजातविविदिषायां स्व० महामहोपाध्यायनित्यानन्दपर्वतीयेभ्यः समग्रधर्मशास्त्राणामुपनिषदाञ्चाध्ययनं संपन्नम्। तदनन्तरं म० म० डा० गोपीनाथकविराजमहोदयानां निर्देशकत्वे शोधकर्मणि व्यापृतः, अवसितञ्च शोधकार्य्यम्। अनया दिशा नैयायिकधुरन्धराणां दुर्गे काशीरामघट्टस्थसाङ्गवेदविद्यालये गणेशोत्सवस्यापि सभापतिपदमलञ्चकार। तत एव न्यायरत्नोपाधिप्रदानेन सम्मानितः। एवं रीत्या काशीगुरुबागस्य निर्मलसंस्कृतविद्यालयेऽध्यापकत्वेन नियुक्ताः ततस्समागत्य मीरघट्टस्थमारवाडीसंस्कृतकालेजे आश्विनकृष्ण २ संवत् १९८४ तमसंवत्सरे न्याया-ध्यापकत्वेन नियुक्तिर्जाता। तदनन्तरं गोयनकासंस्कृतकालेजस्य न्यायविभागे समादरपूर्वकमाहूतास्ते। गोयनकाकालेजेऽध्यापनानन्तरं संन्यासिकालेजस्य १९५१-५२ पर्यन्तं प्रधानाचार्य्यपदमलङ्कुर्वाणा [2]अध्यासते स्म। एभिर्महानुभावैः क्रमशो न्यायाचार्य्यपरीक्षा १९२४ तमे ई० वर्षे पोष्टाचार्यपरीक्षा च १९२७ तमे ई० वर्षे उत्तीर्णा। मारवाडीकालेजस्य मासिकवेतनं ४५) रूप्यकमितं केवलमासीद्... एवञ्च महता कष्टेन जीवनं यापयतामपि तेषां वाणीसाधना गङ्गातरङ्गप्रवाहवत्प्रवहति स्मेति नात्र सं... ...नवन्द... मनीषितल्लजविद्वत्संसदि दिगन्तविश्रान्तकीर्तयः प्राभूवन्। परितो यशोराशयो दोधूयन्ते। ...ोप...

तेषां सतीर्थ्याः—

समाने गुरौ वसतीति स्मरणात्सर्वसाधनभूतवाणीसाधनायामनन्यभावेन साधकस्याप्यावश्यकता वरीवर्ति। तदैव जिह्वायां सरस्वती नरीनृत्यति। धीवरपामरसाम्यवैषम्यञ्च विविनक्ति। अथवा लौकिकपरीक्षक योर्बुद्धिसाम्येन दृष्टान्तसमर्पकत्वमपि सङ्गच्छते। योग्यतमदेशिकान्तिकमुपगम्यैव पक्ष साध्य-हेतु-

---

१. ९५ वर्षीयस्वामिसच्चिदानन्दमुखात् श्रुतम्। रामघट्टस्थपत्रिकायां तु स्व० म० म० नित्यानन्द-पर्वतीय-द्वारा सम्पूर्णं व्याकरणमधीतमिति। पर्वतीयमहाभागानां दौहित्र-पं० गोपालदत्त पाण्डेयमुखाच्छ्रुतं भट्टराईमहाभागैरुप-निषदामध्ययनं कृतं तेभ्य इति। पं० शेषराजरेग्मीद्वारा श्रुतं वेदान्तशास्त्रं धर्मशास्त्रञ्चाधीतमिति।

२. सन्यासिकालेजपत्रिका वि० सं० २०३६, ई० सं० १९७९, पृ० सं० ४० तः प्र... ...तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्तच्छास्त्राणां [illegible]नं कर्तुं शक्यते नान्यथा। तद्रीत्या नव्यभव्यसरण्यां किमपि नावीन्यप्रावीण्यमादधातीति [illegible]प्रभवन्ति· संख्याऽ[illegible]तस्सन्तः। एतन्निखिलमपि न प्राशस्त्येन परं तथ्यपथपथिकायितत्वादेव [illegible]पथीनन्ति प्रेक्षावन्तः। एतात्किल भट्टराईपादानां सतीर्थ्येषु साकल्येन विराजते स्म। तेषां प्रधानसतीर्थ्याः परमश्रद्धेया [illegible]तिमनैयायिकधुरन्धरा रामरुद्राचार्य्यकृतार्धटीकाप्रपूरकाः स्वनामध यपण्डितराजाराजेश्वर[illegible] आसन्। ते प्राचीनराजनीतिशास्त्रेऽपि धुरन्धराः। अन्यशास्त्रेष्वपि लब्धकीर्तय इति नात्र [illegible]। द्वितीया नवीनवामाचरणभट्टाचार्य्या आसन्। पं० वामाचरणभट्टाचार्य्यैरन्तेवसतामुपकाराय [illegible]र्णासामान्यनिरुक्तिप्रभृतिदुरूहग्रन्थेषु 'विवृति' नाम्नीमतिसरलां टीकां निर्माय महदुपकृतम्। साम्प्रतिकाः [illegible]शकाः अन्तेवसतश्चाधमर्णा इति निश्चप्रचं वक्तुं शक्यते। तृतीयाः पं० शिवदत्तमिश्रा आसन्। पं० शिवदत्तमिश्राणामिदं वैलक्षण्यमासीत्। ते धुरन्धरनव्यनैयायिकास्सन्तोऽपि वेदेऽपि समीचीनवैदुष्याः आसन्। १९६० तः १९७० पर्यन्तमपि 'अवच्छिन्नावच्छेदकप्रतियोगिकानुयोगिकनिष्ठाप्रकारतानिरूपिते'त्यादीन ध्यापयन्तोऽपि वेदकर्मकाण्डेष्वपि ते विज्ञाः। सम्प्रति पं० शिवदत्तमिश्रविरचितक्रोडपत्रस्य चर्चा प्रौढनयचक्षुषां सविधे न तिरोहिता। 'गङ्गानिर्झरिणी' गङ्गानिर्झरिणीव विरलप्रविरलप्रविरलतरप्रविरलतमसरण्या प्रवहति। एवं रीत्या पण्डितराजराजेश्वरशास्त्रिणां रामरुद्रीटीकापि रामरुद्राचार्य्यात्कथमपि न्यूना न वर्तते। अनया दिशा गौतमावताराणां महामहोपाध्यायानां वृद्धवामाचरणभट्टाचार्य्याणाञ्चत्वारोऽन्तेवसन्तो विशिष्टाः बभूवुः अन्येऽप्यास सन्ति वा परन्त्र विद्मो वयम्। राजेश्वरपद्मप्रसादवामाचरणशिवदत्तमिश्राः प्राच्यप्रतीच्योदीच्यावाच्यदिङ्नागा इव विराजन्ते स्म। सम्प्रति 'कीर्तिर्यस्य स जीवति' इति सूक्तिमन्वर्थयति।

तेषां महत्त्वपूर्णग्रन्थसम्पादनकार्य्यम्—

एवञ्च श्रद्धेयभट्टराईपादैः धाराप्रवाहरूपेणाध्ययनाध्यापनकृत्यसम्पादनपूर्वकं भूयसां ग्रन्थानां कुशलतापूर्वकं सम्पादनमपि कृतम्। तत्र प्रथमतो न्यायदर्शनवात्स्यायनभाष्यं सम्पादितम्। विषमस्थलेषु टिप्पणमपि व्यधायि। वि० सं० १९९९ (ई० सन् १९४२) चौखम्बातः प्रकाशितम्। द्वितीयमपि जगत्प्रसिद्धदार्शनिकस्य श्रीमदुदयनाचार्य्यस्य न्यायकुसुमाञ्जलेः सम्पादनं विहितम्। अस्य ग्रन्थस्य सम्पादनकर्मणि टीकाद्वयं [illegible]वीन्त्रविद्याझामहोदयस्य गूढार्थतत्त्वालोकटिप्पणमपि सम्पादितं वर्तते। तृतीयं 'वीरमित्रोदय' [illegible]प्रातिनियकग्रन्थस्य सम्पादनमपि महत्त्वपूर्णमस्ति। चतुर्थः स्कन्दपुराणान्तर्गतहिमवत्खण्डस्य [illegible]च्छा[illegible]श्लोकत आरभ्य एकादशाध्यायस्य ६२ श्लोकपर्यन्तं नेपालीभाषायामनुवादः कृतः[1]।

तेषां विरक्त-शिष्याः—

[illegible]नन्तश्रीविभूषित जगद्गुरुशङ्कराचार्य्याः काशी-सुमेरुपीठाधीश्वराः श्रीमच्छङ्करानन्दसरस्वतीमहाराजाः [भूतपूर्वशङ्करानन्दब्रह्मचारिणः] तेषामेवान्तिकेऽधीतवन्तः। एभिर्महानुभावैः ब्रह्मचर्य्यावस्थायां व्यधिकरणजागदीशीसामान्यनिरुक्तिसिद्धान्तलक्षणादिग्रन्थानां समीचीनरूपेणाध्ययनं कृतम्। तेषां शङ्कराचार्य्यस्वामिनामध्ययनप्रसङ्गे तैरेवाभिहितम्। तैः शङ्कराचार्य्यैः महती प्रशंसा विहिता। तादृशदर्शनसार्वभौमत्वं न क्वापि दरीदृश्यते। शनैः शनैः 'अवच्छेदकावच्छिन्नप्रतियोगिकानुयोगिके'त्यादि शब्दानामर्थस्फोरणे तेऽतीव चित्रगवीका आसन्नात्र शङ्कापङ्ककलङ्कावसरः। इति तेषां प्रशस्तिः।

अनया दिशाऽनन्तश्रीविभूषितश्रीमद्भगवद्रामानुजसमयसंवर्धनाचार्याणां श्रीत्रिदण्डिवेदान्तरामानुजाचार्य्यस्वामिपादानामपि बदरिकाश्रमवासिनां पञ्चलक्षणीतः प्रारभ्यावच्छेदकत्वनिरुक्तिसामान्यनिरुक्ति-

---

१ [illegible]को अनुवाद पं० पद्मप्रसादभट्टराई न्यायाचार्य उपप्रधानाध्यापक महाविद्यालय काठमाण्डौंको हो।
(हि० ख० ने० भा० पृ० सं० २६ टिप्पणी)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यधिकरणसिद्धान्तलक्षणव्युत्पत्तिवादशक्तिवादप्रामाण्यवादान्तं समेषां मूर्द्धाभिषिक्तग्रन्थानामध्य... दार्शनिकसार्वभौमभट्टराईमहाभागानां सविधे जातमिति प्रमोदभरेण मेदुरेण स्वरेण स्वयमेवा... एतैस्स्वामिमहाभागैरपि यावत्कालपर्यन्तं वैरिञ्चिप्रपञ्चेऽस्मिन् भौतिककलेवरं न परित्यक्तं तावत् श्रद्धेयचरणानां भट्टराईमहाभागानां प्राशस्त्येन तुण्डिलायन्ते स्म। योग्यतमदेशिकान्तिके समधीत्य तेषामन्तेवसत्वमङ्गीकृत्योत्तर-भारते भूयस्यः संस्थाः संस्थापिताः। तासु संस्थासु प्रयागे वेदान्तदेशिकसंस्थानम्, उनुरु... संस्कृतमहाविद्यालयः (हाईस्कूल-प्राइमरीसहितः) ज्योतिर्मठे-'देशिकविहारः' पाण्डुकेश्वरे 'गी... बदरिकाश्रमे 'वेदान्तकुटीरञ्च' संस्थाप्य तेषां बहुत्रान्नक्षेत्राणि, क्वचिच्च शिक्षण संस्थानानि सम्प्रत्यपि प्रच...

महामण्डलेश्वरेण गरीबदाससम्प्रदायसंवर्धनतत्परेण हरिद्वारभीमगोडास्थेन चेतनज्योतिसंस्कृत-महाविद्यालयसंस्थापकेन चेतनानन्दस्वामिपादेनापि न्यायवेदान्तविषयद्वयस्यापि पर्वतीयगुरुचरणानां समतिक्रमुषित्वा समीचीनतया ग्रन्थालोचनं विहितमिति हरिद्वारगुरुमण्डलपीठाधीश्वरसमायोजितसमज्यायां कस्मिन्नपि प्रसङ्गे समुद्घोषितम्। तेषां भट्टराईमहाभागानां न्यायादिशास्त्राध्यापनशैली अतीव समीचीनेति। अमीषां स्वामिपादानां महानुभावानां श्रीमुखाल्लेखकेन साक्षाच्छ्रुतम्।

परमविरक्तशिरोमणिसकलनिगमागमनदीष्णपूज्यस्वामिपादाः शिवचैतन्यभारतीमहाभागाः (पूर्वाश्रमनाम शिवप्रसादगौडाः) अपि तेषां प्रातस्स्मरणीयानां पर्वतीयगुरुचरणानां सविधे साकल्येन न्यायम-धीतवन्तः। अधिवाराणसि निवसतां सतां महतां विरक्तानां संख्यावतां शेमुषीजुषामक्षुण्णपरम्परायां सम्प्रत्यपि ललिताघट्टस्थशिवचैतन्यस्वामिपादा एव विराजन्ते। ते त्रिकालसन्ध्यायां गिरिजिनिजानिमेवोपतिष्ठन्ते। विरक्तवृत्तिमत्त्वात्कदाचिद्गङ्गां कदाचिद्विन्ध्याचलं विशेषतो वाराणसीमेवाध्यासते।

मुनिमण्डलप्रभृतिसंस्थाध्यक्षषड्दर्शनधुरन्धरपरमश्रद्धास्पदीभूतोदासीनसम्प्रदायसंवर्धनपरैर्योगीन्द्रानन्दस्वामिपादैरपि न्यायवार्तिकतात्पर्यटीकादीनामध्ययनानुशीलनादिकं भट्टराईपादानां सकाशादेवावसितम्। इमे स्वामिपादाः श्रीचन्द्राचार्यप्रवर्तितोदासीनसम्प्रदाये सर्वमान्यविद्वांसस्सन्तीति मनीषिपरिषदि न तिरोहितम्। अमीषां स्वामिपादानां कृतिषु अद्वैतसिद्धिचित्सुखीभामतीखण्डन...दिग्रन्थानां टीका अतीव विख्याताः। एभिः न्यायसारन्यायभूषणदिग्रन्थानां कुशलपूर्वकं सम्पादनं विहि... भूयांसो विपश्चिदपश्चिमाः साधुसमाजे तेषां शिष्या विराजन्त इति कर्णाकर्णिकयाकर्णि... शक्यते किल काश्यां वा निखिले भारते नेपाले च महतायासेन वाग्देवतावतारदार्शनिकसा... न्यायरत्नपोष्टाचार्यप्रभृतिपदभाजां स्वनामधन्यपण्डितपद्मप्रसादभट्टराईमहाभागानां गृहि... सन्तो भूयांसि यशांसि विस्तारयन्तीति न संशयलेशः।

तेषां गृहस्थ-शिष्याः—

एतेषां गृहस्थशिष्योत्तमेषु महामहिमराजदूतनिरञ्जनशर्मभट्टराईनव्यन्यायाचार्याः २०१८ संवत्सरे नेपालराजकीयमहाविद्यालयस्य प्राध्यापकपदे आसन्। तदनन्तरं परराष्ट्रमन्त्रालयस्य सहसचिवतां गताः। तत्पश्चाच्चीनदेशस्य सांस्कृतिकसहसचिवपदे नियुक्ता। ते महानुभावाः तदनन्तरं २०४० संवत्सरे पाकिस्तानस्य कृते राजदूततां गताः।

न्यायव्याकरणवेदान्तसाहित्यप्रभृतिबहुविधशास्त्रपारावारीणविद्वत्प्रवराः श्रीकेदारनाथै...भागाः संख्यावत्तल्लजेषु सम्प्रति लब्धकीर्तयः अधिवाराणसि उपकुर्वाणा विराजन्ते...तं... कटीकाप्रबन्धनिर्माणेन लोकोत्तरवैदुष्यं प्रख्यापयन्ति। जयपुरपटनाविश्वविद्...तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्तच्छात्राणामध्यापनकौशलेन ते किमपि नावीन्यप्रावीण्यमादधति। यद्यपि भट्टराईपादानां सविध एभिः केवलं कैपुचित् ग्रीष्मावकाशकालेष्वेवाभीष्टशास्त्रतत्वमासादितमिति तैरेव पण्डितवर्य्यैः समुपजातवार्ताप्रसङ्गेनोदीरितम्। तथाप्यहो गुरुभक्तिः, अहो कृतज्ञत्वम्। एभिर्महानुभावैस्स्वयमेव कृतज्ञतां ज्ञापयद्भिः लिखितो लेख एव तत्र प्रमाणम्। न्यायाचार्यराजनारायणशुक्लास्तेषां सकाशादधीतवन्तः। श्रीजीवन्यायतीर्थ-म... ...चार्यशिवचरणभट्टाचार्य्यादयोऽपि तेषां पं० पद्मप्रसादानां सकाशादधीतवन्त इति पण्डितराज-... ...द्रविडादीनां मुखाच्छ्रुतम्।

वाराणसेय संस्कृत विश्वविद्यालये न्यायवैशेषिकविभागाध्यक्षचराः महाभागाः पं० श्रीसुरेन्द्रनाथ-... ...दाश्चैतेषां प्रियशिष्याः। जनकपुररामम[न्]दिरस्थपण्डितकाशीनाथझाः सम्प्रति जनकपुरधाम्नि पुराणव्याख्यानं कुर्व[न्]त आसते। एते श्रद्धेयभट्टराईगुरुवर्य्याणां सविधे समग्रं तर्कशास्त्रमधीय तदनन्तरं पुराणविशेषज्ञाः सन्ति। तेषां पुराणव्याख्यानकौशलं समीचीनमिति तेषामेव व्याख्यानश्रोतृमुखादनायासेनाकर्णितम्।

एवमेव मिथिलाविद्यापीठस्याध्यक्षा आचार्य्यशोभाकान्तझोपाख्या महोदयाः, दरभङ्गाकामेश्वरसिंह-संस्कृतविश्वविद्यालयस्य पं० कीर्त्यानन्दझामहोदयाः, विश्वविख्यातकाशीहि[न्]दूविश्वविद्यालयस्य दर्शनविभागे-विराजमानाः पण्डितप्रवररुद्रधरझामहानुभावाः, गुर्जरप्रदेशस्थवटोदर [वडौदा] विश्वविद्यालयस्य संस्कृत-विभागाध्यक्षचराः पण्डितशोभितमिश्रमहानुभावाः, मध्यप्रदेशरायपुरस्नातकोत्तरकालेजस्य संस्कृतविभागा-ध्यक्षाः राजे[न्]द्रचौधरीमहानुभावाः, कुरुक्षेत्रविश्वविद्यालयस्य संस्कृतविभागाध्यक्षचराः मेरठकालेजसंस्कृत विभागाध्यक्षचराश्च तर्कशिरोमणिडा०धर्मे[न्]द्रनाथशास्त्रिमहाभागाः, सम्पूर्णा[न]न्दसंस्कृतविश्वविद्यालयस्य न्यायवैशेषिकविभागाध्यक्षाः डा० श्रीरामपाण्डेयमहाभागाः, तस्यैव विश्वविद्यालयस्य प्राचीनव्याकरण-विभागाध्यक्षाः डा०रामप्रसादत्रिपाठिमहानुभावाः, तत्रस्थानुसन्धानविभागे अनुसन्धानाधिकारिरूपेण कार्यरताः पं० रामगोविन्दशुक्लाः, तस्यैव विश्वविद्यालयस्य बौद्धदर्शनविभागाध्यक्षचराः पं० जगन्नाथोपाध्यायाः, कबीरचौरा-निर्मल-गोयनकासंस्कृतकालेजानां प्रधानाचार्यचराः वैयाकरणशिरोमणि पं० रामप्रीतिद्विवेदमहा-भागाः, राजकीयकाशिकसंस्कृतमहाविद्यालयस्य साहित्यावतारसाहि[त्]यविभागाध्यक्षचराः पं० मुकु[न्]दशास्त्रि खिस्तेमहा... ...स्याद्वादसंस्कृतविद्यालयस्य साहि[त्]यविभागाध्यक्षाः प्रसिद्धपत्रकाराः उत्तरप्रदेशस्याध्यापकपरि-षदो महा... ...पं० गोवि[न्]द नरहरि वैजापुरकरमहानुभावाः, प्रायशः समग्रेऽपि भारतवर्षे समुज्ज्वलकीर्तयः ...नपेशलाः गुर्जरप्रान्तस्थाः पं०रामच[न्]द्रडोंगरेमहाराजाः, माध्वमतसवर्धनतत्पराः ...सवो भूतपूर्ववाराणसेयसंस्कृतविश्वविद्यालयस्यानुसन्धानाधिकारिणः पं० माधवाचार्य-...पौरुषनधुरन्धराः बी० वेङ्कटरमणमहाशयाः, नेपालत्रिभुवनविद्यालयस्य वाल्मीकिविद्यापीठस्य न्या... ...ध्यक्षाः पं० लोकनाथढकालमहाभागाः, नेपालस्य दाङ्गजनतामहाविद्यालयस्य न्याय विभागाध्यक्षाः पं० गङ्गाधरपराजुलीमहाशयाः, नेपालराष्ट्रियाभिलेखालयस्याध्यक्षचराः पं० बुद्धिसागरपराजुली-महाभागाः, वाराणसेयदुर्गावट्टस्थाः पं० छविलालवांसतोलामहोदयाः, विश्वविख्यातकाशीहिन्दूविश्वविद्यालयस्य नेपाली-भाषाविभागाध्यक्षाः डा० डिल्लीरामतिमसिनामहोदयाः, काशीनिर्मलसंस्कृतविद्यालयस्य वेदान्त-विभागाध्यक्षाः पं० दुग्धनाथपण्डितवर्य्याः, उदासीनसंस्कृतकालेजस्य वेदान्तविभागाध्यक्षाः पं० महेशच[न्]द्र-शर्माणः, मध्यप्रदेशग्वालियरराजकीयसंस्कृतमहाविद्यालयस्याध्यक्षाः पं० अनन्तरामशास्त्रिखा[ण्]डेकराः, वाराणसेयसंस्कृतविश्वविद्यालयस्य नव्यव्याकरणविभागाध्यक्षचराः पं० मुरलीधरमिश्रमहाभागाः, उ[त्]कलप्रदेश-वास्तव्याः नवनवोन्मेषशालिप्रतिभासम्पन्नकाशीनाथशास्त्रिण उत्कलाः, विहारप्रान्तस्थाः पं० हरिनारायणझाः त... ...महाविद्यालयस्याध्यक्षाः, तस्यैव प्रान्तस्य कस्यापि विद्यालयस्य प्राचार्य्याः पं० ताराकान्त-झा... ...संस्कृतकालेजस्य प्राचार्य्यचराः विद्वद्वर्य्याः पं० जटाशङ्करझामहाभागाः, हरिद्वार-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कनखलस्थोदासीनसंस्कृतमहाविद्यालयस्य प्राचार्य्यचराः ब्रह्मभूयङ्गताः अस्मद्गुरुचरणाः ब्रह्मदेवझामहाभागाः, नेपालकाष्ठमण्डपस्थाः राजकीयविभागे कार्य्यरताः डा० हरिदेवमिश्रमहाभागाः, पण्डित मुकुन्दभट्टराईमहाभागाः, [1]नवकिशोराः उत्कलाः, स्व० रामचन्द्रशास्त्रिदाक्षिणात्याः, स्व० कृष्णदेवठक्कुराः, अपरे शोभाकान्तशर्माणः, पं० शोभाकान्तगौडाः, पं० हरिनारायणमिश्राः, एतत्प्रभृतयोऽनेके शिष्या विराजन्ते पद्मप्रसादानाम्। श्रद्धेयभट्टराईपादानां समेऽपि शिष्या भारतस्य नेपालस्य च समग्रेषु प्रान्तेषु तेषां कीर्तिकल[illegible]यति। अमीषां संख्यावत्तल्लजानां शेमुषीकलाः समेषु विप्रतिपन्नविषयेषु भागीरथीतोयप्रवाह[illegible] यदैव विप्रतिपत्तिडाकिनी प्रवलामपि शेमुषीमत्ति, तदैव झटिति घटत्वावच्छिन्नप्रतियोगिताक[illegible] परिष्कारद्वारा एते समादधतीत्यत्र नात्युक्तिः। एतावान् विरक्तगृहस्थविविधदेशवास्तव्यशिष्यमहा[illegible] वस्तुतस्तेषां श्रद्धेयभट्टराईमहाभागानां महद्वैशिष्ट्यमिति निगदितुं प्रभवामः। यत्किल तेषां समेऽप्यन्तेवसन्तः गुरुकल्पायन्ते। पद्मप्रसादादन्यें नेपालस्य दिवङ्गता जीविताश्च सन्ति विशिष्टविद्वांस इमे—महामहोपाध्यायहरिशर्ममुनि पं० कुलचन्द्रगौतमः, चतुर्वेदमर्मज्ञस्वामिसच्चिदानन्दपुरी [पूर्वनाम पं० ललिताप्रसादधिताल:] महामहोपाध्याय पं० द्रव्येशझाः (स्व०) पं० आनन्द रेग्मी, स्वामिनरहरिः, स्वामि वासुदेवानन्दः, पं० वैयाकरणकेसरी, दार्शनिकप्रवरः पं० मीनप्रसादः, वैयाकरणधुरन्धर (स्व०) पं० दधिरामः, (स्व०) टेकनाथः, वेदान्तमूर्तिः अनन्तानन्दस्वामिपादः, (स्व०) पं० नरपतिपोख्रेलः, पं० छविलालपोख्रेलः, वेदान्तमूर्तिः वासुकिब्रह्मचारी, गणितफलितज्योतिषशास्त्रमर्मज्ञः पं० शिवशङ्करबरालः, पं० रमाकान्तबरालः, दामोदरपण्डितः, वै० मू० स्वामिसोमेश्वरानन्दः, वेदान्तपुराणेतिहासज्योतिर्विद् पं० यज्ञनिधिरेग्मीः, पण्डितराजः सोमनाथसिग्देलः, राजगुरुः (स्व०) पं० हेमराजः, गणितफलितज्योतिषप्रकाण्डेतिहासमर्मज्ञः पं० नयराजपन्तः, व्याकरणसाहित्यधर्मशास्त्रादिविचक्षणः पं० शेषराजरेग्मीः, (स्व०) पं० माधवप्रसाददेवकोटाः, पं० दधिराम मरासिनीः, दार्शनिकपं० वेदानन्दझा प्रभृतयः केचनब्रह्मभूयङ्गताः, केचन आत्मधारणानुकूलव्यापारपूर्वकं जीवन्तो हिन्दूराष्ट्रनेपालं विभूषयन्ति भारतञ्चापि। अस्मिन्युगे विश्वस्मिन् केवलन्नेपाल एव हिन्दूराष्ट्रत्वेन राजानति। तस्य विद्वद्वत्सम्पदियत्ता नास्ति। 'आकारो ह्रस्वो महती च कीर्तिः' इति रीत्या सम्प्रति नेपाल आकारेण ह्रस्व एव तथापि तस्य महती कीर्तिः। आकारेण ह्रस्वत्वे[illegible] अस्य देशस्य विद्वदलङ्कारभूतस्य महनीयकीर्तेः वाग्देवतावतारस्य ब्रह्मभूयङ्गतस्य पं० पद्मप्रसादभट्टराई[illegible] कीर्ति जीवति स जीवति। वस्तुतो जीवति नात्रसंशयलेशः।

मान्यस्य जन्म सफलं, विमला च कीर्तिः, लब्ध्वा प्रतिष्ठितपदं बहुधा स[illegible]
यो निःस्पृहेण मनसा द्विजभट्टराईः साहित्यसंस्कृतिसुरक्षणतत्परोऽभू[illegible]
शास्त्रे प्रमाणपदवाक्यविचारशीलो वेदान्तसूक्तिचयने किल राजहंसः।
तस्मादचिन्त्यमहिमा महनीयकीर्ती राराजते सकलपूज्यगुणैर्वरिष्ठः॥
विद्यालये गुरुकुले गुरुशिष्यवर्ग-सम्माननाय भवते बुधवन्दिताय।
सम्पद्गुणैश्च विदुषे गुरुकल्पकाय श्रद्धाञ्जलिं विमलबोधघनाय [2]रामः॥

जयन्तु भट्टराईपादाः।

१. उत्कलवास्तव्यस्य पं० नवकिशोरशास्त्रिणस्स्वगुरुं प्रत्यतीव श्रद्धासीदिति तत्कृतैतद्विषयकपद्येन ज्ञाय[illegible]
न्यायवैशेषिकाचार्यं ब्रह्मविद्यामहार्णवम्। श्रीमत्पद्मप्रसादाख्यं सद्गुरुं [illegible]तं।
२. 'रा' दाने धातुः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीपद्मप्रसादभट्टराईमहोदयस्य संक्षिप्तं जीवनवृत्तम्

—पं० चेतोनाथशर्माऽऽचार्यः

उपक्रमः—

ताम्रकौशिक्याः सन्निधौ वर्तमानं सालुपामलीनामकं तत्स्थानं धन्यं यत् पण्डितवरस्य पद्मप्रसादस्य जन्मना सुभूषितम्। एतत्स्थानं नेपालराज्यस्य पूर्वस्यां दिशि रामेछापमण्डलान्तर्गतम्।

त्रिपञ्चाशदुत्तरैकोनविंशतिशत (१९५३) मितवैक्रमाब्दे[1] समुत्पन्नस्यास्य भवतो मध्यमापर्यन्तमध्ययनं काष्ठमण्डप एव सम्पन्नम्। तदनन्तरं स्वस्य वैयाकरणगुरोर्विष्णुहरिरिमालस्य शरीरपातेन खिन्नमनस्कोऽयं विद्यापिपासया वाराणसीं प्रतस्थे। वाराणस्यां तेन सतीर्थ्यसम्बन्धेन परिचितस्य नैपालकराजगुरोः किञ्चिदार्थिकसाहाय्यं संप्राप्य महामहोपाध्यायवामाचरणभट्टाचार्यसकाशान्नव्यन्यायं म० म० लक्ष्मणशास्त्रिद्राविडसकाशाद् वेदान्तं, तादृशोपाधिकनित्यानन्दपर्वतीयसकाशाद् धर्मशास्त्रञ्चाधीतम्। एवंरूपेणाधीत्य सोऽष्टसप्तत्युत्तरैकोनविंशतिशततमे वर्षे आचार्यपरीक्षायां तस्य त्रिवर्षानन्तरं विशिष्टाचार्यपरीक्षायां च समुत्तीर्णः। एवंरूपेणाधीयमानस्य पद्मप्रसादस्य नव्यन्याये, वेदान्ते, धर्मशास्त्रे च प्रौढं पाण्डित्यं समजायत।

अध्ययनसमये भट्टराईमहोदयस्य पठने तत्परता, विशिष्टा गुरुभक्तिश्चात्युत्तमा। अत एवाध्ययने दत्तचित्तोऽयमवकाशसमयेऽपि गृहं न प्रत्यागच्छति स्म। स्नेहाविष्टा जननी एकाकिनः पुत्रस्य मुखावलोकनसुखं वाञ्छन्ती यदा मुहुर्मुहुः पत्रं प्रेषयति स्म तदैव स कदाचिदागच्छति स्म। अध्ययने यथा तस्य तत्परता विशिष्टा तथैवाधीतस्य स्मरणे मनने च तत्परता प्रसिद्धा। अध्ययनमध्यापन स्मरणं स्मारणञ्च तस्य प्रमुखकर्माण्यासन्। यानि कुर्वन् [illegible]वनमयापयत्।

कार्यक्षेत्रम्—

[illegible]होदयस्य कार्यक्षेत्रं भारते नेपाले चोभयत्र व्याप्तम्। अध्ययनसमाप्तेरनन्तरं तत्रभवतः [illegible]श्यामेव १९८६ मितवैक्रमाब्दे मारवाडीसंस्कृतमहाविद्यालये पश्चाच्च गोयनकासंस्कृत- [illegible] सञ्जाता। आरम्भे तस्य जीवन-निर्वाहकं वेतनं पञ्चत्रिंशत् चत्वारिंशदेव वा रूप्यकाण्यासन्। तदनुसारं [illegible]निकमध्यापनं तस्य पूर्वाह्णे पाठशालायां प्रचलति स्म। परं वास्तवमध्यापनन्तु अपराह्णे स्वतन्त्ररूपेण तस्य गृहे एव प्रचलितम्, द्वित्रवादनाद् रात्रौ नव दश वादनपर्यन्तमविरलरूपेण। नैपालका भारतीयाश्च विद्यार्थिनः समानरूपेण गृहे पठितुमागच्छन्त आसन्। विपश्चित् पद्मप्रसादः पाठने परां मुदमनुभवति स्म। यथा वाराणस्यां तथैव नेपालसमागमानन्तरमपि तत्रभवतः गृहेऽध्यापनं सदा काष्ठमण्डपेऽपि हेमन्ते भवतु वा शिशिरे प्रायः सार्धषड्वादनादारभ्यैकादशवादनपर्यन्तमभूत्।

पाठनाय तस्य कृते पाठ्यघण्टानिर्धारणं निरर्थकमासीत्। यतो हि विद्यालयीयनियमानुसारेण यावान् समयो निर्धारितो भवति ततोऽप्यधिकतरं पाठितवान् सः। अवशिष्टपाठानामन्यविषयाणां च पाठ[illegible]

---

१ [illegible] कालनिर्देशः वैक्रमसंवत्सरानुसारेण।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यापनकौशलम्—

विदुषः पद्मप्रसादस्याध्यापनशैली यथा विशिष्टा तथा स्पष्टा च। यदा तत्रभवान् शब्दानुच्चारयति स्म तदा दूरे स्थितोऽपि श्रोतुं बोद्धुं च शक्यते स्म। पाठने प्रत्यक्षरं, प्रतिश्लोकं, प्रतिपङ्क्ति च समुच्चार्य तेषामाशयं समीचीनतया विवृणोति। अध्यापनसमये यदा कस्मिंश्चिदंशे शङ्का जाता तदा कञ्चित्कालं पाठं निरुध्य स्वयं विचार्य्य मननं विधाय निश्चित्यैव ततः परमग्रे प्रचलति स्म। तस्य विचारमुद्रापि तर्कमुद्रा सदृशी ... विद्यार्थिनां सावधानताऽपि परमावश्यकी। अन्यथोच्चारणे विपरीतोच्चारणे वा तस्य रोषो द्विगुणि... पाठ्यविषयसम्बन्धे सिद्धा तज्ज्यौतिषं विहाय व्याकरण-साहित्य-धर्मशास्त्र वेदान्त सांख्ययोगादिसर्वान् वि... समानरूपेण पाठयति स्म। तथापि न्यायदर्शनस्य नव्यप्राचीनभागे तस्य पाण्डित्यं चूडायितम्। सामान्यनिरुक्तिः, सामान्यलक्षणा, शब्दशक्तिप्रकाशिका, सव्यभिचारिस प्रतिपक्षः, शक्तिवादः, व्युत्पत्तिवादश्चैवमादिन्याय-दर्शनस्य प्रौढग्रन्थानां सूक्ष्मज्ञानं तस्य स्मृत्यन्तर्गतम्। तेषां ग्रन्थानां कठिनस्थलस्य ग्रन्थिविमोचने दत्तचित्तः स तार्किकस्त्रिचतुर्होरापर्यन्तमपि विचारयन्नेवावतिष्ठते स्म। अध्यापनरुच्या तत्र नैपुण्येन च भट्टाराईसन्निधौ छात्रसमुदायोपस्थितिरविरता। 'सर्वान् परित्यजेदर्थान् स्वाध्यायस्य विरोधिनः' इति मनुवचनानुसार-मध्यापनविमुखार्थिकलाभस्तस्य नातिप्रीतिकरः। तत्रभवत आगमनात् पूर्वं नेपाले नव्यन्यायाध्येतॄणां संख्या न्यूनैवासीत्। तस्यागमनानन्तरं संवर्ध्य सा सर्वत्र व्याप्ता। परं यदा तत्रभवानसाध्यरोगेणाक्रान्त-स्तत्पश्चादपि सा संख्याऽन्यूनैव सञ्जाता। एतेनाधुनातनकाले नव्यन्यायाध्ययनस्यात्र प्रवर्त्तको भट्टराई-महोदय इति कथनेऽपि न काप्यत्युक्तिः।

पाण्डित्यम्—

विपश्चितः पद्मप्रसादस्य पाण्डित्यं चूडायितम्, अत एव यदा तत्रभवान् काश्यामवसत् तदा जातासु विद्वत्सभासु, सम्पन्नेषु शास्त्रार्थेषु, संघटितासु विद्वन्मण्डलीषु तस्योपस्थितिरनिवार्या-मन्यत। शास्त्रीयविधिना धार्मिकविषयनिर्धारणे च पद्मस्य युक्तियुक्तं निर्वचनं समाधानञ्च सर्वैर्विद्वद्भिः सशिरःकम्पं स्वीक्रियते स्म। नेपालागमनानन्तरमपि बहुवारं तादृशविवादसमयः समायातः ... विंशत्युत्तर-द्विसहस्रतमे वर्षे समापन्नयोर्द्वयोरधिमासयोरेकस्य च क्षयमासस्य सम्बन्धे समुत्थितो वि... ...तरः। क्षयमासे विवाहितानां स्त्रीणां पतिगृहनिवासमाश्रित्य समुत्थितोऽयं विवादो मुहूर्तमार्तण्डस्य ...

> "उद्वाहात् प्रथमे शुचौ यदि वसेद् भर्तुर्गृहे कन्यका।
> हन्यात्तज्जननीं क्षये निजतनुं ज्येष्ठे पतिज्येष्ठकम् ॥"

इति श्लोकस्यार्थनिर्धारणमाश्रित्य समुद्भूत आसीत्। 'प्रथमे' इत्यस्य विवाहिताना विवाहाब्द एव यदि क्षयमासस्तदैव पतिगृहनिवासनिषेध इति पद्मस्य सम्मतिरासीत्। अन्येषां सोमनाथजूननाथ-प्रभृतीनां पण्डितानां तु प्रथमक्षयमासे इत्यभिप्रायोऽवर्तत। एकाक्यपि पद्मप्रसादः सिंहगर्जनं कुर्वन् शास्त्रीयविषयनिर्धारणे संख्याबहुत्वं न कारणमित्यघोषयत्। मनोराशयोऽप्येतादृश एव प्रतीयते—

> चत्वारो वेदधर्मज्ञाः पर्षत्त्रैविद्यमेव वा।
> सा ब्रूते यं स धर्मः स्यादेको वाऽध्यात्मवित्तमः ॥

तथैवात्र एकस्यापि पद्मस्य निर्णय एव शास्त्रीय इति तु पश्चाद् विदुषा नयराजेन "... मेतत् प्रथमेऽब्दे दोषो नैष द्वितीयादौ" इति मुहूर्तमालायाः श्लोकं प्रस्तुत्य समर्थितम्। ... तं ... ा यन्निश्चीयते तदेव सभायां वक्तव्यमिति मनोराशयः—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योऽन्यथा सन्तमात्मानमन्यथा सत्सु भाषते ।
स पापकृत्तमो लोके स्तेन आत्मापहारकः ॥

पद्मस्य स्वभाव आत्मापहारको नासीत् । अत एव तस्य स्वभावं समुल्लिखति नयराजः 'शक्तो [illegible] बुधो नैष कालानुसारम्' इति । धार्मिककृत्यविधौ संस्कारविधिसम्पादनादौ च भट्टराईमहोदयो [illegible]स्य मुखमवलोक्य कदापि नावादीत् किन्तु शास्त्रीयसिद्धान्तानुसारमेव । लोकव्यवहारविषयक-च [illegible]तरं शास्त्रनिकरं दृष्ट्वा निश्चित्य करोति स्म ।

धारणा, वेषश्च—

विपश्चितः पद्मस्य धारणेयत्ता वक्तुं न शक्यते । तथापि बहुकालसान्निध्यसौभाग्याद् यत्किमपि ज्ञातं तल्लिख्यते ।

स्वाध्यायविरोध्यर्थोपार्जनं तस्य नातिसुखावहमिति तु पूर्वमप्युक्तम् । मनुष्यजीवनस्य सर्वोत्कृष्टोपलब्धिरात्मज्ञानमेवेत्यपि तस्य निर्विवादो राद्धान्तः । विद्याऽविद्ययोर्मध्ये विद्योपार्जनमेव श्रेयस्करम् । विद्याऽपि सा या विमुक्तये समर्थेत्यपि तस्य निश्चप्रचं मतम् । केवलं जीवनोपार्जनसाधनीभूता शिक्षा तु कलारूपा न तु विद्यारूपेति तस्याशयः । एतादृश आशयो यथा परिष्कृतस्वान्तसंघट्टनिर्गतस्तथा मन्वादिशास्त्रकार-सम्मतोऽपि । यथा—

"सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम् ।
तद्ध्यग्र्यं सर्वविद्यानां प्राप्यते ह्यमृतं ततः ॥"

वेष-सम्बन्धे मनोः कथनं विद्यते "वयसः कर्मणोऽर्थस्य श्रुतस्याभिजनस्य च । वेषवाग्बुद्धिसारूप्यमाचरन् विचरेदिह" इति । 'उद्धतवेषधरो न स्यात्' इति कौटिल्यमतम् । एतदनुसारं पण्डितवरस्य पद्मस्य [illegible]धानं विद्वदनुरूपम् । चन्दनचर्चितभालः, कटिप्रदेशे धौतं, तत ऊर्ध्वभागे कञ्चुकमुत्तरीयञ्च परिधाय हस्ते [illegible] पुस्तकपत्रा[illegible]नाय प्रसेवं (झोला) छत्रञ्च गृहीत्वैव प्रायः प्रचलति स्म । पादयोरवगुण्ठनं (मोजा) न धारय[illegible]दत्राणन्तु साधारणम् । भक्ष्यपेयादिविधावपि समालम्बितसमुचितचाचारः स स्वयमेव [illegible]ति स्म । अन्यत्र राजकीयभोज्यादौ तु फलमात्रमपि न स्पृशति स्म, अन्यभोज्यादीनान्तु [illegible]यायश [illegible]:पौर [illegible]ति'

सम्मान-प्राप्तिः

[illegible]शीष्टाचार्योपाधियुक्तः पद्मप्रसादः स्वपाण्डित्यप्रकर्षेण स्वदेशे विदेशे च विविधैरुपाधिभिः समलङ्कृत आसीत् । अष्टोत्तरद्विसहस्रतमे वर्षे काश्यां विद्वत्सभया पण्डितवरः पद्मप्रसादः 'न्यायरत्नम्' इति पदेन सम्मानितः । तत्पश्चाद् 'दर्शनालङ्कारः' इति पदेनापि विभूषितः सः । नेपालागमनन्तरं संस्कृतमहाविद्यालयस्य प्रधानाचार्यपदमुद्वहन् तत्र भवान् राज्ञा महेन्द्रेण "प्रसिद्धप्रबलगोरखादक्षिणबाहुर्द्वितीय" इति विशिष्टपदेनापि समादृतः । राजकीयसंस्कृतमहाविद्यालये पूर्वम् उपप्रधानाचार्यपदे पश्चात्तु प्रधानाचार्यपदे प्रतिष्ठितः पद्मप्रसादः त्रिभुवनविश्वविद्यालये संस्कृतस्य प्रथमप्राध्यापकः (प्रोफेसर) ।

पारिवारिकीस्थितिः

१. [illegible] पद्मस्य पारिवारिकी स्थितिर्नातिसुखावहा यतश्चतसृणां पत्नीनां निधनजन्यवियोग[illegible]तः । द्विसहस्रतमे वर्षे श्रीमत्या ललितादेव्या सह तस्य पञ्चमविवाहः सम्पन्नः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इयमेवान्तिमा पत्नी। अन्तिमे विवाहे भट्टराईमहोदयस्यावस्थाऽष्टचत्वारिंशद्वर्षपरिमिता। चिरकालसह- योगिन्या ललितादेव्याः कुक्षौ क्रमेणाष्टसंख्यकाः सन्ततयः समुत्पन्नाः। एवं पश्चिमे वयसि विदुषि पद्मे विपुलपरिवारस्य भरणपोषणादिभारः सम्पतितः। अन्यो ज्येष्ठपुत्रो बाल्यकालादेव यक्ष्मरोगेण प्रपीडितः। तथा च जीवनस्यान्तिमे समये पण्डितवरस्य पद्मस्य पारिवारिकी स्थितिरीदृश्यैवावर्तत। सत्यामप्ये- तादृश्यां स्थितौ पण्डितवरेण यादृशं धैर्यमवलम्बितं, यच्च पाण्डित्यं सुरक्षितम्, यादृश... परिपालनञ्च कृतं तद् दृष्ट्वा कथयितुं शक्यते तत्र भवान् लोकोत्तरमहापुरुष इति।

अवसानम्

उपर्युक्तविवरणेन कथयितुं शक्यते पद्मप्रसादेन यावज्जीवनं ब्राह्मणशरीरोपयुक्तं कर्म सम्पादितम्। 'ब्राह्मणस्य तु देहोऽयं क्षुद्रकामाय नेष्यते' इति मनुना यदुक्तं तदनुरूपमेव पद्मस्य जीवनम्। तथापि तत्र भवानन्तिमे भागेऽष्टवर्षाणि यावद् यादृशदारुणरोगेण प्रपीडितस्तद् दृष्ट्वा भगवतः 'नाऽभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि' इत्युक्तिं स्मृत्वैव मनसो धैर्यावलम्बनं कर्तुं शक्यते, अन्यथा सुकर्माचरणं वृथेति प्रतीयेत। अष्टादशोत्तरद्विसहस्र (२०१८) तमे वर्षे अष्टग्रहयोग आसीत्। तस्मिन् समये विश्वशान्त्यर्थं सर्वकारसमायोजिते रुद्रयागे पद्मेनाचार्यपदमलङ्कृतमासीत्। अनुमीयते यागस्यैव प्रभावेण बहुविधानिष्टकारकरूपेण कल्पितोऽपि-अष्टग्रहयोगो निर्विघ्नं परिसमाप्तः।

तथैव द्वाविंशत्युत्तर द्विसहस्रतमे वत्सरे मार्गमासेऽपि राज्ञा महेन्द्रेण द्वितीयो रुद्रयागः समायोजितः। तत्राप्याचार्यपदे प्रथितपण्डितः पद्मप्रसाद एवावर्तत। तत्र गुरुतरमाचार्यभारं निर्वहन् पञ्चपञ्चहोरापर्यन्त- मुत्थायैव मन्त्रोच्चारणं कुर्वन् पद्मप्रसाद एकस्मिन् दिने यज्ञमण्डले निपतितः सन्नचेतनतां गतः। एषा दुरवस्था यज्ञसमाप्तेरर्धदिनेभ्यः पूर्वं जाता। तदनन्तरं पशुपतिमन्दिरसन्निधौ धर्मशालायां संस्थापि... पद्मस्य कतिपयदिनानन्तरं चेष्टा तु प्रतिनिवृत्ता, परं तस्य वामाङ्गं दारुणेन पक्षाघातेन निश्चेष्टं जातम्। पण्डितवरस्य तस्य तादृशीं स्थितिं द्रष्टुं नेपालेन्द्रो महेन्द्रः स्वयं, तदात्वे युवराजपदा... वीरेन्द्र... गत्वा भिषग्वरान् समुचितोपचारार्थं निरदिशताम्। पश्चाद् गृहं नीत्वा बहुविधरुक्प्रतीकारे... सम्यग्लाभो नाभूत्। तदनन्तरं तु शय्यामधितिष्ठन् सोऽष्टौ वर्षाण्ययापयत्। अन्ते... माघकृष्णप्रतिपदि दिनस्य द्विवादनसमये रामनामोच्चारणपूर्वकं पशुपतिसन्निधौ... विसृज्य शिवसायुज्यमवाप्तवान् पद्मप्रसादः। यस्यावसानशोके निमग्नाः संस्कृतज्ञा ... सभानामायोजनेन पण्डितवरे तस्मिन् सम्मानं प्राकाशयन्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्स्मारिका

'दिवं गतानां तत्र भवतां प्रकाण्डनैयायिकश्रीपद्मप्रसाद-गुरुवर्याणां गुणानुभवकारिका-चतुर्विंशी'

—पं० सुरेश-झा:

नेपालावनिपालशासनसुधा-संम्वर्धितं सर्वदा सीताराम-सुशोभितं जनकपूर्नामाश्चलं तीर्थराट् ।
तत्तीर्थोत्तरभागमध्यलसितं श्रीमद्धिमाद्रेरधः 'रामेछाप' प्रसिद्धमण्डल-शिरोरत्नोपमं पत्तनम् ॥ १ ॥
सम्यक् शोभितशालुसामलि इति प्राज्ञ प्रदीपाश्रितं, विख्यातो निजपत्तनादिषु परं सल्लोकमान्यो भवन् ।
दीनानाथ इति प्रसिद्धपुरुषः सद्भाग्यवान् भूसुरः, तत्पुत्रस्य कथा यथाश्रुतमतिप्राप्ता मयोट्टङ्क्यते॥ २ ॥
शालूसामलिवासी नेपाली पर्वतीय—विप्रोऽसौ । भट्टराईश्रीदीनानाथः पद्मप्रसादनामानम् ॥ ३ ॥
पुत्रं काश्यां पठितुं संप्रेष्य च भृशं मोदमानोऽभूत् । पुत्रः पद्मप्रसादः पितुरिच्छा-पूर्त्तिकामोऽभूत्॥ ४ ॥

कोशेन काव्येन च कौमुदीतः प्राप्तः स्वदेशे किल कोविदत्वम् ।
शास्त्रं ततोऽध्येतुमनाः स यातः काशीं सदाचारयुतो द्विजाग्र्यः ॥ ५ ॥
काशीनिवासी स च रामघाटे स्नानं विधायाम्भसि देवधुन्याः ।
श्रीविश्वनाथार्चनभक्तिभावैः सनातनीं संस्कृतिमन्वतिष्ठत् ॥ ६ ॥
सुकाशीप्रसिद्धं शुभसाङ्गवेदविद्यालयं प्राप्य विनीतभावः ।
...वोऽध्येतुकामो गुरुभक्तियुक्तः पपाठ बुद्ध्या सुपरिश्रमेण ॥ ७ ॥
...सेव्य तान् लक्ष्मणशास्त्रिवर्यान् तत्कालनैयायिकसार्वभौमान् ।
...श्यां समेषां गुरुतामवाप्तात् श्रीवृद्धवामाचरणादपाठीत् ॥ ८ ॥
...पौरुषेयायं श्रीवृद्धवामाचरणसुकृपया शास्त्रिणो लक्ष्मणात् स
वेदान्तं सङ्गमय्याखिलयुवकबुधे विज्ञतामाप्य दीप्तः ।
नित्यानन्दात् प्रसिद्धात् समयसमयतः पर्वतीयादधीत्य
सर्वं तद्धर्मशास्त्रं व्यलसदतितरामेष पद्मप्रसादः ॥ ९ ॥
न्यायाचार्यो यदाऽयं समभवदधिकं प्रोन्नतं सत्प्रतिष्ठं
पोष्टाचार्यं व्यधत्त प्रगतिकरणतो दर्शनज्ञान-मार्गे ।
गोपीनाथः प्रसिद्धो विबुधसुकविराट क्वीन्सकालेजनेता
...आसीत् तन्निबन्धाकलनगुरुवरः श्रूयते किंवदन्त्या ॥ १० ॥
...देष हि सत्प्रतिष्ठो नैयायिकोऽध्यापकतामवाप ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्यालये श्रीगुरुवाक्प्रसिद्धे काश्यां विपश्चिद्गुरुबाग-मध्ये ॥ ११ ॥
अध्यापने प्राप्तयशाः क्रमेण सभासु शास्त्रार्थपरासु शक्तः ।
काशीस्थसत्पण्डित-मण्डलीतो यो न्यायरत्नेन पदेन पूर्णः ॥ १२ ॥
पूर्वान्मठान्नूतनमारवाडी-विद्यालये प्राप्तनियुक्तिपत्रः ।
अध्यापयन्न्यायसमग्रभागं सदैव योऽध्यापन-कार्यलग्नः ॥ १
बहूनि वर्षाणि निकामविद्यो विद्यालये गोयनकाकृतेऽपि ।
अध्यापनं चारुतरं व्यधत्त ततस्तु संन्यासिमठे नियुक्तः ॥ १४ ॥
न्यायस्य शास्त्रार्थसभासु यत्र कुत्रापि शास्त्रार्थिजनार्थितः सः ।
अध्यक्षपीठं समधिष्ठितः सन् निष्पक्षतः सर्वसुखप्रदोऽभूत् ॥ १५ ॥
अध्यापने ख्यातयशा महात्मा त्यागी सदाचारवतां वरिष्ठः ।
पाठस्य काले नवतर्कदाने तन्नेत्रयुग्मस्य न चोपमात्र ॥ १६ ॥
सोऽयं विवाहान् क्रमशोऽथ पञ्च व्यधत्त संश्रूयत एव सर्वैः ।
पत्न्यश्चतस्रः क्रमशो मृतास्ता मन्ये हि दैवं प्रबलं समेषाम् ॥ १७ ॥
तथाप्यपत्यानि बहून्यभूवन् भार्यास्वनेकासु महाप्रभावात् ।
श्रीरामचन्द्रो भटराइनामा ज्येष्ठः सुतः सम्प्रति तन्निवासे ॥ १८ ॥
अन्येऽपि पुत्रा विलसन्ति पुत्र्यो धर्मात्मनो न्यायविदां वरस्य ।
नेपालमध्ये किल राजधान्यां विराजते तत्परिवारवर्गः ॥ ॥
अधीतस्वाध्यापन-लब्धकीर्तिर्गत्वा स्वभूपालसुराजधानीम् ।
तद्विश्वविद्यालय-नव्यशोभां संवर्धयामास बहुप्रकारैः ।
सद्विद्याचार्यवर्यः सदयहृदयकः प्राङ्-पद्मप्रसादो
नेपालेश-प्रियोऽभूत् सततमतितरां धर्मकर्मप्रचारे ।
धर्मात्मानं तमेनं मुनिजनसदृशं मानयित्वा सहर्षं
श्रीमान् भूपो महेन्द्रोऽपि च निजपरिषन्माननीयं चकार ॥ २१
नेपाल-भूपालमहेन्द्रसाह-सम्मानितश्चाप्यतितुष्टदैवः ।
कालो बली व्याकुलितं चकार कालः कृपां किं कुरुते कदापि ॥ २२ ॥
पक्षाघातेन रोगेण दिवं यातो महासुधीः । एकोनाशीतिवर्षीयो भूलोकं त्यक्तवान् बत ! ॥ २३ ॥
पुरातनविदां स्मृतिर्भवति भूरि-शान्ति-प्रदा तदीय-गुणवर्णनान्मनसि मोद आगच्छति ।
हठात् कमपि नूतनं सुकृति-भावमुत्पाद्य या प्रदर्शयति सत्पथं कमपि किन्न सत्स्मारिका ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयः पद्म-कृतित्व-प्रकाशः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

: ॥ १

पूत

भय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

[1]अभिनवतपस्विनी

ले० न्यायाचार्याः पण्डितवरश्रीपद्मप्रसादोपाध्यायाः—काशी।

भ... भारतभूभूषणभारतीभावनाभावितचेतसः शास्त्रसंवित्सलिलधाराधौतसमेनसः सुमनसः!

अस्यां खलु चतुरुदधिवेलावलयितायामिलायां प्रेक्षावत्प्रतिपित्सागोचरेषु धर्मार्थकाममोक्षाभिधेयेषु चतुर्षु पुरुषार्थेषु चरम एव निरतिशयः पुमर्थः, स च न व्युदस्तसंशयविपर्ययाशुद्धितत्त्वाधिगतिं परिहृत्याऽऽत्मानमासादयतीति निश्चप्रचमधिगतचितां विपश्चिताम्। सापि नान्तःकरणकलुषकषायकषणं विना चेतोदर्पणे प्रतिबिम्बते, तदपि न विहितानुष्ठितिप्रतिषिद्धपरिहृतिमन्तरा। विहितप्रतिषिद्धविषयिणी शेमुषीश्रेणिश्च नर्ते भगवतीममरगवीं कथमपि स्वसत्तामुपलभते इति तस्याः सकलपुरुषार्थप्रयोजकविहितप्रतिषिद्धगोचरज्ञानाजकतया पुरुषार्थसंसिद्धिं समभीप्सुभिर्विवेकशालिभिस्तस्याः पर्यवने संनद्धपरिकरैर्भवितव्यं भारतीयैर्विशेषतो द्विजकुलैः, यतः साधारणगवानामवनमप्यवनिजातानां मनुजमात्राणां धर्मत्वेनाम्नातं मुनिभिरिति किं पुनरस्या अनितरसाधारण्या अमरगव्याः, यस्यास्तावदुपवेदाः खुराः, चत्वारो वेदाः पादाः, छन्दःशिक्षाकल्पनिरुक्तादीनि पादाङ्गानि, धर्मार्थकाममोक्षक्षीरस्राविणश्चतुराश्रमास्स्तनाः, आश्रमिणो दोग्धारः, आश्रमधर्मो वत्सः, काव्यं पुच्छमूलम्, प्राकृतापभ्रंशप्रभृतीनि भाषान्तराणि पुच्छप्रान्तानि, कामशास्त्रं योनिः, रसप्रतिपादकाः प्रस्रावाः, तन्त्रं गुह्यम्, अधर्मप्रक्षयो गोमयः, अलङ्कारशास्त्राणि अलङ्काराः, संस्कृतवाङ्मयानि रोमाणि, पातञ्जलं हृदयम्, साङ्ख्यं शेमुषी, पुराणेतिहासधर्मशास्त्राणि शोणितानि, सच्चिदानन्दात्मकपरमात्मा आत्मा, पूर्वोत्तर-...ंसे पार्श्वे, ...शिष्यपरम्पराप्रणालिकाः प्राणाः, न्यायवैशेषिके शृङ्गे, श्रौतगृह्यसूत्रे श्रोत्रे, ज्योतिर्द्वयं नयन-...म्, पा... ...णं, व्याकरणं मुखम्, संगीतकानि शब्दाः, बाह्यमतानि तृणानि, आगमाविरोधिनो न...व्यभव्य...वो:, भारतभूः सञ्चरणभूमिः, आनन्दवनं गोष्ठम्, कर्मोपासनाकाण्डानि कर्माणि, नैकविध-क्रीडार...ः निगमागममर्मज्ञविद्वन्मण्डलीगोपालानुगतो भगवान् भूतभावनो गोपाल एव पालकः, ...परिचितनामस्वरूपप्रभावैर्बाह्यभाषाकत्तृणरसपुष्टैः कैश्चनोद्भटैर्वलीवर्दैर्व्याख्यान-संवादपत्र-...याऽभिहन्यमानापि अस्पन्दमाना मिलित्वाऽनुधावितापि लत्तयैव लत्तितास्तस्या गुह्यनिकट-...ःपौत्तरा विश्रामं विश्रामं तस्या नाममात्रशिष्ट्यै नवनवमुपायं पर्यालोच्य प्रवर्तमानास्ततोऽपि विफलै... ...स्म्प्रति जीवन्तीमेवैनां मृता इति प्रलपितुं प्रवृत्ताः। कीदृशं पुनरस्या मृतत्वमिति, तानेव परिपृच्छामस्ते ...जशून्यत्वमितरभाषासाधारणम्, मृतैर्व्यवहरणीयत्व प्रणीतत्वे चासंभवग्राहग्रस्ते, सर्वैर्दुर्ज्ञेयत्वं च "नह्येष स्थाणोरपराधो यदेनमन्धो न पश्यति" इति न्यायमनुसरति, जीविकाऽनिर्वाहकत्वं चेत्—केयं जीविका यामियं न निर्वोढुमलम्, कथं च जीविकानिर्वोढृत्वं भाषायामित्यपि समालोचनपथमेवानुसरति। राजपरिगृहीतिहीनत्वमपि न वक्तुं शक्यते। सन्ति हि भारते राजकीयसंस्कृतविद्यालया भूयांसः, राजकीयन्यायालयेऽव्यवहरणीयत्वं चेत् एतदपि नास्ति, न्यायालयाधीशैरप्यन्ततो मनुयाज्ञवल्क्यादिस्मृतीनां प्रामाण्यस्यानुसरणीयत्वादिति संस्कृताभिज्ञत्वरूपप्राणपवनशून्यैः संस्कृतद्वेषिभिर्भक्ष्यपेयाद्यद्वैतरागिभिर्मृतानां स्वानां

---

[1] अयं लेखः १९९२तमवैक्रमसंवत्सरे ज्येष्ठमासे श्रीकेशवदत्तपाण्डेय-श्रीतारादत्तपन्ताभ्यां सम्पाद्य प्रथमगु... ...वल्लरीतिसंस्कृतमासिकपत्रिकायां प्रकाशितः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भाषेति व्युत्पत्त्या स्वमृतत्वाभिव्यक्तये व्यपदिश्यत इयं मृतभाषेति नहि स्वस्य मरणे भाषा कदापि मृता भवतीति यत्किञ्चिदेतत् ।

भारतीयानां सर्वस्वभूता निरुक्ता गौः स्वशरीरपुष्ट्यायभिनवां वल्लरीमपेक्षत इति 'वल्लर्य'भिधानाया अस्याः पत्रिकायाः प्रागुक्तप्रकारेण साक्षात्परम्परयैहिकामुष्मिकफलप्रयोजकतया अस्याः प्रचारद्वारा जगत्कल्याणकामुकैः कैश्चित्सहृदयधुरीणैरधिकाशि द्वितीययुगजयन्त्यां प्रथमं प्रकाशिते[illegible] ॥ १[illegible] गवीश्वरान् सप्रश्रयं सादरं प्रत्यतु द्विवारं परिचरन्ती समीहते सर्वतोभावेन श्रीमद्भिर्वि[illegible] यतो न भवति विद्वत्परिग्रहमन्तराऽलङ्कर्माणं किमपि वस्तुजातमिति भवद्भ्यः प्राप्तानुग्रहेय[illegible]पत्नी[illegible] पत्नीव नवनवैस्तैस्तैर्भावविशेषैरनवरतं श्रीमतां प्रमोदपरम्परामादधती नूनमचिरादेवाधास्यति परितोषं परिपोषञ्च भगवत्या अमरगव्या इति सुदृढास्त्यस्माकं प्रत्याशेति विद्वन्मात्रशरणेयमभिनवा तपस्विनी सर्वथा स्वप्रेयसीव कक्षीकर्तव्येति शम् ।

'उन्नतिकौतुकम्

ले०—पं० पद्मप्रसादोपाध्यायन्यायाचार्याः

अयि भारतामरभारतीप्रणयिनः उदारोत्साहशक्तिसंपन्ना गुणैकग्राहका अनुग्राहका ग्राहकाः !

इह खलु परमार्थतोऽद्वितीयसच्चिदानन्दमयपरमात्मैकस्वरूपपर्यवसितेऽपि प्र[illegible]चीप्रकटित विविधवैचित्र्ये, आपाततोऽतिरमणीयेऽस्मिन् वैश्वे प्रपञ्चे अनारतमेकविंशतिप्रभेदभिन्न[illegible]नसङ्कुल संसारसरित्तरङ्गरिङ्गन्तश्चेतननिवहा अहमहमिकया प्रथमतः स्वोन्नतिनौकामारुरुक्षवः स्वस्[illegible] प्रायशोऽपरैरपरिशीलितानेव नवनवान्परिकरानवलम्बन्ते, अवलम्बमानाश्च प्रय[illegible] युञ्जते । न ह्यस्यांससागरायामपि धरायां व्यापारसहस्रैरपि तादृशश्चेतनः समवाप्य[illegible] समीहेत । स्वस्वोन्नतिकामनयैव च सन्ति सहस्रश उपायाः समये समये प्रकाशिताः[illegible] साम्प्रतं सङ्ख्यातुमेव न पार्यन्ते मादृशैः साधारणमनुजैः । अधुनाऽपीयमरभारती समुन्न[illegible]सुक[illegible]यैवा त्मानं लब्धवतीति केयमुन्नतिः ? कैस्कैश्चोपायानवलम्ब्यात्मानमासादयतीति प्रथमत[illegible]रूपणमेवो चितमिति तत्स्वरूपतदुपायनिरूपण एव यथामतिवैभवं वयमत्र प्रयतामहे ।

यद्यपि निखिलब्रह्माण्डमण्डलसर्जनावनप्रलयनशक्तिसहकृतचिदानन्दमयभगवदवतारैरन्तराऽन्तराऽन्तकातिथेयतामुपलम्भिते सदाचारमर्यादास्वापतेयलुण्टाकप्रचण्डपाटच्चरचमूनिकरे, सूक्ष्मव्यवहितविप्रकृष्टमपि पदार्थसार्थं करतलामलकवत्साक्षात्समीक्षमाणैर्मनुमरीचिप्रमुखैर्महर्षिगणैर्निरस्तनिगूढनिबिडाज्ञानतमःस्तोमे, श्रीमच्छङ्करमध्वरामानुजवल्लभाचार्यप्रभृतिभिराचार्यचरणैरपहृतविचिकित्साकण्टकनिकुरम्बे,

१ अयं लेखः "अमरभारतीति" संस्कृत-पत्रिकायाः प्रथमे वर्षे प्रथम-द्वितीय-संयुक्ता[illegible]१ तमवैक्रमाब्दस्य कार्त्तिक-मार्गशीर्षमासयोः ग. सं. कालेज-काशीतः प्रकाशितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नैकविधनिगमागमद्युमणिप्रभादीप्तिप्रद्योतिते, विशिष्टशिष्टोपवनप्रच्छायशीतले भारतभौमवर्त्मनि सञ्चरन्तः समधिगच्छन्त्येवोन्नतिं तन्निदानसन्दोहाँश्च पटवश्चातुर्वर्ण्यवटवोऽपीत्यभिभारतं या काऽप्यभिनवाभिधान-चातुरी सा पिष्टं पेष्टुरेव नयमनुसरतीति नास्त्यत्र लेशतोऽपि सन्देहानध्यवसायावसरः।

तथापि आधुनिकनवनवाधिभौतिकपदार्थजातजटिलजालजवनिकाप्रोर्णु वितायां पुरातनपदव्यां ति[illegible]णीतार्यग्रन्थानध्ययनेन, केचन कुलपरम्पराऽनुवर्तमानाचारपरिवर्जनेन, कियन्तः [illegible] अविद्याभासानामभ्यासेन, कतिचन तद्विद्यैः सह संवादेन तन्मयतामिवापन्ना भारते [illegible]ण [illegible]त्व मन्यमाना नवनवकौतूहलावलोकनकुतूहलिनः परानुकृतिमेव सभ्यतां समुन्नतिसाधनं च प्रमिण्वन्तो [illegible]जन्मान्तरार्जितपुण्यपरिपाकप्रसरसमासादितस्यास्य पाञ्चभौतिककलेवरस्य भस्मपुरीषपर-सान्ततामपरिकलयन्तः परकीयशिक्षणमेव सच्छिक्षणं, परकीयानुष्ठितं कर्मैव सत्कर्म, परकीयामुन्नतिमेव समुन्नतिं समधिगच्छन्तो भारतीयानामपि तादृशीमेवासुरीं समुन्नतिं समभिलषन्तोऽहर्निशमनिशमविच्छिन्न-प्रयासायासभारमुद्वहन्तो नैकमपि क्षणं समुपलभन्ते विश्रमसुखशय्यामधिष्ठातुम्, तत्संपर्कग्राहग्रस्तान्तःकरण-करिणश्च कियन्तः समधिककल्याणकामुका आस्माकीना अपि मित्रपुत्रकलत्रप्रभृतयः स्वकुटुम्बिन आकारचारव-श्चतुरचार्वाका इव यदायत्ता काम्ययोस्तयोरर्थकामयोः स्वरूपनिष्पत्तिः, यत्र चान्ततः सर्वेषामवसितिस्तौ विद्यमानावप्यविद्यमानाविव प्रामाणिकावपि निष्प्रामाणिकाविव परिगणयन्तोऽभ्यर्थकाममेव साधनानि उपाद-दानास्तत्रैवोन्नतिपदवाच्यतां परिसमापयन्तो दुराग्रहग्रहगृहीता दूरमेवापयाताः उन्नतिपदव्या इति उन्नति-पदार्थमेव तावद् विमर्शयामः कासावुन्नतिरिति।

उन्नतवैजयन्तीविचित्राः खलु इमे प्रासादाः, उन्नतकुचकलशभारमन्थरा कामिनी कस्य नो परितापाय कल्पत इति व्यवहारसिद्धः परिमाणविशेषो वा ? द्रविणोन्नतिपरायणा द्राविडाः, पुस्तकोन्नतिमात्रोन्नताः [illegible]यशो राजपुरोधस इत्यादिव्यपदेशसिद्धः संख्याविशेषो वा ? उन्नतबुद्धिविभवा वङ्गीयाः, उन्नतभावनाभावि-[illegible]तःकरणा [illegible]स्करिण इति प्रतीतिसिद्धः सामान्यविशेषो वा ? आद्यस्य पुरुषप्रयत्नागोचरतया, द्वितीयस्य [illegible]थाव्य[illegible]ङ्गभीत्या, तृतीयस्य च त्रैकालिकनिषेधाप्रतियोगितया त्रितयमपि न चतुरचेतसां चेतसि [illegible]मत्कारमा[illegible] सुखत्वं वा, सुखदुःखाभावान्यतरत्वं वा, स्वज्ञानाधीनेच्छाविषयत्वं वा, अन्येच्छा-[illegible]धीनेच्छावि[illegible]वोन्नतित्वमित्यभ्युपगच्छामः। दुःखाभावस्य प्रतियोगिगोचरद्वेषाधीनेच्छाविषयतयोक्तं [illegible]प्रतिहतगतिकमिति नाप्रसक्तिविचिकित्साव्याधिचिकित्साऽवकाशः, फलव्यतिरिक्तपदार्थ-[illegible]च्छाविषयतयैव च नातिप्रसक्तिदुश्छिद्रच्छिद्रसमुन्मेषोऽपि। न हि प्रेक्षावत्प्रवृत्तिगोचरतया [illegible]यायथमुन्नतिपदाभिधेयतां प्रतिपद्यते, धर्मार्थकाममोक्षाख्येषु तेषु प्रथमयोः फलवत्तयैव [illegible]ः पौरुषेयप्रवृत्त्यगोचरतया च विवक्षितपदाभिधेयताया विवेचकैरञ्जसाऽभिधातुमशक्यत्वात्। [illegible]योः फलव[illegible]तिपादिता प्रतिपन्नैः—

धर्मात्सुखं च ज्ञानं च यस्मादुभयमाप्नुयात्। तस्मात्सर्वं परित्यज्य विद्वान् धर्मं समाचरेत्॥
अर्थार्थी पुरुषो राजन् बृहन्तं धर्ममिच्छति। अर्थमिच्छति कामार्थं न कामादन्यमिच्छति॥

"उच्चा दिवि दक्षिणावन्तो अस्थुर्ये अश्वदाः सह सूर्य्येण। हिरण्यदा अमृतत्वं भजन्ते वासोदाः सोमप्रतिरन्त आयुः", "सद्यः शुद्ध्यति हेमदः" इत्यादिभिः श्रुतिस्मृतिसंहतिभिः। अत एव फलभावापन्नतया स्वप्रतीतितः पुरुषप्रवृत्तिसाधनतया च काममोक्षापरपर्यायौ सुखदुःखाऽभावावेवाऽस्माभिरुन्नतित्वेन परिगृही-ताविति तयोः फलात्मकतायां चाभियुक्ताभिधानमेव प्रमाणपदवीमधिरोहति। तच्च—

द्रव्यार्थस्पर्श[illegible] या प्रीतिरुपजायते। सकामश्चित्तसङ्कल्पः शरीरं नास्य दृश्यते॥
न [illegible]ऽन्यः साध्यते फलमेव तत्। इन्द्रियाणां च पञ्चानां मनसो हृदयस्य च॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयें वर्तमानानां या प्रीतिरुपजायते। स काम इति मे बुद्धिः कर्मणां फलमुत्तमम् ॥
प्रवृत्तिसंज्ञके धर्मे फलमभ्युदयो मतः। निवृत्तिसंज्ञके धर्मे फलं निःश्रेससं मतम् ॥ इत्यादि।

क्वचिदन्यत्रार्थप्रभृतावुन्नतिशब्दप्रयोगश्च उन्नतिसाधनप्रयुक्त 'आयुर्घृतम्' इत्यादिवदौपचारिक इति यथाप्रयोगमूहनीयमिति।

सा चोन्नतिरान्तर्गणिकभेदेन सत्यपि वैविध्ये परापरभेदेन द्वैविध्यमेव भजते ... आमुष्मिकभेदेन द्विविधैव। ऐहिकी तावत् निरातङ्कप्रभूतेष्टकलत्रपुत्रमित्रवित्तप्रभवसुखस... प्रचारद्वारा जगत्क... नस्मरणचरणसेवनार्चनवन्दनदाससखिभावात्मनिवेदनप्रभेदभिन्ननवविधपरमात्मगोचर... मुद्भूतविलक्षणानुभवैकवेद्यचिदानन्दमयवृत्तिविशेषानुभूतिश्च। आमुष्मिकी च श्रौतस्मा...नुष्ठितिप्रसूता-साधारणपुण्यतनयपराक्रमप्रभवा हिरण्यगर्भान्तविग्रहावच्छिन्ना नैतच्छरीरावच्छिन्नभोग्यतां प्रतिपद्यत इति।

पराऽपि द्विविधा—ऐहिकी आमुष्मिकी च, आद्या जीवन्मुक्तिलक्षणा, द्वितीया च परममुक्तिलक्षणा तत्राद्या तत्त्वज्ञानहुतवहाप्लोषिताखिलकल्मषसन्दोहस्य प्रारब्धकर्मशेषमुपभुञ्जानस्य शरीरप्रच्युतिमात्रम-पेक्षमाणस्य प्राग्देहपाताद्वर्तमानावस्था। द्वितोया च विधिवद्विशिष्टगुरूपसदनश्रवणमनननिदिध्यासनादि-भ्योऽभिव्यक्तौ स्वस्वरूपसाक्षात्कृतौ संचितेषु कर्मकलापेषु तत्त्वज्ञानाग्निना भस्मतामुपनीतेषु, प्रारब्धकर्मणां चोपभोगात्प्रक्षये तत्त्वसाक्षात्कारोत्तरकालीनकृतिगोचरैर्विहितप्रतिषिद्धव्यामिश्रलक्षणैः कर्मजातैः पुण्यापुण्य-प्रचयानुत्पत्तौ चतुरशीतिलक्षयोनिनिदानधर्माधर्मबीजप्रक्षयाच्छरीराद्यनुत्पत्तौ स्वस्वरूपोपलब्धिरूपा वा, स्वरूपप्रतिष्ठारूपा वा, निरतिशयनित्यसुखाविर्भावरूपा वा, आत्यन्तिकदुःखोच्छित्तिरूपा वेति विमर्शकाष्ठायां न काञ्चिद्विशेषकक्षामधिश्रयते।

कर्मनिष्ठानां हिरण्यगर्भान्ततामुत्पत्तिमभिधायाभिहितं च प्रशस्तचरणैः—"ज्ञाननिष्ठानां तु ज्ञान पूर्वकात्कृतादसङ्कल्पितफलाद्विशुद्धे कुले जातस्य दुःखविगमोपायजिज्ञासोराचार्य्यमुपसङ्गम्योत्पन्नतत्त्वज्ञानस्या-ज्ञाननिवृत्तौ विरक्तस्य रागद्वेषाद्यभावात्तज्जयोर्धर्माधर्मयोरनुत्पत्तौ पूर्वसंचितयोश्चोपभोगान्निरोधे सन्तोषसुखं शरीरपरिच्छेदं चोपपाद्य रागादिनिवृत्तिलक्षणः केवलो धर्मः परमार्थदर्शनसुखं कृत्वा निवर्त्त... रोधा... जस्यात्मनः शरीरादिनिवृत्तिः, पुनः शरीराद्यनुत्पत्तौ दग्धेन्धनानलवदुपशमो मोक्षः" इति ...

परापरभेदेन द्वैविध्यमापन्नानां निरुक्तानामुन्नतीनां स्वरूपसाधनप्रतिपिपादयिष... स्तिकानां पृथक्पृथक्प्रस्थानाश्चतुश्चतुर्दशाष्टादशभेदभाजोऽनवद्या विद्याः प्रावर्तन्त। ताश्च ... प्रयोजनाभ्यां विवेचयिष्यन्ते। यासां परिरक्षणायैव तथाविधः प्रचण्डप्रतापोऽचलापाल... शास्त्रोपदिष्टरीतिमनादृत्य यथाकामं प्रवर्तमानान्मनुजाकारान् कुरङ्गानुपमर्दयितुमागमनिगम... प्रणिहितमनाः सप्रणयं प्रवर्तेत, न पुनः शास्त्रानुशीलनैकस्वभावान् तदुपदर्शितदिशमनति... शिष्टानेव शासितुं स्वार्थैकमूलान् नवनवान् नियमाँश्च निर्मातुमिति। यदाऽत्र सोऽपि गु... भारता...वर्तः परिहृतशास्त्रानुशिष्टमर्यादो दुष्कृतिमेव सुकृतिं स्वमनिमेव श्रुतिमभिमत्य नानाविधाभिरुन्नीति... सुकृतिप्रकृती-रुद्वेजयति, तदा स्वयमेव नन्दकपाणिर्नन्दनन्दनोऽवत... ताः परित्रातुं धर्ममर्यादां च संस्थापयितुमिति।

तदुक्तं भगवता—

परित्राणाय साधूनां विनाशाय च दुष्कृ...। धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥ इति।

यस्य भगवतो यासां च विद्यानां प्रभावादे...वधि भारतीयानां भाविकं भारतीयत्वमक्षुण्णमनु-वर्तत इतीतरविद्यापरिचारिकापरिचर्यमाणा चक्रपाणेरध्युत्सङ्गं निषेदुषी श्रुतित्रयीव सदुपदेशजननी, जननीव प्रजाकल्याणकामिनी, कामिनीव रसिकमनोहारिणी, हारिणीव तिमिरापहारिणी, भार... भारती भूषयतु सततं सहृदयहृदयानां सदनं वदनं चेति शम्।

... नमवेक...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

[1]मार्गसमन्वयसमीक्षा

ले. न्यायाचार्याः पण्डितप्रवरश्रीपद्मप्रसादशास्त्रिभट्टराईमहोदयाः—काशी ।

•

